स्तम्भं महान्तमुचितं सहसा मुमोच
दानं ददावतितरां सरसाग्रहस्तः।
बद्धापराणि परितो निगडान्यलावी
त्स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः॥ ४८॥

स्तम्भमिति। करेणुस्वामी राजा च करेणुराजो गजश्रेष्ठः करेणूनां राजेति गजपतिः राजा च ध्वन्यते। उभयत्रापि राजाहःसखिभ्यइति टच्। उज्ज्वलमुच्छृङ्खलं स्वातन्त्र्यं स्वेच्छाचारित्वमवाप। तदेवाह उचितश्चिरपरिचितं महान्तं स्तम्भमालानं जाड्यञ्च सहसा मुमोच। स्तम्भः स्थूणाजडत्वयोरिति विश्वः। सरसः आर्द्रोऽग्रहस्तः पुष्करम्पाणिश्च यस्य स सन् दानम्मदन्दीयत इति दानं धनञ्चातितरामतिमात्रं। अव्ययादामुप्रत्ययः। ददौ ववर्षेत्यर्थः। परितो बद्धापराणि बद्धपश्चिमपादानि बद्धान्यानि च। अपरः पश्चिमः पादइति गजप्रकरणे वैजयन्ती। निगडानि शृङ्खलानि। अथ शृङ्खले अन्दुको निगडोऽस्त्रियामित्यमरः। अलावीत् लुनाति स्म। लुञ् छेदने लुङ् अस्तिसिचोऽपृक्ते इतीट् इट ईटीति सलोपः। अत्र करेणुराजपदसाधर्म्यध्वनिः विशेष्यस्यापि श्लिष्टत्वान्न श्लेषइत्युक्तम्॥ ४८॥

जज्ञइति। गम्भीरमन्दं वेत्तीति गम्भीरवेदी। त्वग्भेदाच्छोणितस्रावान्मांसस्य च्यवनादपि। आत्मानं योन जानाति तस्य गम्भीरवेदितेति राजपुत्रीये। चिरकालेन योवेत्ति शिक्षाम्परिचितामपि। गम्भीरवेदी विज्ञेयः स गजोगजवेदिभिरिति मृगचर्मीये। तस्मिन् गम्भीरवेदिनि करीन्द्रे संरब्धः कुपितः

अग्रे अनैर्मुकुलिताक्षमनाददाने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ।
गम्भीरवेदिनि पुरः कवलं करीन्द्रे
मन्दोऽपि नाम न महानवगृह्य साध्यः ॥ ४९ ॥
क्षिप्तं पुरो न जगृहे मुहुरिक्षुकाण्डं
नापेक्षते स्म निकटोपगतां करेणुम् ।
सस्मार वारणपतिः परिमीलिताक्ष
मिच्छाविहारवनवाससमहोत्सवानाम् ॥ ५० ॥

हस्तिनं पातीति हस्तिपः स एव हस्तिपकोनिषादी । आधोरणा हस्तिपकाहस्त्यारोहानिषादिनइत्यमरः । तस्य निष्ठुराभिश्चोदनाभि स्तर्जनाभिरपि मुकुलिताक्षं निमीलितनेत्रं यथा तथा पुरः कवलं ग्रासं अनाददाने सति । मन्दोमूढोऽपि । मूढाल्पापटुनिर्भाग्या इत्यमरः । गजभेदोऽपि । भद्रोमन्द्रोमृगश्चैव विज्ञेयास्त्रिविधागजा इति । महान् बलाधिकोऽवगृह्य निगृह्य साध्योन नाम न खल्विति [illegible] ज्ञातम् । जानातेः कर्म्मणि लिट् । मन्दोऽपीत्यादिवाक्यार्थः कर्म्म ॥ ४९ ॥

क्षिप्तमिति । वारणपतिः करिवरोमुहुः पुरः क्षिप्तमग्रे न्यस्त मिक्षुकाण्डमिक्षुदण्डं न जगृहे न स्वीचकार निकटोपगतां समीप स्थां करेणुं करिणीञ्च नापेक्षते स्म नेच्छति स्म । लट् स्मेति भूतार्थे लट् । किन्तु परिमीलिताक्षं यथा तथेति स्मृत्यनुभावः इच्छया विहारविषु ते वनवासाएव महोत्सवास्तेषां सस्मार तानेव

दुःखेन भोजयितुमाशयिता शशाक
तुङ्गाग्रकायमनमन्तमनादरेण ।
उत्क्षिप्तहस्ततलदत्तविधानपिण्ड
स्नेहस्रुतिस्नपितबाहुरिभाधिराजम् ॥ ५१ ॥

चिन्तयामासेत्यर्थः । अधीगर्थदयेशाङ्कर्मणीति शेषत्वविवक्षायां षष्ठी। न स्वच्छन्दचारिणां निर्बन्धे भोगेषु मनः प्रवर्त्ततइति भावः । वाक्यार्थहेतुकङ्काव्यलिङ्गमलङ्कारः ॥ ५० ॥

दुःखेनेति । उत्क्षिप्ते उद्यते हस्ततले दत्तो निहितो यः विधानस्य गजग्रासस्य पिण्डः । विधानं हस्तिकवलइति वैजयन्ती । तस्य स्नेहस्रुत्या घृतादिनिःस्यन्देन स्नपितबाहुराप्लुतभुजः । स्नातेर्ण्यन्तात्कर्मणि क्तः अर्त्तिह्रीत्यादिना पुगागमः मित्त्वाद्धस्वः । आशयिता भोजयिता । अशेर्ण्यन्तात्तृच् । तुङ्गाग्रकायं स्वभावत एवोन्नतोर्द्धकायं अनादरेणानमन्तं कवलग्रहणाय नतिमकुर्वाणमिभाधिराजम् । गतिबुद्धीत्यादिना अणिकर्त्तुर्णौ कर्म्मत्वम् । दुःखेन कृच्छ्रेण भोजयितुं शशाक स्वभावोन्नतानान्नचाप्यहङ्कारग्रस्तानां कोनमयितेति भावः ॥ ५१ ॥

शुक्लेति । शुक्लांशुकैः शुक्लपटैः उपरचितानि उपकल्पितानि अन्यत्र तु अल्पाः अंशवोऽंशुकाः सूक्ष्मास्तेजोऽवयवाः । अल्पाद्दत्यल्पार्थे कन्प्रत्ययः । शुक्लैस्तैरुपचितानि व्याप्तानि रश्मिभिः प्रग्रहैः किरणैश्च विततानि विस्तृतानि । किरणप्रग्रहौ रश्मी इत्यमरः । चन्द्रस्येवाकृतिर्येषान्तानि चन्द्राकृतीनि चन्द्रमण्डलनिभानीत्यर्थः नराधिपानां वेश्मानि दूष्याणि ।नरकाराभिर्नारकाभि

शुक्लांशुकोपरचितानि निरन्तराभि
र्वेश्मानि रश्मिविततानि नराधिपानाम् ।
चन्द्राकृतीनि गजमण्डलिकाभिरुच्चै
र्नीलाभ्रपङ्क्तिपरिवेशमिवाधिजग्मुः ॥ ५२ ॥
गत्यूनमार्गगमयोऽपि गतोरुमार्गाः
स्वैरं समाचक्रषिरे भुवि वेल्लनाय ।
दर्पोदयोल्लसितफेनजलानुसार
संलक्ष्यपल्ययनवर्ध्रपदास्तुरङ्गाः ॥ ५३ ॥

उच्चैर्गजमण्डलिकाभिर्गजपरिधिभिः । स्वार्थे कप्रत्ययः कात्पूर्व्व स्येकारः। नीलाभ्रपङ्क्तिभिः परिवेशम्परिधिम्परिवेष्टनमिति यावत्। परिवेशस्तु परिधिरित्यमरः। अधिजग्मुरिवेत्युत्प्रेक्षा ॥ ५२ ॥

गत्यूनेति । गत्यूनाविशिष्टगमनहीनामार्गगतयोऽध्वगमनानि येषान्ते तथापि गतोरुमार्गाः प्रस्थितदूराध्वानइति विरोधः। अपि विरोधे गत्यूना मार्गा मृगसम्बन्धिनी गतिर्येषान्तइति विरोधपरि हारः। अतएव विरोधाभासोऽलङ्कारः । दर्पस्य तेजसोऽन्तःसार स्योदयेनोत्कर्षेणोल्लसितस्योद्भूतस्य फेनजलस्य फेनीभूतोद्भूतस्वेदो दकस्यानुसारेण संलक्ष्याणि पल्ययनवर्ध्राणामासनबन्धचर्मवरत्राणां पदानि तन्नोदनात्चिह्नीभूतस्थलानि येषान्ते तथाक्ताः । तुरङ्गाः भुवि वेल्लनायाङ्गपरिवर्त्तनाय स्वरं मन्दं समाचक्रषिरे समाकृष्टाः अध्वश्रमापनोदनार्थमिति भावः । वल्लते हठबन्धनाद्योर्विभव तीति वर्द्धृद्धिवपिभ्यां रन्नित्यौणादिके रन्प्रत्यये लघूपधगुणो

आजिघ्रति प्रणतमूर्द्धनि वाह्लिजेऽश्वे
तस्याङ्कसङ्गमसुखानुभवोत्सुकायाः ।
नासाविरोकपवनोल्लसितं तनीयो
रोमाञ्चतामिव जगाम रजः पृथिव्याः ॥५४॥

रपरः । वर्भं त्वपुरत्वचयोरिति विश्वः । अमरस्तु नभौ वर्भौ वरत्रा स्यादित्याह । तदा इन्नित्यौणादिके इन्प्रत्यये पूर्ववत् गुणोरपरः प्रत्ययतकारस्य झषस्तथोर्द्धोधइति धत्वे षित्वात् स्त्रीलिङ्गे ङीष् ॥ ५३ ॥

आजिघ्रतीति । वाह्लिरश्वयोनिर्देशविशेषः तस्मिन् वाह्लिजेऽश्वे वाह्लिदेश्ये इति पाठे विशेष्याप्रयोगोगम्यमानत्वादित्युक्तं । गर्गादिभ्योयञिति भवार्थे यञ्प्रत्ययः । तदन्तविधिस्तु मृग्यः । प्रणतमूर्द्धनि नम्रशिरसि कृतप्रणामे च आजिघ्रति गन्धं गृह्णाति चुम्बति च सति स्वभावात्कामाच्चेति भावः । नासाविरोकं नासारन्ध्रंतस्य पवनोनिश्वासः तेनोल्लसितमुद्धूतन्तनीयस्तनुतरं रजस्तस्याश्वस्याङ्कसङ्गमेन वेल्लनप्रयुक्तेन यत्सुखन्तस्यानुभवे उत्सुकायाःउत्कण्ठितायाः पृथिव्याः रोमाञ्चताञ्जगामेवेत्युत्प्रेक्षा । सा च भूतुरङ्गमयोः प्रतीयमानचेतनत्वाचकाद्यभेदाध्यवसायादित्यवधेयम् । विरोचते ऽनेनेति विरोकम् । घञ्प्रत्ययः चजोः कु घिण्ण्यतोरिति कुत्वं लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति नपुंसकत्वाविरोधः । अतएव च्छिद्रंनिर्व्यथनं रोकमित्यमरः । रोकोरन्ध्रौ विले न पुंसीति वैजयन्ती । रोकोदीप्तौ विले रोकमिति विश्वः । ये तु केनाप्यभिप्रायेण विरेकपवनेति पठन्ति तेषाम्परोत्कर्षौंकजीविनामिति

खेलः स्थलीषु परितः परिवृत्य वाजी
धुन्वन्वपुः प्रविततायतकेशपङ्क्तिः।
ज्वालाकणारुणरुचा निकरेण रेणोः
शेषेण तेजस इवोल्लसता रराज॥५५॥

वदपानीयपवनप्रतीतेरश्लीलाख्यो दोषः अश्लीलन्तदमङ्गल्यजुगुप्सा व्रीडधीकरमिति लक्षणात्॥५४॥

खेल इति। खेलः स्थलीषु स्थलभूमिषु। जानपदेत्यादिना अकृत्रिमार्थे ङीष्प्रत्ययः। परितः परिवृत्य परिवृत्तिं कृत्वा वपुर्धुन्वन् धूलिनिर्गमाय कम्पयन् अत एव प्रवितता विक्षिप्ता आयता च केशपङ्क्तिः रोमसङ्घातो यस्य स वाजी ज्वालाकणाः स्फुलिङ्गाः तद्वदरुणरुचा रक्तवर्णेन रेणोर्निकरेण उल्लसता अत्युत्कटतया बहिरुद्गच्छता तेजसोऽन्तःसारस्य दर्पस्य शेषेणातिरेकेणेव रराज। उत्प्रेक्षालङ्कारः॥५५॥

दन्तालिकेति। पुरुषकोऽश्वानां स्थानकभेदः। तदुक्तम् पश्चिमेनाग्रपादेन भुवि स्थित्वाग्रपादयोः। ऊर्ध्वप्रेरणया स्थानमश्वानां पुरुषः स्मृत इति। पुरुष एव पुरुषकः तेन पुरुषकेण स्थानकेनोन्नमितजङ्घावस्थितोऽपकायः पूर्वकायो यस्य स तथोक्तः अत एवोदयशैलस्य मूर्ध्नो मस्तकादर्धमुदितोऽर्धोदितः हरिः सूर्य्य इव स्थित इत्यर्थः अर्धोदितविशेषणात् उपैकसतः श्रीवृक्ष एव श्रीवृक्षकः आवर्तविशेषस्तद्वानश्वः श्रीवृक्षकी। वक्षोभवावर्त्तचतुष्टयस्य कण्ठे भवेद्यस्य च रोचमानः। श्रीवृक्षकी नाम हयः स भर्तुः श्रीपुत्रपौत्रादिविवृद्धये स्यादिति लक्षणात्। श्रीवृक्षकी

दन्तालिकाधरणनिश्चलपाणियुग्म
मर्द्धोदितो हरिरिवोदयशैलमूर्ध्नः ।
स्तोकेन नाक्रमत वल्लभपालमुच्चैः
श्रीवृक्षकी पुरुषकोन्नमिताग्रकायः ॥ ५६ ॥

वदनि चेद्गीमावर्त्तो मुखे ऽपि चेति तु वैजयन्ती । दन्तालिका मुख रज्जुः । मुखरज्जुश्च दन्तालो राणिका रश्मीति चेति वैजयन्ती । तस्याधरणे ग्रहणे निश्चलं स्थिरम्पाणियुग्मं यस्य तत्पाणिभ्यां दृढं गृहीतोभयरश्मिमित्यर्थः । वल्लभपालमश्वपालम् । वल्लभो दयितेऽध्यक्षे कुलीनेऽश्वेऽपि वल्लभइति विश्वः । स्तोकेन नाक्रमत वल्गाग्रहणशक्तेः स्तोकेनापि अभिभवितुन्न शक्तोऽभूदित्यर्थः । इह अर्थयितुं यत्नमत्तमताङ्गना न इन्दुदुःखमिह किञ्चिदित्यादिवदप्यर्थस्य सामर्थ्यलभ्यत्वादपेरप्रयोगः । अन्यथा स्तोकेन नाक्रमत किन्तु भूयइति व्याख्याने निश्चलपाणियुग्मत्वादिविशेषणावगतवाहकोत्कर्षप्रकाशनतात्पर्यभङ्गप्रसङ्गात् । करणे च स्तोकेत्यादिना विकल्पात्तृतीया अनुपसर्गाद्वेति विकल्पादात्मनेपदम् । उपमालङ्कारः ॥ ५६ ॥

रेजइति । स्नपनेनाभिषेचनेन सान्द्रतरार्द्रमूर्त्तिः अनिमिषदृष्टिभिः विस्मयादनिमिषाक्षैर्जनैर्देवैरिव तादृग्भिरीक्ष्यमाणः श्रियः शोभायाः देव्याश्च सन्निधानेन रमणीयतरः । तत्र सन्निहिता लक्ष्मीः सन्ति यत्रोत्तमाश्वयाद्रत्यागमादिति भावः । उच्चैश्रवातोऽश्वोजलनिधेः समुद्राज्जातएव जातमात्रः सद्योजातइत्यर्थः । अन्यथोक्तसाधर्म्यासम्भवादिति भावः । मा नवक्षातस्थेऽश्वारण

रेजे जनैः स्नपनसान्द्रतरार्द्रमूर्त्ति
र्देवैरिवानिमिषदृष्टिभिरीक्ष्यमाणः ।
श्रीसन्निधानरमणीयतरोऽश्व उच्चै
रुच्चैःश्रवा जलनिधेरिव जातमात्रः ॥ ५७ ॥

अश्रावि भूमिपतिभिः क्षणवीतनिद्रै
रश्नन्पुरो हरितकं मुदमादधानः ।
ग्रीवाग्रलोलकलकिङ्किणिकानिनाद
मिश्रं दधद्दशनचुर्चुरशब्दमश्वः ॥ ५८ ॥

इत्यमरः । उच्चैरुन्नतं श्रवः कीर्त्तिरुन्नते श्रवसी कर्णौ वा यस्य सः उच्चैःश्रवाः शक्राश्व इव रेजे । उपमालङ्कारः ॥ ५७ ॥

अश्रावीति । पुरोऽग्रे हरितकं हरिततृणमश्नन् अतएव ग्रीवाग्रे लोलाश्चलाः कलाः किङ्किणिकाः क्षुद्रघण्टिकाः तासां निनादेन मिश्रन्दशनानान्दन्तानाञ्चुर्चुरशब्दञ्चुर्चुरध्वनिन्दधत् अतएव मुदमादधानस्तत्पादयन्नश्वः । जातावेकवचनं । क्षणेन वीतनिद्रैः । अल्पनिद्रोऽल्पभुग्वाग्मी मितभाष्यनसूयकइति सौभाग्य लक्षणादिति भावः । भूमिपतिभिरश्रावि अतः अश्वस्य शब्दोऽश्रा वीत्यर्थः । वीणाः श्रूयन्ते भेर्य्यः श्रूयन्तइत्यादिवत् शब्दधर्म्माः शब्दि ष्कूपचर्य्यन्ते । स्वभावोक्तिरलङ्कारः ॥ ५८ ॥

उत्खायेति । दर्पाच्चलितेनोच्चलितेन अतएव रज्ज्वा पाशेन सह कीलं शङ्कुं । शङ्कावपि द्वयोः कीलइत्यमरः । उत्खाय उत्पाट्य तूर्णं विद्रुतन्धावन्तं अन्यमश्वं अश्वेत्यनुद्रवता वडवेति भ्राम्या पुधावता प्रयत्नपरैर्ग्रहीतुमयतमानैरपि मन्दैर्मानुषै

उत्खाय दर्पचलितेन सहैव रज्ज्वा
कीलं प्रयत्नपरमानवदुर्ग्रहेण ।
आकुल्यकारि कटकस्तुरगेण तूर्ण-
मश्वेति विद्रुतमनुद्रवताश्वमन्यम् ॥ ५८ ॥

दुर्ग्रहेण तुरङ्गेण कटकः शिबिरमाकुल्यकारि आकुलीकृतः । आकुलशब्दादभूततद्भावे च्विः अस्य च्वाविति ईकारः । करोतेः कर्मणि लुङि चिण्लुक् ॥ ५८ ॥

अश्वाकुलमिति । वल्गा मुखरज्जुः सा चोत्क्षिप्तादिभेदेन चतुर्दशविधा । तदुक्तं हयलीलावत्याम् । उत्क्षिप्ता शिथिला तथोत्तरवती मन्दा च वैहायसी विक्षिप्तैककराङ्कुशास्वरसमोत्क्षीर्णा विभक्ता तथा । अश्रुत्पिच्छलतोङ्कृते खलु तथा व्यागूढगोकर्णिके वाहानाङ्क्षिताश्चतुर्दशविधा वल्गाप्रभेदा इमीति । तल्लक्षणानि तु तत्रैव द्रष्टव्यानि विस्तरभयान्न लिख्यन्ते । तस्या विभागो विविच्य प्रयोगः तत्र कुशलो वल्गाविभागकुशल इति षड्विधप्रेरणाभिज्ञ इत्यर्थः वल्गाग्रहणस्य रागाद्युपलक्षणत्वात् । यथाह भोजः । वाहनं प्रतिवाहानां षड्विधप्रेरणं विदुः । रागा वल्गा कषा पार्ष्णिप्रतोदस्वभेदत इति । कश्चित् कश्चन वाहकः अश्वाकुलं समयमत्र स्त्रमिति यावत् प्रकर्षेण कृतमकृतं सज्जितमित्यर्थः । मुखे मुखकर्मणि सिद्धं सिद्धिमन्तमश्वं चतुष्काख्ये गतिविशेषे मुखे संस्थानविशेषादि विशेषणविशिष्टमश्वमित्यर्थः । तदुक्तं रैवतोत्तरे । स्वाधरोष्ठमितफेनलवाभिरामफूत्काररवायुपदमुन्नतकन्धरायं । नीलोपकुञ्चितमुखं नवलोहपाश्यमश्वं चतुष्कसमये मुखसिद्धमाहुः ।

अव्याकुलं प्रकृतमुत्तरधेयकर्म्मा
धाराः प्रसाधयितुमव्यतिकीर्णरूपाः ।
सिद्धं मुखे नवसु वीथिषु कश्चिदश्वं
वल्गाविभागकुशलो गमयाम्बभूव ॥ ६० ॥

उत्तरधेयकर्म्मा युद्धाद्युत्तरकाले धेयं विधेयमश्वयोज्यं यत्कर्म क्रिया तद्रूपादित्यर्थः । अव्यतिकीर्णरूपा असंकीर्णरूपा धारा गतिभेदाः । अश्वानान्तु गतिर्धारा विभिन्ना सा च पञ्चधा । आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतमिति वैजयन्ती । गतयोऽमूः पञ्च धारा इत्यमरश्च । अश्वशास्त्रे तु संज्ञान्तरेणोक्ताः । गतिः पुला चतुष्का च तद्वन्मध्यजवा परा । पूर्व्ववेगा तथा चान्या पञ्च धाराः प्रकीर्त्तिताः । एकैका त्रिविधा धारा हयशिक्षाविधौ मता । लघ्वी मध्या तथा दीर्घा ज्ञात्वैता योजयेत् क्रमादिति । तथा च पञ्चदशविभेदा भवन्ति । ताः पञ्च धाराः प्रसाधयितुम्परिचेतुं नवसु वीथिषु संचारस्थानेषु गमयाम्बभूव । वीथयो नवाश्वानां सर्व्वत्र धारा दर्व्वार्थाः परिमिताः प्रचारदेशाः तास्च तिस्र इत्येके नवेत्यन्ये नवोत्तरपक्षमाश्रित्योक्तं कविना नवस्विति । यथाह भोजः । वीथ्यस्तिस्रोऽथ धाराणां लघ्वी मध्योत्तमाः क्रमात् । तासां स्यात् कूर्म्मणां मानमशीतिर्नवतिः शतम् । श्रेष्ठमध्योत्तमानान्तु वाजिनां वीथिकाः स्मृताः । नवानां कथिता वीथ्यो दृष्टानां क्रमणक्रमे । अन्येषामपि सर्व्वत्र गतिदार्व्वार्थमीरिताः । समोन्नता च विषमाप्युत्कीर्णा मृद्वी मताया हषवीरुदाख्या । स्थाणुप्रकीर्णपङ्क समाकीर्णा पार्श्वोन्नताख्या नवधेति वीथ्यः । सर्व्ववीथिषु योवाजी

मुक्तास्तृणानि परितः कटकं चरन्त
स्तुट्यद्वितानततनिकाव्यतिषङ्गभाजः।
सद्यः सरोषपरिचारकवार्य्यमाणा
दामाञ्चलस्खलितलोलपदं तुरङ्गाः ॥६१॥

दृढशिक्षासमन्वितः। तेन राजा रणे नित्यं मृगयायां मुदं व्रजेदिति। अन्ये तु धरसाद्यादयो गतिविशेषा वीथय इत्याहुः। धरसालो वरसालो पृथुलोमध्यनामकः। आलीढः शोभनैरङ्गैः प्रत्यालीढस्तथापरः। उपधेनवजक्रं च पादपाली च सर्व्वगः। निर्द्दिष्टा वीथयस्त्वेता इति ॥ ६० ॥

मुक्ता इति। मुक्ता विहारार्थमुत्सृष्टा अत एव कटकं शिविरम्परितः। अभितः परित इत्यादिना द्वितीया। तृणानि चरन्तो भक्षयन्तः त्रुट्यन्तीषु छिद्यमानासु वितानतनिकासु पटमण्डपरज्जुषु व्यतिषङ्गं सङ्गं भजन्तीति तथोक्ताः। अत एव सरोषैः परिचारकैः किङ्करै र्वार्य्यमाणाः अपसार्य्यमाणाः तुरगा दामाञ्चलानि पादपाशाः। दामाञ्चलम्पादपाश इति वैजयन्ती। दुष्यवरचाबन्धनशङ्कव इति केचित्। तेषु स्खलितेन लोलानि पदानि यस्मिन् कर्म्मणि तद्यथा तथा सञ्चरन्तः ॥ ६१ ॥

उत्तीर्णेति। उत्तीर्णभारमवरोपितावपनं अत एव लघु तेन तथोक्तेन तथाप्यलघुना उल्लपानां वस्त्रजतृणानां भरेण सौहित्यम्पूर्त्तिः। पर्य्याप्तमुपसम्पन्नम्पूर्त्तिः सौहित्यमुच्यत इति हलायुधः। तेन निस्तृततरेणात्यन्तमसहतरेण वाह्यभारावतारे ऽप्यन्तरगुरुभोजनाद्गुरुभवनेत्यर्थः। सहेः निःपूर्व्वात् पचाद्यच्

उत्तीर्णभारलघुनाप्यलघूपलाभ
सौहित्यनिःसहतरेण तरोरधस्तात् ।
रोमन्थमन्थरचलद्गुरुसास्नमासा
ञ्चक्रे निमीलदलसेक्षणमौक्षकेण ॥ ६२ ॥
मृत्पिण्डशेखरितकोटिभिरर्द्धचन्द्र
शृङ्गैः शिखाग्रगतलक्ष्ममलं वहद्भिः ।
उच्छृङ्गितान्यवृषभाः सरितां नदन्तो
रोधांसि धीरमवचस्करिरे महोक्षाः ॥ ६३ ॥

त्तरप् प्रत्ययः । उक्षपावत्सजाः प्रोक्ता इति विश्वः । औक्षकेण उक्ष्णां समूहेन । गोत्रोक्षेत्यादिना वुञ् प्रत्ययः । तरोरधस्तात्तले रोमन्थः पशूनां चर्व्वितचर्व्वणं तेन मन्थरमन्दं चलन्त्यो गुर्व्यः सास्ना गलकम्बलानि यस्मिन् कर्म्मणि तद्यथा तथा । सास्ना तु गलकम्बलइत्यमरः । किञ्च निमीलन्ति सुखान्मुकुलीभवन्ति अलसानि ईक्षणानि यस्मिन् कर्म्मणि तत् यथा तथा आसाञ्चक्रे आसितम् । आस उपवेशने भावे लिट् । दयायासश्चेत्यान्प्रत्ययः । कृञ्चानुप्रयुज्यते लिटीति कृञोऽनुप्रयोगः । इतः प्रभृत्याचतुष्टयात् स्वभावोक्तिः ॥ ६२ ॥

मृत्पिण्डेति । मृत्पिण्डैर्वप्रक्रीडालग्नैर्मृत्खण्डैः शेखरिताः सञ्जातशेखराः कोटयोऽग्राणि येषान्तैरत एव शिखाग्रगतमुभयकोट्यन्तर्गतं लक्ष्मैव मलं यस्य स एवम्भूतं श्वेतमर्द्धचन्द्रं वहद्भिरित्यतिशयोक्तिभेदइत्युक्तम् । अभूतोपमेति मतान्तारम् । शृङ्गैर्विषाणैरुच्छृङ्गाउत्पतितशृङ्गाः कृताउच्छृङ्गिताः अन्यवृषभाः प्रति

मेदस्विनः सरभसोपगतानभीकान्
भङ्क्त्वा परानन डुहो मुखराखवेन ।
ऊर्ज्जस्वलेन सुरभीरनु निःसपत्नं
जग्मे जयोद्धुरविशालविषाणमुक्ष्णा ॥ ६४ ॥

वृषभार्थे ते अतएव धीरङ्गभीरं नदन्तो गर्जन्तः महान्त उक्षाणो महोक्षाः। अचतुरेत्यादिना निपातात्साधुः । सरितां रोधांसि अवचस्करिरे आलिलिखुः हर्षादुत्कुरिरित्यर्थः । अवपूर्व्वात्किरतेः कर्त्तरि लिट् किरतेर्हर्षजीविकाकुलायकरणेष्विति वक्तव्य मित्यात्मनेपदम् ऋच्छत्यृतामिति गुणः अवाचतुष्पाच्छकुनिष्वा लेखने इति सुडागमः ॥ ६३ ॥

मेदस्विन इति । ऊर्ज्जो बलमस्यास्तीति तेन ऊर्ज्जस्वलेन बलिना। ज्योत्स्नातमिस्रेत्यादिना निपातः। उक्ष्णा वृषभेण मेदस्विनो मांसलान् । अस्मायामेधास्रजो विनिः । अतएव सरभसं सत्वर मपगतान् अभिकामयन्त इत्यभीकान् कामुकान्। कम्रः कामयिता भीक इत्यमरः। अनुकामिकाभीकः कमितेति निपातः। परान नडुहो बलीवर्दान् मुखरारावेन युद्धेन भङ्क्त्वा निर्जित्य जयेनोद्धुर निर्भरे । ऋक्पूरित्यादिना समासान्तः । विशाले च विषाणे यस्मिन् कर्म्मणि तद्यथा तथा निःसपत्नमप्रतिपक्षं सुरभीरनु गवां पृष्ठतः। कर्म्मप्रवचनीययुक्ते द्वितीया । जग्मे गतम् । भावे लिट् ॥ ६४ ॥

विभाणमिति । आयतिमतीं दैर्घ्यवतीं न च वृथा दैर्घ्यमि त्याह। अहर्येति । उपैसरपल्लवग्रहणात्सफलामित्यर्थः । शिरो

बिभ्राणमायतिमतीमवृथा शिरोधिं
प्रत्यग्रतामतिरसामधिकं दधन्ति ।
लोलौष्ठमौष्ट्रकमुदग्रमुखं तरूणा
मभ्रंलिहानि लिलिहे नवपल्लवानि ॥ ६५ ॥

सार्द्धं कथञ्चिदुचितैः पिचुमर्दपत्रै
रास्यान्तरालगतमाम्रदलं म्रदीयः ।
दासेरकः सपदि संवलितं निषादै
र्विप्रं पुरा पतगराडिव निर्जगार ॥ ६६ ॥

धीयतेऽस्यामिति शिरोधिं ग्रीवां । शिरोधिः कन्धरेत्यपीत्यमरः । कर्मण्यधिकरणे चेति किप्रत्ययः । बिभ्राणन्दधानं उदग्रमुखं पल्लवग्रहणार्थमूर्ध्वोत्क्षिप्ततुण्डमौष्ट्रकमुष्ट्रसमूहः । गोत्रोक्षेत्यादिना वुञ् । अतिशयितोरसः स्वादोयस्यान्तामतिरसाम्प्रत्यग्रतामभि नवत्वं दधन्ति दधति । वा नपुंसकस्येति वैकल्पिकोनुमागमः । अभ्रं लिहन्तीत्यभ्रंलिहान्युन्नतराणि । वहाभ्रे लिह इति खश् प्रत्ययः अरुर्द्विषदित्यादिना मुमागमः । तरूणां नवपल्लवानि । पल्लवोऽस्त्री किसलयमित्यमरः । लोलौष्ठं यथा तथा ओत्वोष्ठयोः समासे वेति पररूपं वक्तव्यम् । लिलिहे आस्वादयामास चखा देत्यर्थः ॥ ६५ ॥

सार्द्धमिति । उचितैरभ्यस्तैः । अभ्यस्तेऽप्युचितं न्याय्यमिति यादवः । पिचुमर्दपत्रैर्निम्बदलैः सार्द्धम् । पिचुमर्दश्च निम्ब इत्यमरः । कथञ्चित्प्रमादादास्यान्तरालगतं मुखान्तर्गतं म्रदीयो

स्पष्टं बहिः स्थितवतेऽपि निवेदयन्त
श्चेष्टाविशेषमनुजीविजनाय राज्ञाम् ।
वैतालिकाः स्फुटपदप्रकटार्थमुच्चै
र्भोगावलीः कलगिरोऽवसरेषु पेठुः ॥ ६७ ॥

उन्नम्रताम्रपटमण्डपमण्डितन्त
दानीलनागकुलसङ्कुलमाबभासे ।
सन्ध्यांशुभिन्नघनकर्बुरितान्तरीक्ष
लक्ष्मीविडम्बि शिबिरं शिवकीर्त्तनस्य ॥ ६८ ॥

स्फुटतरमाघ्रदलस्फूतपल्लवं दाशेरकः उष्ट्रः पुरा निषादैः म्लेच्छैः संवलितं विप्रम्पतगराट् गरुत्मानिव निर्जगार उद्गीर्णवान् । पुरा किल कुतश्चित्कारणात् म्लेच्छभक्षणे तैः सहान्तः प्रविश्य गलन्दहन्तं विप्रङ्गरुड उज्जगारेति पौराणिकी कथा चानुसन्धेया ॥ ६६ ॥

स्पष्टमिति । बहिःस्थितवतेऽपि अनुजीविजनाय राज्ञोऽवसरकाङ्क्षिणइति भावः । राज्ञां चेष्टाविशेषन्तत्कालोचितचरित्रविशेषं स्पष्टं निवेदयन्तः तद्बोधकप्रबन्धपाठैरिति भावः । कलगिरो मधुरवाचो वैतालिका मङ्गलपाठकाः अवसरेषु तद्वेलासु स्फुटैः प्रसिद्धैः पदैः प्रकटः प्रकाशोऽर्थोऽभिधेयं यस्मिन् कर्म्मणि तद्यथा तथा उच्चैः भोगावलीः प्रबन्धान् पेठुः पठन्ति स्म । अतएकहल्मध्येनादेशादेर्लिटीत्येत्वाभ्यासलोपौ ॥ ६७ ॥

उन्नम्रेति । उन्नम्रैरुन्नतैस्ताम्रैः धातुरक्तैः पटमण्डपैर्दूष्यैर्मण्डितं आ समन्तान्नीलैर्नागकुलैर्गजसङ्घैः सङ्कुलं अतएव सन्ध्यांशुभिन्नैः सन्ध्यारागसम्भिन्नैर्घनैर्मेघैः कर्बुरितस्य चित्रीकृतस्यान्तरीक्षस्य

धरस्योद्धर्त्तासि त्वमिति ननु सर्व्वत्र जगति
प्रतीतस्तत्किं मामतिभरमधः प्रापिपयिषुः ।
उपालब्धेवोच्चैर्गिरिपतिरिति श्रीपतिमसौ
बलाक्रान्तः क्रीडद्द्विरदमथितोर्वीरुहरवैः ॥६९

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
पञ्चमः सर्गः ॥ ५ ॥

लक्ष्मीं विडम्बयत्यनुकरोतीति तत्तथोक्तं शिवकीर्त्तनस्य मङ्गल कीर्त्तेः कृष्णस्य तच्छिविरकटकमावभासे मनोहरमभूदित्यर्थः । उपमालङ्कारः ॥ ६८ ॥

धरस्येति । बलैः सैन्यैराक्रान्तो गिरिपती रैवतकः क्रीडद्भि र्विहरमाणैर्द्विरदैर्मथितानाम्भग्नानामुर्वीरुहाणां वृक्षाणां रवैः शब्दै र्निमित्तेन श्रीपतिं हरिं । नन्वङ्ग त्वं धरस्य पर्व्वतस्योद्धर्त्ता उद्धारको ऽसीति सर्व्वत्र जगति प्रतीतः प्रसिद्धः गोवर्द्धनोद्धरणादिति भावः । तत्तर्हि किं किमर्थं अतिभरमतिभारवन्तं मामधः प्रापिपयिषुः प्रापयितुमिच्छरसि । प्रापयतेः सन्नन्तादुप्रत्ययः । इत्युच्चैरुपालब्धेव आक्रुचदिवेत्युत्प्रेक्षा । उपाङ्पूर्व्वाल्लभेर्लङ् एकाच उपदेशइति नेट् झषस्तथोर्धोधइति तकारस्य धकारः धि चेति सिचः सकार लोपः । शिखरिणी वृत्तम् । रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणीति लक्षणात् ॥ ६९ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघ काव्यव्याख्याने सर्वङ्कषाख्ये पञ्चमः सर्गः ॥ ५ ॥

अथ रिरंसुममुं युगपद्गिरौ
कृतयथास्वतरुप्रसवश्रिया ।
ऋतुगणेन निषेवितुमादधे
भुवि पदं विपदन्तकृतं सताम् ॥ १ ॥

अथ ऋतुवर्णनमशीतीति । अथेति । अथ सेनानिवेशानन्तरं गिरौ रैवतके रिरंसुं रन्तुमिच्छुं । रमेः सन्नन्तादुप्रत्ययः । एतेन ऋतुवर्णनप्रवृत्तेः प्रभुचित्तवृत्तिज्ञानपूर्व्वकत्वमुक्तम् । सतां साधूनां विपदामन्तं करोतीति विपदन्तकृत् । क्विप् । तं विपदन्तकृतं सेव्य मिति भावः । अमुं हरिं निषेवितुं स्वतरून् स्वस्वनियतवृक्षान् अनतिक्रम्य यथास्वतरु । याथार्थ्येऽव्ययीभावः । यथास्वतरु स्थिता प्रसवश्रीः पुष्पफलसम्पत्तिः यथास्वतरुप्रसवश्रीः । प्रसवस्तु फले पुष्पे इत्यमरः । शाकपार्थिवादिषु द्रष्टव्यः । सा कृता येन तेन कृतयथास्वतरुप्रसवश्रिया यथास्वतरुकृतप्रसवश्रियेत्यर्थः । ऋतुगणेन युगपद्भुवि पदमादधे आश्रितं युगपदृतुगणः प्रादुरभू दित्यर्थः । मन्नवसरं सेवकाः चिपन्तीति भावः । अत्र सर्गो सर्व्वत्र यमकशब्दालङ्कारः । तल्लक्षणं तूक्तं चतुर्थे । अर्था लङ्कारस्तु यथासम्भवमूह्यः । अस्मिन्सर्गे द्रुतविलम्बितं वृत्तम् । द्रुतविलम्बितमाह नभौ भराविति लक्षणात् ॥ १ ॥

अथ लोकवेदयोः प्राथम्येन व्यवहारात् वसन्तमादौ वर्णयति । नवेति । स हरिः पुरोऽग्रे प्रथमं वा नवपलाशानि नूतनपर्णानि पलाशवनानि किंशुककाननानि यस्मिंस्तं नवपलाशपलाशवनं । बहु व्रीहिपूर्व्वपदो बहुव्रीहिः । पलाशः किंशुके पत्रे पलाशमिति विश्वः ।

नवपलाशपलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम् ।
मृदुलतान्तलतान्तमलोकय
त्स सुरभिं सुरभिं सुमनोभरैः ॥ २ ॥
विलुलितालकसंहतिरामृशन्
मृगदृशां श्रमवारि ललाटजम् ।
तनुतरङ्गततिं सरसां दल
त्कुवलयं वलयन्मरुदाववौ ॥ ३ ॥

स्फुटानि विकचानि परागैरजोभिः परागतानि व्याप्तानि च पङ्कजानि यस्मिन् तं स्फुटपरागपरागतपङ्कजं मृदुलाः कोमलाः अतएव तान्ताः आतपसमये किञ्चित् म्लानाः लतान्ताः पल्लवा यस्मिन् तं मृदुलतान्तलतान्तं सुमनोभरैः पुष्पसमृद्धिभिः सुरभिं सुगन्धिं सुरभिं वसन्तमलोकयदपश्यत् । सुरभिश्चम्पके स्वर्णे जातीफलवसन्तयोः । सुगन्धौ च मनोज्ञे च वाच्यवदिति विश्वः । इह प्रतिपादमाद्यमाक्षरद्वयात्परतोऽक्षरत्रयावृत्तिरूपयमकप्रक्रमा चतुर्थपादेऽपि तदेव यमकं । एकस्मादप्यपरमिति सजातीय संसृष्टिः ॥ २ ॥

विलुलितेति । विलुलितालकसंहतिर्विधुतचिकुरनिकरः सन् मृगदृशां ललाटजं श्रमवारि स्वेदमामृशन्परिमृजन्नन्दन्निति भावः । सरसान्तनुतरङ्गततिं दलन्ति विकसन्ति कुवलयानि यस्मिन् कर्मणि तद्यथा तथा वलयन् चालयन् शीतलइति भावः । मरुद्वसन्तवायुराववौ आवाति स्म ॥ ३ ॥

तुलयति स्म विलोचनतारकाः
कुरवकस्तवकव्यतिषङ्गिणि ।
गुणवदाश्रयलब्धगुणोदये
मलिनिमालिनि माधवयोषिताम् ॥ ४ ॥
स्फुटमिवोज्ज्वलकाञ्चनकान्तिभि
र्युतमशोकमशोभत चम्पकैः ।
विरहिणां हृदयस्य भिदाभृतः
कपिशितं पिशितं मदनाग्निना ॥ ५ ॥

तुलयतीति । कुरवकस्तवके व्यतिषङ्गिणि लग्ने अतएव गुणवतः शुक्लगुणस्य कुरवकस्तवकस्याश्रयेणाश्रयणेन लब्धो गुणोदयो निजनीलिमगुणोत्कर्षो येन तस्मिन् धवले नीलस्य स्फुरणादिति भावः । अलिनि भ्रमरे मलिनस्य भावो मलिनिमा कृष्णत्वं माधवयोषितां हरिवधूनां विलोचनानान्तारकाः कनीनिकाः । तारकाक्ष्णः कनीनिकेत्यमरः । तुलयति स्म समीचकार तद्वद्भाविव्यर्थः । तुलाशब्दात्सदृशपर्य्यायात्तत्करोतीति एयन्ताल्लट स्मइति भूते लट् । उपमालङ्कारः ॥ ४ ॥

स्फुटमिति । उज्ज्वलकाञ्चनकान्तिभिः शुद्धसुवर्णप्रभैश्चम्पकैर्युतञ्चम्पकसमूहमध्यगतमित्यर्थः स्फुटं विकचमशोकपुष्पम्भिदा भेदः । षिद्भिदादिभ्योऽङ् । तां बिभर्त्ति यत्तस्य भिदाभृतो भिन्नस्य विरहिणां हृदयस्य हृदयपिण्डस्य सम्बन्धि मदनाग्निना कपिशितं कपिशीकृतम्पिशितं मांसमिवाशोभतेत्युत्प्रेक्षा ॥ ५ ॥

स्मरहुताशनमुर्मुरचूर्णतां
दधुरिवाम्रवणस्य रजःकणाः ।
निपतिताः परितः पथिकव्रजा
नुपरि ते परितेपुरतोऽन्वशम् ॥ ६ ॥

रतिपतिप्रहितेव कृतक्रुधः
प्रियतमेषु वधूरनुनायिका ।
वकुलपुष्परसासवपेशल
ध्वनिरगान्निरगान्मधुपावलिः ॥ ७ ॥

स्मरेति । आम्रवणस्य चूतवनस्य । आम्रश्चूतो रसालोऽसावित्यमरः । प्रनिरन्तः शरेत्यादिना वननकारस्य णत्वम् । रजःकणाः पराग चूर्णाः स्मरहुताशनः कामाग्निः स एव मुर्मुरस्तुषाग्निः । मुर्मुरस्तु तुषानल इति वैजयन्ती । तस्य चूर्णतान्दधुरिवेत्युत्प्रेक्षा । अतो मुर्मुरचूर्णत्वादेव परित उपरि निपतिताः ते रजःकणाः पन्थान गच्छन्तीति पथिकाः । पथः कन्निति कन्प्रत्ययः । तेषां व्रजान् भृशमपरितेपुः परितापयामासुः । अतो मुर्मुरचूर्णत्वोत्प्रेक्षणमिति भावः ॥ ६ ॥

रतिपतीति । प्रियतमेषु विषये कृतक्रुधः कृतरुषः प्रतिघा रुट्क्रुधौ स्त्रियामित्यमरः । वधूरनुनायिकाः कुपित स्त्रीरनुनेष्यन्ती । तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति भवि ष्यदर्थे ण्वुल् प्रत्ययः अकेनोर्भविष्यदाधमर्ण्ययोरिति षष्ठीप्रति षेधाद्वधूरिति द्वितीया । रतिपतिना कामेन प्रहिता प्रेषितेव तद्वाणीश्रवणानन्तरमेव तासां कोपत्यागदर्शनादियमुत्प्रेक्षा ।

प्रियसखीसदृशं प्रतिबोधिताः
किमपि काम्यगिरा परपुष्टया ।
प्रियतमाय वपुर्गुरुमत्सर
च्छिदुरयादुरयाचितमङ्गनाः ॥ ८ ॥
मधुकरैरपवादकरैरिव
स्मृतिभुवः पथिका हरिणा इव ।
कलतया वचसः परिवादिनी
स्वरजिता रजितावशमाययुः ॥ ९ ॥

वकुलपुष्पाणां रसो मकरन्दः स एवासवस्तेन तत्पानेन पेशल ध्वनिर्मधुरस्वरा मधुपावलिः कर्त्री न गच्छतीत्यगा वृक्षान्निरगा न्निर्गता । इणोगा लुङीति गादेशः ॥ ७ ॥

प्रियसखीति । गुरोर्महतो मत्सरस्य द्वेषस्य छिदुरया छेत्र्या । विदिभिदिच्छिदेः कुरच् । काम्यगिरा ग्राह्यवाचा परपुष्टया कोकिलया प्रियसख्या सदृशं यथा तथा किमपि परैर्दुर्बोधं रहस्यं हितं प्रतिबोधिता उपदिष्टा अङ्गनाः प्रियतमाय अयाचितं अप्रार्थितमेव वपुर्निजाङ्गमदुरर्पयामासुः । ददातेर्लुङि गातिस्थे त्यादिना सिचो लुक् । कोकिलाकूजितश्रवणानन्तरमेवाङ्गार्पणा द्वैतसुस्पष्टतुकार्यन्तरङ्गसखेव तथा किमपि बोधिता इत्युत्प्रेक्षा ॥ ८ ॥

मधुकरैरिति । मधुकरैः कर्तृभिः अपवादं मृगवञ्चनाय षष्ट्यादिकुत्सितवाद्यं कुर्वन्तीत्यपवादकराः व्याधास्तैरिव पथिकाः

समभिसृत्य रसादवलम्बितः
प्रमदया कुसुमावचिचीषया ।
अविनमन्न रराज वृथोच्चकै-
रनृतया नृतया वनपादपः ॥ १० ॥

हरिणाइव परिवादिनीस्वररञ्जिता वीणाविशेषध्वनिजयिन्या ॥ सप्तभिः परिवादिनीत्यमरः । जेः क्विपि तुक् । वचसोगीतस्य कलतया माधुर्येण करणेन रञ्जिताआकृष्टाः सन्तइत्यर्थः । रञ्जेर्ण्यन्तात्कर्मणि क्तः रञ्जेर्णौ मृगरमणइति उपधानकार लोपः । इत्थोपमानमृगसादृश्यादौपचारिकं मृगत्वं उप मेयेषु पथिकेष्वस्तीत्यविरोधः स्मृतिभुवः स्मरस्य मृगपातचिन्ता विषयत्वान्मृगग्रहणगर्त्तदेशस्य च वशमाययुः यथा व्याधगाना सक्ता गर्त्ते मृगाः पतन्ति तद्वन्मधुकरझङ्काराकृष्टाः पान्थाः स्मर यारवशमभेजुरित्यर्थः । अनेकैवेमुपमा ॥ ९ ॥

समभिसृत्येति । प्रमदया कर्त्र्या कुसुमानामवचिचीषयावचेतु मिच्छया रिरंसयेति भावः । चिनोतेः सन्नन्तादप्रत्ययादिति स्त्रियामकारप्रत्ययः विभाषाचेरिति विकल्पात्कुत्वाभावः । रसा द्रागात्समभिसृत्य समागत्यावलम्बितो हस्तेन गृहीतस्तथाप्यवि नमन् वशमगच्छन् अतएव वृथोच्चकैर्व्यर्थमुन्नतोवनपादपः न तु नागरिकइति भावः न ऋतेत्यनृता अवत्या तया अनृतया नर्भावे नृता तया नृतया पुंस्त्वेन रराज । नृः पुमांसः पञ्चजनाः पुरुषाः. पूरुषानरइत्यमरः । यः कान्ताकरगृहीतोऽपि न द्रवति स नपुंसकएव लौकिकस्तु पुंस्त्वव्यपदेशोमिथ्यैवेति भावः ॥ १० ॥

इदमपास्य विरागि परागिणी
रलिकदम्बकमम्बुरुहान्ततीः ।
स्तनभरेण जितस्तवकानम
न्नवलते वलतेऽभिमुखं तव ॥ ११ ॥
सुरभिनिश्वसिते दधतस्तृषं
नवसुधामधुरे च तवाधरे ।
अलमलेरिव गन्धरसावमू
मम न सौमनसौ मनसो मुदे ॥ १२ ॥

अथ कश्चित्स्वयङ्ग्रहाश्लेषसुखार्थम्प्रियामलिपातेन भीषयन् त्रिभिः कुलकेनाह । इदमित्यादि । स्तनभरेण साधनेन जिताभ्यां स्तवकाभ्यामानमन्ती नवलता यया सा तथोक्ता तस्याः सम्बुद्धिर्जित स्तवकानमन्नवलते स्तवकानमन्नवलतोपमे इत्यर्थः । अत एवेदं विरागि विरक्तमदलिकदम्बकं परागिणीः परागवतीरिति विरक्ति हेतूक्तिः अम्बुरुहान्ततीरपास्य तवाभिमुखं वलते चलति विशिष्ट लताभ्रमादिति भावः । तथा च भ्रान्तिमदलङ्कारोऽव्यज्यते ॥ ११ ॥

अथालेस्तदभिमुखागमने कारणमाह । सुरभीति । तव सुरभि निश्वसिते निश्वासमारुते नवसुधावन्मधुरे अधरे च तृषं तृष्णान्दधतोदधानस्यालेर्भ्रमरस्य मम्भेवामू उपलभ्यमानौ सुमनसां पुष्पाणां सम्बन्धिनौ सौमनसौ गन्धरसौ सौरभमाधुर्ये मनसोऽन्तः करणस्य मुदे नालं न पर्याप्तौ अतस्त्वदद्नरसगन्धलोभादागच्छती त्यर्थः । नमः स्वस्तीत्यादिना चतुर्थी । अत्र कान्ताकर्तृकस्वयङ्ग्रहाश्लेषसुखार्थिनः प्रियस्य तद्भयहेतोरलेरेवागमनहेतुत्वेनाच

इति गदन्तमनन्तरमङ्गना
भुजयुगोन्नमनोच्चतरस्तनी ।
प्रणयिनं रभसादुदरश्रिया
वलिभयालिभयादिव सस्वजे ॥ १२ ॥

इत्यन्तेन मुखसौरभरसलोभकुसुमसौरभ्ययोर्वर्णयितुमौचित्याद्यम कानुसारेण विप्रकृष्टेनापि सम्बन्धेनैव सम्बन्धस्यान्वयः वलतेऽभि मुखत्व अलिभयादिव सस्वजइत्युपक्रमोपसंहाराभ्यामलेः प्रकृत त्वेनोपमेयत्वावगमात् । अन्यथा मध्ये तद्वैपरीत्ये तद्विरोधादि त्यलमङ्घ्रिचलनाध्वमार्गणेन अत्रोपमानुप्रासयमकानान्तावद्विजा तीयानां संसृष्टिः स्पष्टैव तथा यमकानां त्रयाणां चतुर्थपादादा वेकस्मादक्षरात् द्वाभ्यान्त्रिभ्यश्च परतोऽक्षरत्रयावृत्तिलक्षणानां स्थितत्वात् सजातीयसंसृष्टिश्चेष्टा ॥ १२ ॥

इतीति । इतीत्युक्तवन्तं प्रणयिनं अनन्तरं भुजयुगस्योन्नमनेनो च्चतरावत्युन्नतौ स्तनौ यस्याः सा । स्वाङ्गाच्चोपसर्जनादसंयोगोपधा दिति ङीष् । वलिभया वलयो विद्यन्ते यस्यास्तया वलिमत्या । तुन्दिवलिवटेर्भइति भप्रत्ययः । उदरश्रिया मध्यशोभया उप लक्षिता अङ्गना अलिभयादिव रभसात्सस्वजे आलिलिङ्ग । वस्तुतस्तु रागादेवेति भावः । ष्वञ्ज परिष्वङ्गे इतिधातोः कर्त्तरि लिट् । लज्जामन्मथमध्यस्था मध्येयं नायिका मता ॥ १२ ॥

वदनेति । वदनस्य सौरभे सौगन्ध्ये लोभेन परिभ्रमता भ्रमरेण हेतुना यः सम्भ्रमस्तेन संभृतशोभया सम्पादितश्रिया चलितया अलिसम्भ्रमात् प्रस्थितया अतएवालकैरलकपातैर्लोलदृशा चञ्च

वदनसौरभलोभपरिभ्रम
द्भ्रमरसम्भ्रमसम्भृतशोभया ।
चलितया विदधे कलमेखला
कलकलोऽलकलोलदृशान्यया ॥ १४ ॥
अजगणन् गणशः प्रियमग्रतः
प्रणतमप्यभिमानितया न याः ।
सति मधावभवन्मदनव्यथा
विधुरिमाधुरिताः कुकुरस्त्रियः ॥ १५ ॥

लोलदृशा अन्यया स्त्र्यन्तरेण कलोमेखलायाः कलकलः कोलाहलो विदधे विहितः अलिभयादपसरन्त्याः काञ्चीगुणध्वनिरजनीत्यर्थः । एतेन चकितत्वमुक्तम् । चकितं भयसम्भ्रमः । अनुप्रासयमकयोः सजातीयशब्दालङ्कारयोः संसृष्टिः स्पष्टैव तावत् तथा यमकयोश्च द्वयोः सजातीययोः चतुर्थपादादावेकस्मादक्षरात् द्वाभ्यां च परतो ऽक्षरत्रयावृत्तिलक्षणयोः स्थितत्वात् संसृष्टिः ॥ १४ ॥

अजगणन्निति । याः कुकुरस्त्रियो यादवाङ्गनाः गणशो बहुशः । बह्वल्पार्थाच्छस् कारकादन्यतरस्यामिति शस् प्रत्ययः । अग्रतः प्रणतमपि प्रियञ्जातावेकवचनं प्रियानित्यर्थः । अभिमानिनीनां भावोऽभिमानिता तया । त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः । नाजगणन्नगणयन्ति स्म । गणेरीरादिकाणौ चङि ई च गणइत्यभ्यासस्य पाक्षिकइत्वाभावः । ताः कुकुरस्त्रियो मधौ वसन्ते सति प्रवर्त्तमाने । मधुश्चैत्रे वसन्ते चेति विश्वः । मदनव्याथाविधुरिताः

कुसुमकार्मुककार्मुकसंहित
द्रुतशिलीमुखखण्डितविग्रहाः ।
मरणमप्यपराः प्रतिपेदिरे
किमु मुहुर्मुमुहुर्गतभर्तृकाः ॥ १६ ॥

रुरुदिषा वदनाम्बुरुहश्रियः
सुतनु सत्यमलङ्करणाय ते ।
तदपि सम्प्रति सन्निहिते मधा-
वधिगमं धिगमङ्गलमश्रुणः ॥ १७ ॥

विह्वलिताः सत्यः धुरि अग्रेऽभवन्नवर्त्तन्त स्वयमेव पुरः प्रवृत्ता इत्यर्थः ॥ १५ ॥

कुसुमेति । गतभर्तृकाः वियोगिन्यः । नद्यृतश्चेति कप् । अपराः काश्चिदङ्गनाः कुसुमकार्मुकस्य कामस्य कार्मुके संहितैः द्रुतैर्जवनैः शिलीमुखैः शरैः खण्डितविग्रहाः पाटितशरीराः सत्यो मरणमपि प्रतिपेदिरे मुहुः पुनः पुनः मुमुहुर्मुमूर्छुरिति किमु वक्तव्यमित्यर्थः ॥ १६ ॥

अथ कस्याश्चित्प्रोषितभर्तृकायावन्मुजनसमाश्वासनं विशेषकेणाह । रुरुदिषेति । हे सुतनु शुभाङ्गि । अन्यार्थमद्योर्ह्रस्वइति ह्रस्वत्वं दीर्घोत्तरपदोवङ्गञोहिः अन्यथा गुणः स्यात् । रुरुदिषा रोदनेच्छा अश्रुविमोचनमित्यर्थः । रुदः सन्नन्तादप्रत्यये टाप् । ते तव वदनाम्बुरुहश्रियः अलङ्करणाय सत्यं रम्याणां विकृतिरपि श्रियमातनोतीति न्यायादिति भावः । गम्यमानक्रियापेक्षत्वाच्चतुर्थी । तदपि तथापि सम्प्रति मधौ वसन्ते सन्निहिते सन्निहितोत्सवे सति

त्यजति कष्टमसावचिराद्सून्
विरहवेदनयेत्यघशङ्किभिः ।
प्रियतया गदितास्त्वयि बान्धवै
रवितथावितथाः सखि मा गिरः ॥ १८ ॥

अशुभोऽधिगमम्याश्रिममङ्गलं धिक् । धिङ्निर्भर्त्सननिन्दयोरित्यमरः । धिगुपर्य्यादिषु त्रिष्विति द्वितीया । अतो मा रुदइत्यर्थः ॥ १७ ॥

त्यजतीति । प्रियतया इष्टतया अघशङ्किभिरनर्थोत्प्रेक्षिभिः । प्रेम पश्यति भयान्यपदेऽपीति भावः । बान्धवैस्त्वयि विषये गदिताः उच्चारिताः कष्टं बत असौ बाला विरहवेदनया अचिरादसून् प्राणांस्त्यजति त्यक्ष्यति । वर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट् । इत्येवंविधा गिर उक्तीः हे सखि । विगतन्तथात्वं यासान्ताः वितथाः अनृताः । वितथं त्वनृतं वचइत्यमरः । बहुव्रीहौ विशेष्यलिङ्गता आश्रयणादित्वाद्धस्वः ततो नञ्समासः । अवितथाः सत्याः मा वितथाः मा कृथाः वृथातिशोकेन मा मृषाइत्यर्थः । विपूर्व्वात्तनोतेर्लुङि थास् तनादिभ्यस्तथासोरिति विभाषासिचो लुक् अनुदात्तोपदेशेत्यादिनानुनासिकलोपः न माङ्योगे इत्यडागमप्रतिषेधः ॥ १८ ॥

नेति । किञ्चासौ ते प्रणयी दूरगतोदूरस्थोऽपि मर्हं वसन्तोत्सवं । महउद्धवउत्सवइत्यमरः । नातिवर्त्तते नातिक्रामति खल्विति बन्धुतया बन्धुसमूहेन । ग्रामजनबन्धुसहायेभ्यस्तल् इति तल्प्रत्ययः । उदितैरुक्तैः । वदेः कर्म्मणि क्तः । ऋतैः सत्यवचनैः । सत्यन्तथ्यमृतं सम्यगित्यमरः । बहिः प्रणयिनस्तदैव दैवादागतस्य

न खलु दूरगतोऽप्यतिवर्त्तते
महमसाविति बन्धुतयोदितैः ।
प्रणयिनोनिशमय्य वधूर्वहिः
खरमृतैरमृतैरिव निर्ववौ ॥ १९ ॥

॥ विशेषकम् ॥

मधुरया मधुबोधितमाधवी
मधुसमृद्धिसमेधितमेधया ।
मधुकराङ्गनया मुहुरुन्मद
ध्वनिभृता निभृताक्षरमुज्जगे ॥ २० ॥

प्रियस्य खरं कण्ठगतं शब्दं निशमय्य श्रुत्वा । शमु अदर्शने इति चौरादिकात् ल्यप् मित्त्वाद्ध्रस्वः ल्यपि लघुपूर्व्वादित्ययादेशः । वधूरमृतैः सुधाभिरिव निर्ववौ निर्ववार । वातेर्लिट् । निर्वाणं निर्वृतिः सुखमिति ॥ १९ ॥

मधुरयेति । मधुरया मनोहरया मधुना वसन्तेन बोधिताः विकासितास्ता माधव्यस्ता । पुष्पधर्मः पुष्पितात्वपर्य्यन्ते । तासां माधवीनामतिमुक्तलतानां । अतिमुक्तः पुंड्रकः स्याद्वासन्ती माधवी लतेत्यमरः । मधुसमृद्ध्या मकरन्दसम्पदा समेधितमेधया संवर्द्धित प्रतिभया अतएवोन्मदयतीत्युन्मदोमदकरः । पचाद्यच् । तं ध्वनिं बिभर्त्ति इत्युन्मदध्वनिभृत् तया मधुकराङ्गनया मुहुर्निभृताक्षरं लक्षणया स्थिराक्षरं यथा तथेत्यर्थः । अथवा सर्वः शब्दो वर्णात्मकएव व्यञ्जकविशेषाभावादस्फुटइति मतमाश्रित्योक्तं सर्व्वं पर्य्यायाः क्तवइति । उज्जगे उच्चैर्गीतम् । गायतेरविवक्षित

अरुणिताखिलशैलवना मुहु-
र्विदधती पथिकान्परितापिनः ।
विकचकिंशुकसंहतिरुच्चकै-
रुदवहद्दवहव्यवहश्रियम् ॥ २१ ॥
रवितुरङ्गतनूरुहतुल्यतां
दधति यत्र शिरीषरजोरुचः ।
उपययौ विदधन्नवमल्लिकाः
शुचिरसौ चिरसौरभसम्पदः ॥ २२ ॥

कर्म्मत्वाद्भावे लिट् । बन्धवैषम्यराहित्यं समता पदगुम्फने इति लक्षणात्समताख्यो गुणः ॥ २० ॥

अरुणितेति । अरुणितान्यरुणीकृतानि अखिलानि शैलवनानि यया सा मुहुः पथिकानध्वगान् विरहिणश्च परितापिनः सन्तापवतो विदधती उच्चैरवोच्चकैरुन्नता । अव्ययसर्व्वनाम्नामकच् प्राक् टेरित्यकच् प्रत्ययः । विकचा विकसिता या किंशुकसंहतिः पलाशकुसुमराशिः सा दवहव्यवहश्रियं दवाग्निशोभामुदवहत् । निदर्शनालङ्कारः । इति वसन्तवर्ण्णनम् ॥ २१ ॥

अथ ग्रीष्मवर्ण्णनमारभते । रवीत्यादि । यत्र शुचौ शिरीषरजसां रुचः कान्तयो रवितुरङ्गतनूरुहतुल्यतां सूर्य्याश्वरोमसावर्ण्यं दधति हरिद्वर्णा भवन्तीत्यर्थः । असौ शुचिर्ग्रीष्मः । शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोस्तथा ग्रीष्मे हुतवहेऽपि स्यादिति विश्वः । नवमल्लिकाः । पुष्पे जातीप्रभृतयः स्वलिङ्गा इत्यमरः । पुष्पमूलेषु बहुलमिति बहुलग्रहणात् लुप् लुपि युक्तवद्व्यक्तिवचने

दलितकोमलपाटलकुड्मले
निजवधूश्वसितानुविधायिनि ।
मरुति वाति विलासिभिरुन्मद
भ्रमदलौ मदलौल्यमुपाददे ॥ २३ ॥
निदधिरे दयितोरसि तत्क्षण
स्नपनवारितुषारभृतस्तनाः ।
सरसचन्दनरेणुरनुक्षणं
विचकरे च करेण वरोरुभिः ॥ २४ ॥

भवतः । चिरस्थिरावस्थायिनी सौरभसम्पद्यासान्ताः स्थिरगन्धा इत्यर्थः विदधत्कुर्वन्नुपययौ प्राप्तः ॥ २२ ॥

दलितेति । पाटलायाः अवयवाः पाटलाः । लुक्प्रकरणे पुष्पमूलेषु बहुलमिति बहुलग्रहणाल्लुक् । ते च ते कुड्मलाश्च दलिताविभिन्नाः कोमलाः पाटलकुड्मला येन तस्मिन् निजवधूनां श्वसितं निःश्वासमनुविधत्तेऽनुकरोतीति तथोक्ते तादृशीत्यर्थः उन्मदाभ्रमन्तश्चालयोयस्मिन् तस्मिन् उन्मदभ्रमदलौ मरुति ग्रीष्मानिले वाति वहति सति । वातेर्लटः शत्रादेशः । विलासिभिर्विलसनशीलः कामिभिः । वौ कषलसकत्थस्रम्भ इति घिनुण् प्रत्ययः । मदेन लौल्यञ्चापल्यमुपाददे मत्तैर्जातमित्यर्थः ॥ २३ ॥

निदधिरइति । वरोरुभिः स्त्रीभिः तत्क्षणस्नपनेन सद्यः सेकेन वारितुषारभृतोजलशीकरधारिणइत्यर्थः । तुषारौ हिमशीकराविति शाश्वत. । स्तनादयितोरसि निदधिरे निहिताः तेषां सन्ताप शान्तये स्तनार्द्राङ्गाएव आलिङ्गन्नित्यर्थः । किञ्च करेण पाणिना

स्फुरदधीरतडिन्नयना मुहुः
प्रियमिवागलितोरुपयोधरा।
जलधरावलिरप्रतिपालित
स्वसमयासमयाज्जगतीधरम् ॥ २५ ॥

घरस आर्द्रश्चन्दनरेणुः घृष्टचन्दनपङ्कस्यानुचर्णं विचकरे विकीर्णः। किरतेः कर्मणि लिट् ऋच्छत्यृतामिति गुणः। करेणुकरोरुभिरिति पाठस्तु जङ्घान्तरपदादौपम्यरत्युक्तं प्रसङ्गाद्धेयः। इति ग्रीष्मवर्णनम् ॥ २४ ॥

अथ वर्षावतारमाह। स्फुरदिति। स्फुरन्ती अधीरे चञ्चले तडितौ नयने इव तडिन्नयने यस्याः सा अगलिताअरिक्ता उरू पयोधरा मेघा यस्यां अन्यत्र ऊरू च पयोधरौ च ऊरुपयोधरम्। प्राण्यङ्गत्वाद्द्वन्द्वैकवद्भावः। न गलितं न पतितं यस्यां सा जलधरावलिर्मेघपङ्क्तिः अत्र जलधरावलेः पयोधराणाञ्चावयवावयविभावात् पृथक्निर्देशः। अप्रतिपालितस्वसमया अनपेक्षितनिजवेला सती एकत्र यौगपद्यादन्यत्राधैर्याच्चेति भावः। जगतीधरं रैवतकभूधरमिथमिव समयात् समागच्छत्। यातेर्लिङ्। पयोजगतीशब्दयोः पचाद्यजन्तेन धरशब्देन षष्ठीसमासः। अत्र विशेषणमहिम्ना जलधरावलौ नायिकात्वप्रतीतेः समासोक्तिः सा तु प्रियमिवेत्युपमया,ङ्गेन सङ्कीर्यते ॥ २५ ॥

गजेति। नभसि श्रावणमासे। नभः श्रावणिकश्च सदृत्यमरः। अम्बरे व्योम्नि गजकदम्बकमिव मेचकं श्यामलम्। कालश्यामलमेचकादृत्यमरः। उच्चैरेवोच्चकैरुन्नतं नवाम्बुदं वीक्ष्य अङ्गना

गजकदम्बकमेचकमुच्चकै
र्नभसि वीक्ष्य नवाम्बुदमम्बरे।
अभिससार न वल्लभमङ्गना
न चकमे च कमेकरसं रहः ॥२६॥
अनुययौ विविधोपलकुण्डल
द्युतिवितानकसंवलितांशुकम्।
धृतधनुर्वलयस्य पयोमुचः
शवलिमा वलिमानमुषो वपुः ॥ २७ ॥

एकः एकायनः रसो रागो यस्य तं एकरसं निरन्तररसान्तर मित्यर्थः। कं वल्लभमपि रहः एकान्ते न चकमे न कामयते स्म तथा नाभिससार च सर्व्ववल्लभं सर्व्वापि तत्तदङ्गना चकमे अभिससार चेति। नवाम्बुदस्योद्दीपकत्वातिशयोक्तिः इह कामना पूर्व्वकत्वादभिसरणस्य तयोरर्थक्रमवलीयस्त्वन्यायेन यमकवशा ज्जातपाठक्रमवाधेन योजना व्याख्यैव ॥ २६ ॥

अनुययाविति। धृतधनुर्वलयस्य धृतेन्द्रचापमण्डलस्य पयो मुचो मेघस्य सम्बन्धी शवलस्य भावः शवलिमा विचित्रता। पृथ्वादिभ्य इमनिच्वा। विविधानां नानावर्णानां उपलानां मणीनां ययो स्तयोः कुण्डलयोः द्युतिवितानकेन कान्तिपुञ्जेन संवलितां मिलिता न्यंशुकानि अनीलभासो यस्य तत्तथोक्तम्। शेषाद्विभाषेति कप्प्रत्ययः। वलिमानमुषो वल्यसुराहङ्कारापहरस्य हरेर्वपुरनुययौ। अनुचकार तद्वदभावित्यर्थः। उपमालङ्कारः ॥ २७ ॥

द्रुतसमीरचलैः क्षणलक्षित
व्यवहिता विटपैरिव मञ्जरी।
नवतमालनिभस्य नभस्तरो
रचिररोचिररोचत वारिदैः॥ २८॥

पटलमम्बुमुचां पथिकाङ्गना
सपदि जीवितसंशयमेष्यती।
सनयनाम्बुसखीजनसंभ्रमा
द्विधुरबन्धुरबन्धुरमैक्षत॥ २९॥

द्रुतेति। द्रुतसमीरेण शीघ्रमारुतेन चलैर्वारिदैः क्षणं लक्षिता च व्यवहिता च सा क्षणलक्षितव्यवहिता क्षणिकाविर्भावतिरोधानेत्यर्थः। स्नातानुलिप्तवत्पूर्वकालेत्यादिना समासः। अचिरं रोचिर्यस्याः सा अचिररोचिर्विद्युत् द्रुतसमीरचलैः विटपैः शाखाभिः क्षणलक्षितव्यवहिता नवतमालनिभस्य नवतमालेन सदृशस्य तद्वन्नीलस्येत्यर्थः। नित्यसमासः। नभस्तरुरिव तस्य नभस्तरो मञ्जरी गुच्छ इवारोचत। उपमालङ्कारः। अत्र नभस्तरोर्नभःश्रेष्ठस्येति व्याख्याने तरुशब्दस्य व्याघ्रादिवच्छ्रेष्ठार्थगोचरत्वात्तमालशब्देन विशेषवाचिना तन्नीलसामान्येन पौनरुक्त्यमिति वल्लभः। तमालशब्दस्येन्द्रनीलत्वधर्म्यमात्रोपमानत्वात्तरुशब्दस्य स्वार्थवृत्तित्वेऽपि न पौनरुक्त्यमित्यन्ये॥ २८॥

पटलमिति। पथिकाङ्गना काचित्प्रोषितभर्तृका अतएव सपदि जीवितसंशयं मरणमेष्यती निश्चितमरणेत्यर्थः। आच्छीनद्योर्नुमिति विकल्पान्नुमभावः। अतएव सनयनाम्बोः सबाष्पस्य सखीजनस्य

प्रवसतः सुतरामुदकम्पय
द्विदलकन्दलकम्पनलालितः।
नमयति स्म वनानि मनस्विनी
जनमनोनमनो घनमारुतः ॥ ३० ॥

सम्भ्रमात्क्षोभात् विधुरबन्धुः सम्भ्रमदर्शनात् विक्लवबन्धुजना सती अम्बुमुचामपटलं अबन्धुरमशोभनं सदैन्यरोषमिति यावत। ऐचत। ईचतेर्लङ् आटश्चेति वृद्धिः। इह विरहवेदनाचमा या नायिका सा मरणसाधनमेघपटलावेक्षणवर्णनायां तद्योगलचणा मरणाव स्थोक्ता सा हि द्विविधा तद्योगस्तद्योगस्चेत्याङः। दृङ्मनःसङ्ग सङ्कल्पाजागरः कृशता रतिः। ह्रीत्यागोन्मादमूर्च्छान्ताइत्यनङ्ग दशादशैत्यत्रस्यासङ्गहः ॥ २९ ॥

प्रवसतइति। कन्दली भूकन्दली। द्रोणपर्णी स्निग्धकन्दा कन्दली भूमिकन्दलीति शब्दार्णवः। तस्याः पुष्पाणि कन्दलानि। फले लुगित्यणो लुक्। विदलानां विकचानां कन्दलानां कम्पनेन अवधूननेन लालितः उपकृतः मनस्विनीजनस्य मनसां नमनो नमयिता मानिनीमानभञ्जनइत्यर्थः। कर्त्तरि ल्युट्। घन मारुतो मेघवायुः वनानि नमयति स्म प्रवसतः प्रोषितान् सुतरा मुदकम्पयत् उद्वेजितवान् मनस्विनीमानमर्दनस्य वननमनं प्रोषितकम्पनं वा कियदिति भावः ॥ ३० ॥

जलदेति। निजया आत्मीयया स्वनसम्पदा कृतः समार्ज्जनस्य मार्ज्जनाख्यसंस्कारसहितस्य मर्दलमण्डलस्य ध्वनेर्ययायया सा नयोक्ता मार्ज्जनं नाम मर्द्दलानां ध्वननार्थमालम्बदितास्तः पुष्कर

जलदपङ्क्तिरनर्त्तयदुन्मदं
कलविलापि कलापिकदम्बकम् ।
कृतसमार्ज्जनमर्द्दलमण्डल
ध्वनिजया निजया स्वनसम्पदा ॥ ३१ ॥

नवकदम्बरजोरुणिताम्बरै
रधिपुरन्ध्रि शिलीन्ध्रसुगन्धिभिः ।
मनसि रागवतामनुरागिता
नवनवा वनवायुभिरादधे ॥ ३२ ॥

लपनं । जलदपङ्क्तिरुन्मादमुत्कटमदं कलविलापि मधुरालापि कलापिकदम्बकमयूरवृन्दमनर्त्तयत् ॥ ३१ ॥

नवेति । नवकदम्बरजोभिररुणितमरुणीकृतमम्बरमाकाशं यैस्तैः शिलीन्ध्राणां कन्दलीकुसुमानां यः सुगन्धस्तएषामस्तीति शिलीन्ध्रसुगन्धिनः तैः । गन्धस्येत्वे तदेकान्तग्रहणादिन्प्रत्यया श्रयणम् । कदल्याञ्च शिलीन्ध्रः स्यादिति शब्दार्णवे । वनवायुभिः पुरन्ध्रीषु स्त्रीषु विषये अधिपुरन्ध्रि । विभक्त्यर्थेऽव्ययीभावः । रागवतां कामिनां मनसि नवनवा नवप्रकारा । प्रकारे गुण वचनस्येति द्विर्भावः कर्म्मधारयवद्भावात्सुपोलुक् । अनुरागिता आदधे अनुरागउत्पादितइत्यर्थः ॥ ३२ ॥

शमितेति । अम्बुमुचोमेघाः प्रविरलैरच्छाच्छमविन्दुभिः शमिततापमपोढमहीरजोनिरस्तधूलिकं न तु पङ्किलमिति भावः । सुगन्धि सम्पर्केकादुद्भूतसौरभं । इह तदेकान्तत्वाद्गन्धस्येत्वम् ।

शमिततापमपोढमहीरजः
प्रथमबिन्दुभिरम्बुमुचोऽम्भसाम् ।
प्रविरलैरचलाङ्गनमङ्गना
जनसुगं न सुगन्धि न चक्रिरे ॥ २३ ॥
द्विरददन्तवलक्षमलक्ष्यत
स्फुरितभृङ्गमृगच्छवि केतकम् ।
घनघनौघविघट्टनया दिवः
कृशशिखं शशिखण्डमिव च्युतम् ॥ २४ ॥

अचलाङ्गनं रैवतकाङ्गनम् । अङ्गनमङ्गणाजिर इत्यमरः । अङ्गना जनस्य सुखेन गच्छत्यस्मिन्निति सुगं सुखसञ्चारमित्यर्थः । सुदुरो रधिकरणे इति गमेर्डप्रत्यये टिलोपः । न न चक्रिरे चक्रिरे इत्यर्थः । द्वौ नञौ प्रकृतमर्थं गमयतः ॥ २३ ॥

द्विरदेति । द्विरददन्तवलक्षं गजदन्तधवलम् । वलक्षो धवलोऽर्जुन इत्यमरः । भृङ्गो मृग इव भृङ्गमृगः तस्य छविः सा स्फुरिता यस्मिन् तत्तथोक्तं केतक्याः पुष्पं केतकं । पुष्पमूलेषु बहुलमित्यणो लुक् नादिवृद्धिः लुक् तद्धितलुकीति स्त्रीप्रत्ययस्यापि लुक् । घनघनौघविघट्टनया निविडमेघसङ्घोपघातेन दिवोऽन्तरिक्षात् च्युतं कृशशिखं सूक्ष्माग्रं शशिखण्डमिवालक्ष्यतेत्युत्प्रेक्षा ॥ २४ ॥

दलितेति । दलितमौक्तिकानां निष्पिष्टमुक्ताफलानां चूर्ण इव विपाण्डवोऽतिशुभ्राः स्फुरिताये निर्झराणां शीकराः कणा स्त इव चारवः कुटजपुष्पपरागकणाः स्फुटन्दधिरेणुविडम्बना

दलितमौक्तिकचूर्णविपाण्डवः
स्फुरितनिर्झरशीकरचारवः ।
कुटजपुष्पपरागकणाः स्फुटं
विदधिरे दधिरेणुविडम्बनाम् ॥ ३५ ॥

नवपयःकणकोमलमालती
कुसुमसन्ततिसन्ततसङ्गिभिः ।
प्रचलितोडुनिभैः परिपाण्डिमा
शुभरजोभरजोऽलिभिराददे ॥ ३६ ॥

निजरजः पटवासमिवाकिर
द्धृतपटोपमवारिमुचां दिशाम् ।
प्रियवियुक्तवधूजनचेतसा
मनवनी नवनीपवनावलिः ॥ ३७ ॥

न्दधिचूर्णानुकारं विदधिरे चक्रिरे तद्वद्बभुरित्यर्थः । पूर्वोप मानद्वयानुप्राणितेयमुपमेति सङ्करः ॥ ३५ ॥

नवेति । नवपयःकणवन्नवोदकबिन्दुवत् कोमलानां मालती कुसुमानां जातीपुष्पाणां सन्ततिषु सन्ततसङ्गिभिर्निरन्तरासक्तैः । सुमना मालती जातीत्यमरः । अतएव प्रचलितोडुनिभैः पराग भूषणात्सञ्चरन्नक्षत्रैरिवेत्युत्प्रेक्षा । अलिभिः शुभ्राद्रजोभरा त्परागपुञ्जाज्जातः शुभरजोभरजः परिपाण्डिमा धवलिमा आददे स्वीकृतः ॥ ३६ ॥

निजेति । प्रियवियुक्तवधूजनचेतसां । कर्म्मणि षष्ठी । अनवनी अरक्षणी किन्तु हन्त्रीत्यर्थः । अवतेः कर्त्तरि ल्युटि ङीप् ।

प्रणयकोपभृतोऽपि पराङ्मुखाः
सपदि वारिधरारवभीरवः।
प्रणयिनः परिरब्धुमथाङ्गना
ववलिरे वलिरेचितमध्यमाः॥ ३८॥
विगतरागगुणोऽपि जनो न कः
स्खलति वाति पयोदनभस्वति।
अभिहितेऽलिभिरेवमिवोच्चकै
रननृते ननृते नवपल्लवैः॥ ३९॥

नवनीपवनावलिः नवकदम्बकाननपङ्क्तिः धृताः पटोपमाः पटकल्पा वारिमुचो मेघा याभिस्ताः मेघपटावृता इत्यर्थः। तासां दिशां निजरजः स्वपरागमपटवासं पिधानमिवेत्युत्प्रेक्षा अकिरत् अक्षिपत् सखीवदिति भावः॥ ३७॥

प्रणयेति। प्रणयकोपभृतः अतएव पराङ्मुखा विमुखा अपि। स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति विकल्पादाकारः। सपदि वारिधरारवेभ्यो गर्जितेभ्यो भीरवो भीताः स्त्रिय इति शेषः। अथ अनन्तरं गर्जिताकर्णनानन्तरमेव प्रणयिनः प्रियान्परिरब्धुमालिङ्गितुं वलिरेचितान्यालिङ्गनार्थमङ्गप्रसारणात्त्रिवलिरिक्तीकृतानि मध्यमान्यवलग्नानि यासां ताः सत्यो ववलिरे प्रवृत्ताः। वलतेर्वकारादित्वान्न शसददवादिगुणानामित्येत्वाभ्यासलोपप्रतिषेधः॥ ३८॥

विगतेति। पयोदनभस्वति मेघमारुते वाति वहति सति। वातेर्लटः शत्रादेशः। विगतरागगुणो विरक्तोऽपि को नरो न चलति सर्वोऽपि चलत्येवेत्यर्थः। एवमलिभिरुच्चकैरुच्चैस्तरामभि

अरमयन् भवनादचिरद्युतेः
किल भयादपयातुमनिह्नवः ।
यदुनरेन्द्रगणं तरुणीगणा
स्तमथ मन्मथमन्थरभाषिणः ॥ ४० ॥

ऋतं सत्यं न भवतीत्यनृतं तस्मिन् अनृते असत्यवचने अभिहिते सति नवपल्लवैर्ननृत इव नृत्यं कृतमिवेत्युत्प्रेक्षा । नृतेर्भावे लिट् ॥ ३९ ॥

अरमयन्निति । अचिरद्युतेर्विद्युतो भयात्किल भयादिव न तु तथा किन्तु रागादेवेति भावः । किलेत्यलीके । भवनाद्रमण गृहादपयातुं निर्गन्तुमनिह्नवः भयव्याजात्तत्रैव स्थिता इति भावः । त्रिन्दुरिष्णुरित्युप्रत्ययान्तो निपातः । मन्मथेन मन्थरमलसं भाषन्त इति मन्मथमन्थरभाषिणः कामवशादित्यर्थः तरुणीगणाः तत्कृतं यदव एव नरेन्द्रास्तेषां गणमरमयन् रमयन्ति स्म । अत्र भयेन रागनिगूहनान्मीलनालङ्कारः । मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनमिति लक्षणात् । सोऽप्यागन्तुकेन भयेन सहजरागतिरोधानादागन्तुकेन सहजतिरोधानरूपः ॥ ४० ॥

अथ शरदर्शनमारभते । हरतमिति । रथावयवायुधश्चक्रायुधो हरिरन्तरिताहिमदीधितिस्तिरोहितोष्णांशुर्यया खगकुलाय पक्षिसंघाय कुलायेषु नीडेषु निलीयन्त इति कुलायनिलायिनः । कुलायो नीडमस्त्रियामित्यमरः । तेषां भावस्तत्ता तां हरत अपच्छन्नं पक्षिसंचारप्रतिबन्धमित्यर्थः । नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः । हिमामिति । कर्मणि षष्ठी । अबोधकृतं अबोध

ददतमन्तरिताहिमदीधितिं
खगकुलाय कुलायनिलायिताम्।
जलदकालमबोधकृतं दिशा
मपरथाप रथावयवायुधः ॥ ४१ ॥
स विकचोत्पलचक्षुषमैक्षत
क्षितिभृतोऽङ्कगतां दयितामिव।
शरदमच्छगलद्वसनोपमा
क्षमघनामघनाशनकीर्त्तनः ॥ ४२ ॥

कारिणं मेघावरणेन प्राच्यादिविवेकं लुम्पन्तमित्यर्थः जलदकालं प्रावृट्कालं अपरथा प्रकारान्तरेण आप प्राप। मेघोदयो[पा]धिना प्रावृड्व्यवहारभाजन्तमेव कालं मेघात्ययोपाधिना[न्त]रसंश्रयेणोपलेभे इत्यर्थः कालोहि एकएव सन्ननेकोपाधि[भि]रन्यान्यनामभिर्व्यवह्रियतइति तद्विदः ॥ ४१ ॥

स इति। अघानां नाशनं निवर्त्तनं कीर्त्तनं यस्य सोऽघनाशनकीर्त्तनः स हरिर्विकचमुत्पलमेव चक्षुर्यस्यास्तामच्छं शुभ्रङ्गलत् स्रंसमानं यद्वसनं तदेवोपमा सादृश्यमस्याः क्षमायोग्याघनामेघा यस्यां सा तां अतएव क्षितिभृतोऽङ्कगतामुत्सङ्गगतान्दयितामिवेत्युत्प्रेक्षा। शरदमैक्षत ॥ ४२ ॥

जगतीति। शशीतकरभर्त्सांशुः करैः स्वांशुभिः जगति लोके निशायामभवं नैशं। निशाप्रदोषाभ्याञ्चेति विकल्पादण् प्रत्ययः। तमस्तिमिरमरिवत् द्रावयति स्म निरस्तवानित्यर्थः। द्रुगतौ णौ चङि उपधायाह्रस्वः सन्वद्भावः स्रवतिशृणोतिद्रवति

जगति नैशमशीतकरः करै
वियति वारिदवृन्दमयन्तमः ।
जलजराजिषु नैद्रमदिद्रव
न्न महतामहताः क्व च नारयः ॥ ४३ ॥

समयएव करोति बलाबलं
प्रणिगदन्तइतीव शरीरिणाम् ।
शरदि हंसरवाः परुषीकृत
स्वरमयूरमयूरमणीयताम् ॥ ४४ ॥

स्रवतिप्रवतिच्यवतीनां वेत्यभ्यासस्य विकल्पादित्वं । वियत्याकाशे वारिदवृन्दमयं मेघसङ्घरूपम् । स्वार्थे मयट् । तमः अदिद्रवत जलजराजिषु निद्रामेव नैद्रं निमीलनं तदेव तमः अदिद्रवत् । तथा हि महतां महात्मनां । अरयः क्व च क्व वा न नाहताः अहता न किन्तु सर्व्वत्र हताभवन्तीत्यर्थः द्वितीयनिषेधप्रापितस्य प्रकृतार्थस्य हननस्य तृतीयेन निषेधः पुनः क्वेति कशब्दसामर्थ्यात्प्रकृतार्थपर्य्यवसानम् । वैधर्म्येण सामान्याद्विशेषसमर्थनरूपोऽर्थान्तरन्यासः । ॥ ४३ ॥

समयइति । समयः कालएव शरीरिणां बलाबलं बलाबले । विप्रतिषिद्धं चानधिकरणवाचीति विकल्पात् द्वन्द्वैकवद्भावः । करोतीति प्रणिगदन्तः प्रतिपादयन्तइवेत्युत्प्रेक्षा । नेर्गदनदपतेत्यादिना णत्वं । शरदि हंसरवाः परुषीकृतस्वरानिष्ठुरीकृतमारामयूराद्यस्मिन् कर्म्मणि तत् परुषीकृतस्वरमयूरं यथा तथा रमणीयतामधुः प्रापुः । धातेर्लुङि लुङः शाकटायनस्यैवेति

तनुरुहाणि पुरो विजितध्वनेर्
धवलपक्षविहङ्गमकूजितैः ।
जगलुरक्षमयेव शिखण्डिनः
परिभवोऽरिभवो हि सुदुःसहः ॥ ४५ ॥

निर्जुमादेशः उत्तरपदान्तादिति पररूपं संहितायां प्रलोपे पूर्वस्य दीर्घोऽणः । शरत्प्रावृषोर्हंसमयूरकूजिते माधुर्य्यामाधुर्य्यविपर्य्यय दर्शनात्काल एव प्राणिनां बलाबलनिदानं व्यक्तमभूदित्यर्थः ॥ ४४ ॥

तनुरुहाणीति । पुरोऽग्रे धवलपक्षविहङ्गमाः हंसपक्षिणः । हंसास्तु श्वेतगरुत इत्यमरः । तेषां कूजितैर्विजितध्वनेः शिखण्डिनो मयूरस्य तनौ रुहाणि रूढानि तनुरुहाणि बर्हाणि । रुहे एधत्वक्षणः कप्रत्ययः । अक्षमया हंसकूजितेर्ष्ययेव जगलुर्गलन्ति स्म । कालप्रयुक्तस्य बर्हगलनस्याक्षमाहेतुकत्वमुत्प्रेक्ष्यत इति गुण हेतूत्प्रेक्षा । युक्तञ्चैतदित्याह । अरिभवः परिभवः सुदुःसहः अत्यसह्यो हि । पराजयदुःखितस्याङ्गसादो युज्यत इति भावः । कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः स च उत्प्रेक्षया सङ्कीर्य्यते ॥ ४५ ॥

अनुवनमिति । अनुवनमनुवनं वनवनराजीराजीयलाः सा चासौ नवा च । स्त्रीकुसुम्भं नवेत्यमरः । पुष्पेषु जातीप्रभृतिलतास्वलिकुला । सैवाधरस्तेन चारुणि रम्ये वनराजिरेव वधूस्तस्या मुखमाम्रामः तदेव मुखं वक्त्रमिति श्लिष्टरूपकमस्मिन् हरिणाक्षीणामां विभ्रमइव विभ्रमः शोभा यासान्ताः विकचवाक

अनुवनं वनराजिवधूमुखे
बहुलरागजवाधरचारुणि ।
विकचबाणदलावलयोऽधिकं
रुरुचिरे रुचिरेक्षणविभ्रमाः ॥ ४६ ॥

कनकभङ्गपिशङ्गदलैर्दधे
सरजसारुणकेशरचारुभिः ।
प्रियविमानितमानवतीरुषां
निरसनैरसनैरवृथार्थता ॥ ४७ ॥

दलावलयोनीलझिण्टीपत्रपङ्क्तयः । बाणोऽस्त्री नीलझिण्ट्यां चेति वैजयन्ती । अधिकं रुरुचिरे शुशुभिरे । उपमारूपकयोः सङ्करः ॥ ४६ ॥

कनकेति । कनकभङ्गाः स्वर्णखण्डा इव पिशङ्गानि दलानि येषान्तैः सह रजसा सरजसं सरजस्कादित्यर्थः अत एव । न सरजसमित्यव्ययीभाव इति वामनः । अथ वा महाकविप्रयोगप्राचुर्य्यदर्शनादव्ययीभावदर्शनं प्रायिकमिति पक्षाश्रयणादङभावेऽपि साधुरेव । तथा च सरजसं सरजसा वा ये अरुणकेशराः तैश्चारुभिः तथा प्रियैः विमानिताअवमानितामानवत्योमानिन्यः तासां यारुषोरोषास्तासान्निरसनैर्निरासकैः । असतेः कर्त्तरि ल्युट् । असनैः प्रियकप्रसूनैः । सर्जकासनबन्धूकपुष्पप्रियकजीवका इत्यमरः । अवृथार्थता मानिनिरासकत्वादसनानीत्यन्वर्थनामकत्वं दधे । दधातेः कर्मणि लिट् ॥ ४७

मुखसरोजरुचं मदपाटला
मनुचकार चकोरदृशां यतः ।
धृतनवातपमुत्सुकतामतो
न कमलं कमलम्भयदम्भसि ॥ ४८ ॥

मुखेति । धृतोनवातपो येन तद्धृतनवातपं बालातपताम्रमित्यर्थः अम्भसि कमलं अम्भःस्थं कमलम् । अम्भोग्रहणं स्थलकमलनिवृत्त्यर्थं अस्थानताद्योतनार्थं वा यतो मदपाटला चकोरदृशां स्त्रीणां मुख सरोजरुचं मुखारविन्दशोभामनुचकार । अनुपराभ्यां कृञ इति परस्मैपदनियमः । अतोऽनुकरणाद्धेतोः कम्पुमांसमुत्सुकतां प्रेयसी मुखावलोकनकौतुकितां नालंभयत् नागमयत् सर्वस्यालम्भयदेव तत्स्मारकत्वादित्यर्थः । एतेनौत्सुक्यवस्तुना कार्य्येण कारणभूता कमलदर्शनोत्था मुखस्मृतिर्व्यज्यत इति वस्तुनालङ्कारध्वनिः । एतेन स्त्रीमुखसादृश्यात् कमलं स्वाधारेऽम्भसि पुंस उत्सुकतामलम्भय दिति रङ्गराजव्याख्यानं काकस्य कार्ष्ण्याद्धवलः प्रासाद इति वदसङ्गतं मन्तव्यमिति । अलम्भयदिति लभेर्ण्यन्ताल्लङ् लभेश्चेति नुमागमः लभेश्चाच प्राप्त्युपसर्जनकगत्यर्थत्वाद्गतिबुद्धीत्यादिना अणिकर्त्तुः कर्मत्वे द्विकर्मकता । गत्युपसर्जनकप्राप्त्यर्थत्वे तु वैपरीत्य मित्युक्तं सितं सितिम्नेत्यत्र ॥ ४८ ॥

विगतेति । इषे आश्वयुजमासे । स्यादाश्विन इषोऽप्याश्व युज इत्यमरः । कलमगोपी शालिगोप्त्री सा चासौ वधूश्च कलमगोपवधूः । स्त्रियाः पुंवदित्यादिना पुंवद्भावः । अत आकर्णितस्तया वध्वा ईरितस्य आलापितस्य कोमलगीतकस्य मधुर

विगतसस्यजिघत्समघट्टय
त्कलमगोपवधूर्न मृगव्रजम्।
श्रुततदीरितकोमलगीतक
ध्वनिमिषेऽनिमिषेक्षणमग्रतः ॥ ४९ ॥

कृतमदं निगदन्त इवाकुली
कृतजगत्त्रयमूर्ज्जमतङ्गजम्।
ववुरयुक्छदगुच्छसुगन्धयः
सततगास्ततगानगिरोऽलिभिः ॥ ५० ॥

गानस्य ध्वनिर्येन तं श्रुततदीरितकोमलगीतकध्वनिं अतएवाग्रतोऽपि न निमिषति विस्मयानन्दाभ्यामित्यनिमिषं । इगुपधलक्षणः कप्रत्ययः । तदीक्षणं यस्य तमनिमिषेक्षणम् । घस्तुमत्तुं वेच्छा जिघत्सा । घसेरदादेशाद्वा सन्नन्तादप्रत्ययादिति स्त्रियामप्रत्ययः । विगता सस्यस्य जिघत्सा यस्य तं विगतसस्यजिघत्सं । उपसर्ज्जनाद्ध्रस्वः । मृगव्रजं नाघट्टयत् नाताडयत् सिद्धे साधनाप्रयोगादिति भावः । अत्र दृष्टसाध्ये मृगनिवारणे काकतालीयन्यायेन सुखार्थस्य गानस्य कारणत्वकथनात्समाधिरलङ्कारः । कारणान्तरयोगात् कार्य्यसुकरत्वं समाधिरिति सूत्रात् ॥ ४९ ॥

कृतेति । अयुजो विषमाश्छदा येषान्ते अयुक्छदाः सप्तपर्णास्तेषां गुच्छैः स्तवकैः सुगन्धयः शोभनगन्धा गजमदगन्धिन इति भावः अलिभिर्भृङ्गैः तता विस्तृता गानगिरो येषान्ते अलिभिर्गीयमाना इत्यर्थः । सततङ्गच्छन्तीति सततगाः सदागतयो वायव इति यावत् कृतमदं जनितमदं अतएवाकुलीकृतजगत्त्रयं ऊर्ज्जं

विगतवारिधरावरणाः क्वचि
द्ददृशुरुल्लसितासिलतासिताः ।
क्वचिदिवेन्द्रगजाजिनकञ्चुकाः
शरदि नीरदिनो यदुवेश्मनः ॥ ५१ ॥
विलुलितामनिलैः शरदङ्गना
नवसरोरुहकेशरसम्भवाम् ।
विकरितुं परिहासविधित्सया
हरिवधूरिव धूलिमुदक्षिपत् ॥ ५२ ॥

कार्त्तिकः । बाहुलोर्जौ कार्त्तिकिक इत्यमरः । अत एव मतङ्गज इति रूपकम् । तं निगदन्निव अयमागच्छतीत्यावेदयन्निव ववौ वाति स्म । मत्तमातङ्गगमनेऽप्येवंविधवायुवहनसम्भवादियमुत्प्रेक्षा रूपकं त्वङ्गमस्याः ॥ ५० ॥

विगतेति । शरदि यदुवेश्मानि यादवाः यदुशब्देन रघुशब्दवत् तदपत्य लक्षणा जनपदशब्दानामेव तद्राजस्य बहुष्विति लुक्सम्भवादिति । क्वचिद्विगतवारिधरावरणाः निवृत्तमेघावरणाः अत एवोल्लसिता कोशादुद्धृता असिलतेवासिता तद्वत्सिताः श्यामा इत्युपमा क्वचि न्नीरदिनो मेघवन्तः शुभ्राभ्रपटलच्छन्ना इत्यर्थः अत एवेन्द्रगजाजिनं ऐरावतचर्म तदेव कञ्चुकः कूर्पासको येषां तादृशा इव स्थिता इत्युत्प्रेक्षा । दिशो ददृशुः । उभयालङ्कारयोः संसृष्टिः ॥ ५१ ॥

विलुलितामिति । शरदेवाङ्गनेति रूपकं अनिलैर्विलुलितां विक्षोभितां नवसरोरुहकेशरसम्भवां धूलिं परागं परिहास विधित्सया नर्मरीतिचिकीर्षया । दधातेः सन्नन्तात् स्त्रियामप्रत्यय

हरितपत्रमयीव मरुद्गणैः
स्रगवनद्धमनोरमपल्लवा।
मधुरिपोरभिताम्रमुखी मुदं
दिवि तता विततान शुकावलिः ॥ ५३ ॥

टाप्। हरिवधूः विकरितुं विक्षेप्तुमिव। तुमुन्ण्वुलौ क्रियायां क्रियार्थायामिति तुमुन्प्रत्ययः। उदक्षिपत् प्रेरितवती। रूपकोज्जीवितेयमुत्प्रेक्षा। किरतिरयं कीर्य्यमाणकर्म्मा। यथा रजः किरति मारुतः। क्वचित्तत्कारकोटिस्थकर्म्मा यथाऽत्रैवेति विवेकः ॥ ५२ ॥

हरितेति। अभिताम्रमुखी अरुणमुखी। स्वाङ्गाच्चोपसर्जनादित्यादिना विकल्पात् ङीष्। शुकावलिर्मरुद्गणैः सुमनोगणैर्दिवि तता हरिप्रियार्थमाकाशे वितता हरितानां हरिद्वर्णानां पत्राणां विकारो हरितपत्रमयी। टिड्ढाणञित्यादिना विकल्पात् ङीप्। तथाऽवनद्धाः ग्रथिताः मनोरमाः पल्लवा यस्यां सा स्रगिवेत्युत्प्रेक्षा। मधुरिपोः कृष्णस्य मुदं विततान ॥ ५३ ॥

स्मितेति। स हरिः स्मितानि विकसितानि सरोरुहाण्येव नेत्राणि येषु तानि सरोजलानि यस्यास्तान्तथोक्तामतिसिताङ्गाः धवलपक्षा ये विहङ्गा हंसास्तैर्हसन्ती स्मयमानेव स्थिता चेत्यर्थस्तां तान्तथोक्तां शरैस्तृणविशेषैर्दन्तुराण्युन्नतदन्तानि हासप्रकाशदशनानीति यावत्। दन्त उन्नत उरजित्युरच् प्रत्ययो मत्वर्थीयः। तानि दिङ्मुखानि यस्यां तां शरदन्तुरदिङ्मुखीं शरदं सर्व्वतो मुदिताभिराकलयत् सर्व्वत्र नेत्रविकासादिलिङ्गैर्हृष्टामिवामन्यते

स्मितसरोरुहनेत्रसरोजला-
मतिसिताङ्गविहङ्गहसहिवम् ।
अकलयन्मुदितामिव सर्व्वतः
स शरदं शरदन्तुरदिङ्मुखाम् ॥ ५४ ॥
गजपतिद्वयसीरपि हैमन-
स्तुहिनयन् सरितः पृषतांपतिः ।
सलिलसन्ततिमध्वगयोषिता-
मतनुतामनुतापकृतं दृशां ॥ ५५ ॥

इत्यर्थः । अत्र सरोजहंसशरेषु नेत्रहासदन्तत्वारोपणाद्रूपकाल-ङ्कारः । तद्व शात्प्रतीयमानाङ्गनाभेदाध्यवसायाच्छरदि मुदितलो-केवेति सङ्करः ॥ ५४ ॥

अथ हेमन्तं वर्णयति । गजपतीति । गजपतिः प्रमाणमासा-ङ्गजपतिद्वयसीः महागजप्रमाणाः । प्रमाणे द्वयसच्दघ्नञ्मात्रच् इति प्रमाणार्थे द्वयसच्प्रत्ययः टिड्ढाणञित्यादिना ङीप् । ता अपि सरितस्तुहिनयन् हिमीकुर्व्वन् । तत्करोति ण्यन्ताच्छतृ शत्रादेशः । हेमन्ते भवो हैमनः । सर्व्वत्राण् च तलोपश्चेति हेमन्तशब्दाच्छैषिको ऽण्प्रत्ययः तकारलोपश्च । पृषतां विन्दूनां पतिर्वायुः । पृषन्ति विन्दुपृषताइत्यमरः । अध्वानमलङ्गच्छन्तीत्यध्वगाः पथिकाः अन्ता-त्यन्ताध्वदूरपारसर्व्वानन्तेषु डः । तद्योषितां प्रोषितभर्तृकाणां दृशा-मतनुतापकृतं महासन्तापकारिणीं सलिलसन्ततिं अतनुत । उष्णमश्रूत्पादयामासेत्यर्थः । हेमन्तमारुतो विरहिणीदुःखहेतु-रभूदिति भाव. ॥ ५५ ॥

इदमयुक्तमहो महदेव य
द्वरतनोः स्मरयत्यनिलोऽन्यदा ।
स्मृतसयौवनसोष्मपयोधरा
न्सतुहिनस्तु हिनस्तु वियोगिनः ॥ ५६ ॥

सर्वर्त्तुष्वपि वियोगिनामुद्दीपकत्वाद्धेमन्ते वैशिष्ट्यमाचष्टे । इदमिति । अनिलो वायुरन्यदाऽन्यस्मिन् काले ग्रीष्मादावित्यर्थः । सर्वैकान्येत्यादिना दाप्रत्ययः । वियोगिनो वियुक्तान् । गतिबुद्धीत्यादिना अणिकर्तुः कर्मत्वं । वरतनोर्वरतनुमित्यर्थः । अधीगर्थेत्यादिना कर्मणि शेषे षष्ठी । स्मरयतीति यत् स्मरतेराध्याने मित्त्वाद्ध्रस्वत्वं । इदं स्मारकत्वमपि महदत्यन्तमयुक्तमेव सहकारिविरहादिति भावः । अहो अत्यन्ताकिञ्चित्करत्वाद्विस्मयः । हेमन्ते तु हन्तृत्वमप्यस्य सम्भवतीत्याह । सतुहिनस्तुहिनसहितस्तु सयौवना यौवनयुक्ताः अतएव सोष्माणो ये पयोधराः कुचास्ते स्मृता यैस्तान् स्मृतसयौवनसोष्मपयोधरान् वियोगिनो वियुक्तान् । तथायुक्तं चानीप्सितमिति कर्मत्वम् । हिनस्तु हन्तु । सम्भावनायां लोट् । हेमन्ते हि हिमसहकारात्कुचोष्मैकसाध्यदुःखोत्पादनसामर्थ्याद्वियोगिमारकत्वमपि सम्भाव्यते ग्रीष्मादौ तु तादृक्सहकारिविरहात् स्मारकत्वमप्ययुक्तमित्यर्थः । अमारके मारकत्वसम्बन्धोक्तेरतिशयोक्तिभेदः इह यमकविप्रौढोक्तिसिद्धयोरभेदाध्यवसाय इति रहस्यम् ॥ ५६ ॥

प्रियतमेति । अत्राद्यपर्याये सहसा इति त्रेधा विभागः अन्यत्र सहसेत्येकं पदं सहसा सरोषया यया स्त्रिया कर्त्र्या प्रिय

प्रियतमेन यया सरुषा स्थितं
न सहसा सहसा परिरभ्य तम् ।
श्लथयितुं क्षणमक्षमताङ्गना
न सहसा सहसा कृतवेपथुः ॥ ५७ ॥

भृशमदूयत याधरपल्लव
क्षतिरनावरणा हिममारुतैः ।
दशनरश्मिपटेन च सीत्कृतै
र्निवसितेव सितेन सुनिर्ववौ ॥ ५८ ॥

तमेन सह न स्थितम् । नपुंसके भावे क्तः । सा अङ्गना स्त्री सहसा मार्गशीर्षमासेन । मार्गशीर्षे सहा मार्ग इत्यमरः । कृतवेपथुः जनितकम्पा सती । ट्वितोऽथुजित्यथुच् प्रत्ययः । तं पूर्वमगणितमेव प्रियं हसेन सह वर्त्तत इति सहसा सहासा सती । अथो हसो हासो हास्यं चेत्यमरः । स्वनहसोर्वेति विकल्पादप्प्रत्ययः । सहसा शीघ्रं । स्वरादिपाठादव्ययत्वम् । परिरभ्याश्लिष्य क्षणं क्षणमपीत्यर्थः । अन्यथा वैरं स्यात् । अतएव सामर्थ्यलभ्यार्थत्वादपेरप्रयोगः । श्लथयितुं नाक्षमत शिथिलीकर्त्तुं नोत्सहते स्मेत्यर्थः । मानिनीमानभञ्जनक्षमोऽयं मास इति भावः । कलहान्तरितेयं नायिका । कोपात्कान्तं पराणुद्य पश्चात्ताप समन्वितेति लक्षणात् ॥ ५७ ॥

भृशमिति । अनावरणा आवरणरहिता या अधरपल्लवस्य क्षतिर्व्रणो हिममारुतैर्भृशमदूयत अतप्यत । दूङो दैवादिकात् कर्मणि लङ् । सा क्षतिर्यत्तदोर्नित्यसम्बन्धः । सीत्कृतैः सीत्कारैः

व्रणभृता सुतनोः कलशीत्कृत
स्फुरितदन्तमरीचिमयं दधे।
स्फुटमिवावरणं हिममारुतै
र्मृदुतया दुतयाधरलेखया ॥ ५९ ॥

धृततुषारकणस्य नभस्वत
स्तरुलताङ्गुलितर्जनविभ्रमाः।
पृथु निरन्तरमिष्टभुजान्तरं
वनितयानितया न विषेहिरे ॥ ६० ॥

कर्तृभिः सितेन शुभ्रेण दशनरश्मय एव पटस्तेन करणेन निवसिते वाच्छादितेवेत्युत्प्रेक्षा । वसेराच्छादनार्थात्कर्म्मणि क्तस्येडागमः । सुनिर्ववौ सुष्ठु निर्ववार । शीतालुराच्छाद्यत इति भावः । हिमहताधरनिर्व्राणस्य शीत्कारकारणकस्य दशनरश्मिपटाच्छादने हेतुत्वोत्प्रेक्षणाद्रूपकोत्प्रेक्षयोः सङ्करः ॥ ५८ ॥

उक्तमेवार्थम्भङ्ग्यन्तरेणाह । व्रणेति । मृदुतया मार्द्दवेन हेतुना हिममारुतैर्दुतया पीडितया । टु दूञ् उपतापे इति धातोर्भावादिकात्कर्म्मणि क्तः । व्रणभृता दन्तव्रणवत्या सुतनोः स्त्रियाः अधरो लेखेव तया अधरलेखया कर्त्र्या कलशीत्कृतेन हेतुना स्फुरिताः प्रकाशिता ये दन्तमरीचयस्तन्मयन्तद्रूपं स्फुटमावरणमाच्छादनं दध इव धृतमिवेत्युत्प्रेक्षा । दधातेः कर्म्मणि लिट् ॥ ५९ ॥

धृतेति । धृतास्तुषारकणास्तुहिनशीकरा येन तस्य नभसः पवनस्य सम्बन्धिनः तरवस्ता एवाङ्गुलयस्ताभिस्तर्जनानि तानि

हिमऋतावपि ताः स्म भृशस्विदो
युवतयः सुतरामुपकारिणि ।
प्रकटयत्यनुरागमकृत्रिमं
स्मरमयं रमयन्ति विलासिनः ॥ ६१

तान्येव विभ्रमाः विलासाः पृथुविशालमिष्टस्य दयितस्य भुजान्तरं भुजमध्यं वक्षःस्थलं निरन्तरमनितया अप्राप्तया गाढालिङ्गनमलभमानया इत्यर्थः । इणः कर्त्तरि क्तः । वनितया स्त्रिया न विषेहिरे न सोढाः विरहिण्यस्तर्ज्जिता इव नभस्तोविभ्यतीति भावः ॥ ६० ॥

हिमेति । स्मरमयं स्मरादागतं स्मरप्रयुक्तमित्यर्थः । तत आगतइति मयट् । अकृत्रिममनुरागं सहजं प्रेम प्रकटयति प्रकटीकुर्वाणे तत्कार्य्येण स्वेदेनेति भावः । अतएव सुतरामुपकारिणि पुंसां रिरंसाजननात्तेभ्यः स्वानुरागप्रकाशनाचात्यन्तोपकर्त्तरीत्यर्थः । एवम्भूते हिमऋतौ हेमन्तेऽपि स्वेदसम्भावनारहितकालेऽपीत्यर्थः । सांहितः ऋत्यकइति प्रकृतिभावः । भृशं स्विद्यन्ति रागोष्मणा भृशस्विदइति सात्विकोक्तिः । क्विप् । हेमन्तोऽपि रागिणां स्वेदहेतुरेव तद्धेतुरागहेतुत्वादिति भावः । तास्तथा धीरायुवतयो विलासिनः प्रियान् रमयन्ति स्म हेमन्तस्योद्दीपकत्वादिति पीडाक्षमत्वात् दीर्घरात्रित्वाच्चोभयेच्छासद्भावमरमन्तेत्यर्थः ॥ ६१ ॥

अथ शिशिरं वर्णयति । कुसुमयत्फलित्यादिना । उपवनं वनइत्यर्थः । विभक्त्यर्थेऽव्ययीभावः तृतीयासप्तम्योर्बहुलमिति विकल्पादम्भावः । फलिनीः प्रियङ्गुलताः । प्रियङ्गुः फलिनी फली

कुसुमयन फलिनीरलिनीरवै
र्मदविकाशिभिराहितहुङ्कृतिः ।
उपवनं निरभर्त्सयत प्रियान्
वियुवतीर्युवतीः शिशिरानिलः ॥ ६२ ॥

उपचितेषु परेष्वसमर्थतां
व्रजति कालवशाद्बलवानपि
तपसि मन्दगभस्तिरभीषुमा
न्हि महाहिमहानिकरोऽभवत् ॥ ६३ ॥

त्यमरः । कुसुमयन् कुसुमवतीः कुर्वन् । इत्युद्दीपनसामग्री वर्णनं । कुसुमयतेर्मत्वन्तप्रकृतिकात्तत्करोतीति ण्यन्तात् लटः शत्रादेशः णाविष्टवद्भावे विन्मतोर्लुक् । मदविकाशिभिर्मदेन विजृम्भमाणैरलिनीरवैः भृङ्गीझङ्कारैराहितहुङ्कृतिः कृतहुङ्कारः माधुर्यादुद्दीपकत्वातिशयद्योतनार्थमलिनीति स्त्रीलिङ्गनिर्देशः शिशिरानिलः प्रियान्वियुवतीः कोपादियुञ्जानाः । यौतेः शतरि धातोरुवङादेशः उगितश्चेति ङीप् । युवतीः वधूः यूनस्तिरिति तिप्रत्ययः । निरभर्त्सयत अतर्जयत । तर्जिभर्त्स्योश्चौरादिकयोरनुदात्तत्वादात्मनेपदम् । अत्र वायौ अचेतने चेतनधर्मो निर्भर्त्सनमुत्प्रेक्ष्यते सा चालिनीझङ्कारहुङ्काराज्जीवितेति रूपकसङ्कीर्णा व्यञ्जकाप्रयोगाद्गम्या च ॥ ६२ ॥

उपचितेष्विति । कालवशाद्बलवानपि परेषु शत्रुषु उपचितेषु प्रवृद्धेषु सत्सु असमर्थतां दौर्बल्यं व्रजति । हि यस्मात्तपसि माघमासे । तपामाघे इत्यमरः । मन्दगभस्तिर्मन्दरश्मिरभीषुमा

अभिषिषेणयिषुं भुवनानि यः
स्मरमिवाख्यत लोध्ररजश्चयः ।
क्षुभितसैन्यपरागविपाण्डुर
द्युतिरयं तिरयन्नुदभूद्दिशः ॥ ६४ ॥

मंशुमान् । अभीषुः प्रग्रहे रश्मावित्यमरः । महत उपचितस्य हिमस्य हानिं नाशं करोतीति महाहिमहानिकरस्तद्धेतुर्नाभवत् । कृञो हेत्वित्यादिना हेत्वर्थे टप्रत्ययः । विशेषेण सामान्यसमर्थन रूपोऽर्थान्तरन्यासः ॥ ६२ ॥

अभीति । क्षुभित उद्धूतो यः सैन्यपरागः सेनारजःसदिव विपाण्डुर द्युतिः शुभ्रवर्णः यो लोध्ररजश्चयः भुवनान्यभिषिषेणयिषं सेनया अभियातुमिच्छन्तं । यत्सेनयाभिगमनमरौ तदभिषेणनमित्यमरः । सत्यापपाशेत्यादिना सेनाशब्दात् णिचि सनि सनाशंसभिक्ष उरिति उप्रत्ययः । स्थादिष्वभ्यासेनेति धात्वभ्याससकारयोः षत्वं । स्मरमाख्यतेव ख्यातवानित्युत्प्रेक्षा । चक्षिङः ख्याञ् अस्यतिवक्ति ख्यातिभ्योऽङिति च्लेरङादेशः । अयं लोध्ररजश्चयो दिशः तिरयन् तिरस्कुर्वन् । तिरःशब्दात्करोतीति ण्यन्ताल्लटः शत्रादेशः णाविष्ठवद्भावे टिलोपः । उदभूत् ॥ ६४ ॥

शिशिरेति । शिशिरमासमपास्यापहाय शीतं हरतीति शीतहरस्य । हरतेरनुद्यमनेऽजित्यच् प्रत्ययः । मोऽस्माकमस्य कुचोष्मणः कुचोष्मणः कइव गुणः किम्फलं सम्पाद्यत इति शेषः । गम्यमान क्रियापेक्षया कर्तृनिर्देशः । इवशब्दो वाक्यालङ्कारे इति धियातोऽस्मिन् शिशिरमासे । सार्व्वविभक्तिकस्तसिः । प्रियाः कान्तास्तत्र वो

शिशिरमासमपास्य गुणोऽस्य नः
क इव शीतहरस्य कुचोष्मणः ।
इति धियास्तरुषः परिरेभिरे
घनमतोनमतोऽनुमतान् प्रियाः ॥ ६५ ॥
अधिलवङ्गममी रजसाधिकं
मलिनिताः सुमनोदलतालिनः ।
स्फुटमिति प्रसवेन पुरोहस
त्सपदि कुन्दलता दलतालिनः ॥ ६६ ॥

निरस्तरोषाः सत्योनमतः प्रणतामनुमतान् स्वप्रियान् घनं निबिडं परिरेभिरे आश्लिष्टवत्यः इतिधियेति सुखार्थस्य परिरम्भस्य कुचोष्मसाफल्यार्थत्वमुत्प्रेक्ष्यते व्यञ्जकाप्रयोगाद्गम्यत्वञ्च ॥ ६५ ॥

अधीति । लवङ्गेष्वधिलवङ्गं । विभक्त्यर्थेऽव्ययीभावः । सुमनसां पुष्पाणां दलेषु तालयन्ति प्रतितिष्ठन्ति इति सुमनोदलतालिनः । ताच्छील्ये आभीक्ष्ण्ये वा णिनिः । अमी अलिनो मधुपाः रजसा परागेणार्त्तवेन च अधिकं मलिनाः मलीमसाः पापिनश्च कृताः मलिनिताः इति हेतोः पुरोऽग्रे सपदि कुन्दलता माध्यवल्ली । माघ्यं कुन्दमित्यमरः । दलता विकसता प्रसवेन निजकुसुमेन अहसत्-अहास स्फुटमित्युत्प्रेक्षायां रजस्वलाकुन्तारं क्वाभिनं सपत्न्योपहसन्तीति भावः । कुन्दकुसुमस्य धावल्याद्धासत्वेनो त्प्रेक्षा ॥ ६६ ॥

अतिसुरभिरभाजि पुष्पश्रिया
मतनुतरतयेव सन्तानकः ।
तरुणपरभृतः स्वनं रागिणा
मतनुत रतये वसन्तानकः ॥ ६७ ॥
नोज्झितुं युवतिमाननिरासे
दक्षमिष्टमधुवासरसारम् ।
चूतमालिरलिनामतिरागा
दक्षमिष्ट मधुवासरसारम् ॥ ६८ ॥

अथ यमकविशेषकौतुकितया कविः पुनर्द्वादशभिश्छन्दोभिर्वसन्त न्नाह्वैश्चतुर्भिर्वसन्तं वर्णयति । अतिसुरभिरिति । अतिसुरभि रत्यन्तसुगन्धिः सन्तानकः कल्पवृक्षः पुष्पश्रियां पुष्पसम्पदां अतनुतरतया महत्त्वेन । अतनुशब्दात्तरबन्तात्तल्प्रत्ययः । अभाजीवाभञ्जीवेत्युत्प्रेक्षा । तया भग्न इत्यर्थः । भञ्जेश्च चिणीति विभाषा नलोपे उपधावृद्धिः चिणोलुक् । किञ्च वसन्तस्यानकोवसन्तानकः दुन्दुभिरिति रूपकन्तरुणपरभृतस्तरुणकोकिलो रागिणां कामिनां रतये रागवर्द्धनाय स्वनमतनुत मधुरं चुकूजेत्यर्थः । प्रभा वृत्तम् । स्वरशरविरतिर्ननौ रौ प्रभेति लक्षणात् ॥ ६७ ॥

नोज्झितुमिति । अरमत्यन्तमिष्टेष्वीप्सितेषु मधुषु मकरन्देषु वासे वसतौ रसोरागोयस्याः सा इष्टमधुवासरसा मधुपान प्रियेत्यर्थः अतएवालिनामालिर्भृङ्गश्रेणिर्युवतिमाननिरासे दक्षं कुशलं उद्दीपकत्वादिति भावः । मधुवासरेषु वसन्तदिनेषु सारं श्रेष्ठं मधुवासरसारन्तत्कालसाध्यमित्यर्थः चूतं सहकारं

जगद्वशीकर्त्तुमिमाः स्मरस्य
प्रभावनीके तनवै जयन्तीः
इत्यस्य तेने कदलीर्मधुश्रीः
प्रभावनी केतनवैजयन्तीः ॥ ६९ ॥

अतिरागाद्विलीयाद्युज्झितुं हातुमाचमिष्ट नाचष्टि । चमे र्भौवादिकाल्लुङ् । स्वागता वृत्तम् । स्वागतेति रनभाद्गुरुयुग्ममिति लक्षणात् ॥ ६८ ॥

जगदिति । प्रभावयतीति प्रभावनी नन्द्यादित्वाल्ल्युः । कर्त्तरि ल्युटि ङीप् । मधुश्रीः कर्त्री जगद्वशीकर्त्तुं प्रभौ समर्थे अस्य स्मरस्यानीके सैन्ये जयन्तीर्जित्वरीः केतनवैजयन्तीः ध्वजपताकाः तनवै करवाणि । तनोतेः प्राप्तकाले लेट् टेरेत्वमित्येकारः आडुत्तमस्य पिच्चेति आटि आटश्चेति वृद्धिः । इति मनीषयेति शेषः । इमाः कदलीः रम्भातरून् तेने वितस्तार । कदली वारणवुषा रम्भा मोचांशुमत्फलेत्यमरः । कदलीषु कामवैजयन्तीत्वोत्प्रेक्षा । वृत्तमुपजातिः ॥ ६९ ॥

स्मरतीति । अथतो दृष्ट्वा स्मरेण कामेन निमित्तेन योरागोरमणेच्छा सएव तन्मयी तमिस्रा तमस्तोमः । तमिस्रा तिमिरे रोगे तमिस्रा तु तमस्ततौ । कृष्णपक्षनिशायां चेति विश्वः । रवेर्नेपूर्णस्य वा परितस्तार आवव्रे अहनि रजनीधियमनयामावेत्यर्थः । परिपूर्वात् स्तृणातेर्लिट् । अत्यन्तं सत्यमित्यर्थः । कुतः परितः समन्तात्तारवे उच्चतरध्वनौ कोकिले रुवति कूजति सति इत्युद्दीपकोक्तिः । स्त्री स्त्रियइत्यर्थः । जात्यावेकवचनम् । हिमेति

स्मररागमयी वपुस्तमिस्रा
परितस्तार रवेरसत्यवश्यम्।
प्रियमाप दिवापि कोकिले स्त्री
परितस्ताररवे रसत्यवश्यम्॥ ७०॥
वपुरम्बुविहारहिमं शुचिना
रुचिरं कमनीयतरा गमिता।
रमणेन रमण्यचिरांशुलता
रुचिरङ्कमनीयत रागमिता॥ ७१॥

सप्तम्यर्थेऽव्ययं वशङ्कृतोवश्यः। वशङ्गतइति यत् प्रत्ययः। न वश्यस्त मवश्यमवशङ्गतमपीत्यर्थः प्रियमाप स्वयमभिससारेत्यर्थः। यद्व गणयन्तमपि प्रियन्दिवापि माममवगणय्य निषेधस्तोकस्तु सम गच्छन् तत्सत्यं रागतिमिरतिरोहितमानभानुमण्डलामामिन्यइति रूपकानुप्राणिता प्रियाप्तिक्रियानिमित्ता परिस्तरणक्रियास्वरूपो त्प्रेक्षा अवश्यमिति व्यञ्जकप्रयोगाद्वाच्या। औपच्छन्दसिकं वृत्तम्। विषमे ससजागुरू समे चेत् सभरयाश्छन्दसिकल्पदीपपूर्व्वमिति लक्षणात्॥ ७०॥

अथैकेन ग्रीष्ममाह। वपुरिति। शुचिना ग्रीष्मेण प्रयोजक कर्त्रा अम्बुविहारेण जलक्रीडया हिमं शीतलं अतएव रुचिर मुज्ज्वलं वपुर्देहङ्गमिता प्रापिता। गतिबुद्ध्योत्यादिना अणि कर्त्तुः कर्म्मत्वं। प्रधानकर्म्मण्याख्येये लादीनाहुर्द्विकर्म्मणामिति अभिहितत्वं च। अतएव कमनीयतरा रमणीयतरा अचिरांशु लतेवाचिरांशुलता विद्युल्लता तस्याइवेचिरिव रुचिर्यस्याः सा

मुदमब्दभुवामपां मयूराः
सहसायन्त नदी पपाट लाभे ।
अलिना रमतालिनी शिलीन्ध्रे
सह सायन्तनदीपपाटलाभे ॥ ७२ ॥

अचिरांशुलतारुचिः इत्युपमाद्वयम्तथा रागमनुरागमिता प्राप्ता । इणः कर्त्तरि क्तः । रमणी रमणेन प्रियेणाङ्कमुत्सङ्गमनीयत नीता । नीवह्योरुभयमधिवक्ष्यमाणामिति नयतेर्द्विकर्म्मकता शेषम्पूर्व्ववत् । तोटकं वृत्तम् ॥ ७१ ॥

अथ द्वाभ्यां वर्षर्त्तुं वर्णयति । मुदमित्यादि । अब्दभुवां मेघप्रभवानां अपां लाभे मेघे वर्षति सतीत्यर्थः । सहसा मयूरामुद मानन्दमायन्नालभन्त । अय गतौ लुङि आडजादीनामित्याडा गमे वृद्धिः । नदी पपाट नद्यः प्रावहन्नित्यर्थः । अट पट गतौ लिट् । जातावेकवचनम् । अलिना भृङ्गेण सह सायन्तनः सायम्भवः सायञ्चिरमित्यादिना ट्युप्रत्ययः तुडागमश्च । स चासौ दीपश्च तद्वत्पाटलाभे पाटलप्रभे । इत्युपमालङ्कारः । तस्मिन् शिलीन्ध्रे कन्दलीकुसुमे अलिनी अरमत । अत्र मयूरमोदप्राप्त्याद्यनेक कर्त्तृकक्रियायौगपद्यात्किन्नाधिकरणक्रियासमुच्चयरूपः समुच्चया लङ्कारभेदः । गुणक्रियायौगपद्यं समुच्चय इति सामान्यलक्षणम् औपच्छन्दसिकं वृत्तम् ॥ ७२ ॥

कुटजानीति । शिखरीन्द्रं समया रैवतकाद्रेः समीपे । अभितः परितः समयेत्यादिना द्वितीया । अवनौ प्रदेशे घनमदाभ्रमरा येषु तानि घनमदभ्रमराणि कुटजानि कुटजकुसुमानि सवीज्य

कुटजानि वीक्ष्य शिखिभिः शिखरीन्द्रं
समयावनौ घनमदभ्रमराणि ।
गगनं च गीतनिनदस्य गिरोच्चैः
समया वनौघनमदभ्रमराणि ॥ ७३ ॥

अभीष्टमासाद्य चिराय काले
समुद्धृताशं कमनी चकाशे ।
योषिन्मनोजन्मसुखोदयेषु
समुद्धृताशङ्कमनीचकाशे ॥ ७४ ॥

पयःपूरेण नमन्त्यभ्राणि मेघा यस्मिन् तत् वनौघनमदभ्रम् । पयः कीलालममृतं जीवनं भुवनं वनमित्यमरः । गगनञ्च वीक्ष्य शिखिभिर्मयूरैर्गीतनिनदस्य गानध्वनेः समया तुल्यया । तुल्यार्थैरित्यादिना वैकल्पिकी षष्ठी । गिरा वाचा केकयेत्यर्थः । उच्चैः रराणि रणितं । रण शब्दे भावे लुङ् चिणो लुक् । कुटजा वृत्तम् । सजसाभवेदिह सगौ कुटजाख्यमिति लक्षणात् ॥ ७३ ॥

अथ त्रिभिः शरदं वर्णयति । अभीष्टमित्यादि । कामयत इति कमनी कामयित्री । कमः कामयिताभीकः कमनः कामनोऽभिक इत्यमरः । कमेः कर्त्तरि युचि ङीप् । योषित् । जातावेकवचनम् । अनीचा उन्नताः काशाश्चबाला यस्मिन् अनीचकाशे काले शरदीत्यर्थः । मनोजन्मसुखोदयेषु कामसुखाविर्भावेषु धृता आशा अभिलाषो येन तं अभीष्टं प्रियं चिराय चिरकालेन । चिराय चिररात्रायेत्यमरः । सम्यगुद्धृता उत्कृष्टा आशङ्का पक्षोपायो यस्मिन् कर्मणि तत्समुद्धृताशङ्कं विस्रब्धं यथा तथा आसाद्य

स्तनयोः समयेन याङ्गनाना
मभिनद्धारसमा न सा रसेन ।
परिरम्भरुचिं ततिर्जलाना
मभिनद्धा रसमानसारसेन ॥ ७५ ॥

प्राप्य मुदा सह वर्त्तत इति समुत् सानन्दा सती चकाशे विललासे त्यर्थः । अत्र समुचकाश इति योषितः प्रियप्राप्तिनिमित्तहर्षाख्य भावनिबन्धनात्प्रेयोऽलङ्कारः । रसभावतदाभासतत्प्रशमानां निबन्धे रसवत्प्रेयऊर्ज्जस्विसमाहितानीति लक्षणात् । वृत्तमुप जातिः ॥ ७४ ॥

स्तनयोरिति । रसमानाः कूजनशीलाः । ताच्छील्यवयोवचन शक्तिषु चानशिति ताच्छील्ये चानश् प्रत्ययः । रसतेः परस्मैपदित्वा न्न शानच् प्रत्ययः । ते सारसाः पक्षिविशेषाः यस्मिन् तेन रसमान सारसेन समयेन शरत्कालेनेत्यर्थः सारसानां तत्रैव सम्भवात् । सारसोमैथुनी कामी गोनर्द्दः पुष्कराक्षय इति यादवः । अङ्गनानां स्तनयोर्या जलानां ततिः शारदोष्मजन्मा स्वेदोदबिन्दु सन्दोहः अभितोनद्धाभिनद्धा । नह्यतेरभिपूर्व्वात्कर्म्मणि क्तः नहोध इति धत्वं । हारसमा मुक्ताहारतुल्या कुचमण्डलमण्डनाय मानेति भावः सा जलानां ततिः रसेन रागेण हेतुना बलीयसेति भावः परिरम्भरुचिमालिङ्गनेच्छां नाभिनत् न बिभेद । शारद स्वेदस्याप्यलङ्कारतया उद्दीपकत्वाजुगुप्सितत्वाभिःसपत्नशृङ्गारां विजयन्त इत्यर्थः । अत एव रसनिबन्धनाद्रसवदलङ्कारः । लक्षण मुक्तं पूर्व्वश्लोके । औपच्छन्दसिकं वृत्तम् ॥ ७५ ॥

जातप्रीतिर्या मधुरेणानुवनान्तं
कामे कान्ते सारसिका काकुरुतेन ।
तत्सम्पर्कम्प्राप्य पुरा मोहनलीलां
कामेकान्ते सा रसिका का कुरुते न ॥ ७६ ॥

कान्ताजनेन रहसि प्रसभं गृहीत
केशे रते स्मरसहासवतोषितेन ।
प्रेम्णा मनःसु रजनीष्वपि हैमनीषु
के शेरते स्म रसहासवतोषितेन ॥ ७७ ॥

जातेति । या स्त्री अनुवनान्तम् । विभक्त्यर्थेऽव्ययीभावः । मधुरेण श्राव्येण सारसिकाकाकुरुतेन सारसा एव सारसिकाः सारसाङ्गनाः । कात्पूर्व्वस्येत्वम् । तासां काकुरुतेन विकलशब्देन । काकुः स्त्रियां विकारोयः शोकभीत्यादिभिर्ध्वनेरित्यमरः । काकुश्च तद्रुतञ्च तेन । कामे कामकल्पे । सिंहोदेवदत्तइतिवद्गौणप्रयोगः । कान्ते प्रिये जातप्रीतिः जातस्नेहा अभूत् । रसिका रसवती राग वतीत्यर्थः । अतइनिठनाविति ठन्प्रत्ययः । सा का स्त्री एकान्ते रहसि तस्य कान्तस्य सम्पर्कम्प्राप्य पुरा पुरुषप्रेरणात्पूर्व्वमेव कां मोहनलीलां सुरतक्रीडां न कुरुते सर्व्वापि स्त्री सर्व्वानपि सुरत विशेषान् कामतन्त्रप्रसिद्धान् विस्रब्धञ्चकारेत्यर्थः । तेन शृङ्गारस्य परा काष्ठाप्राप्तेत्युक्तम् । मत्तमयूरं वृत्तम् ॥ ७६ ॥

अथैकेन हेमन्तमाह । कान्तेति । सहतइति सहः । पचाद्यच् । स्मरस्य सहः कामोद्दीपकइत्यर्थः । तेनासवेन तोषितः तेन स्मरसहासवतोषितेन अतएव रसहासावस्य स्तइति रसहास

गतवतामिव विस्मयमुच्चकै
रसकलामलपल्लवलीलया ।
मधुकृतामसकृद्गिरमावली
रसकलामलपल्लवलीलया ॥ ७८ ॥

वता रागशास्त्रवता अतएव प्रेम्णा मनस्सु पुंसां चित्तेषु उषितेन वसता । वसतेः कर्त्तरि क्तः वसतिक्षुधोरिडितीडागमः । गति बुद्धीत्यादिसूत्रे चकाराद्वर्त्तमानार्थता । कान्तेन जनस्तेन कान्ता जनेन । जातावेकवचनम् । प्रसभं रहसि बलाद्गृहीतकेशे आकृष्ट शिरोरुहे रते सुरते हेमन्ते भवाहेमन्त्यस्तासु हैमनीषु अपि द्राघीयसीष्वपीति भावः । सर्वत्राण् च तलोपश्चेति हेमन्तशब्दा दण्प्रत्ययः तकारलोपश्च टिड्ढाणञित्यादिना ङीप् । रजनीषु के युवानः शेरते स्म स्वपन्ति स्म न केऽपीत्यर्थः । लट् स्मे इति भूते लट् । एतेनातिभूमिङ्गतः शृङ्गार इति व्यज्यते । वसन्त तिलका वृत्तम् ॥ ७७ ॥

अथैकेन शिशिरं वर्णयति । गतवतामिति । अमकलामल पल्लवलीलया असकला असमग्रकिकाशिनोऽमला निर्मलाश्च ये पल्लवास्तेषां लीला तया नृत्यरूपयेत्यर्थः विस्मयकृतवतामिव स्थितानामिवेत्युत्प्रेक्षा मधुकृतां मधुकराणां सम्बन्धिनी लवलीषु लताविशेषेषु लयोलयनं स्थितिर्यस्याः सा लवलीलया आवलिः पङ्क्तिः रसकलां रसेन मध्वास्वादेन कलामव्यक्तमधुराम् । ध्वनौ तु मधुरास्फुटे कल इत्यमरः । गिरं वाचमसकृद्भूयरलपत् । मधुमदहेतुकस्य मधुकरालापस्य पल्लवलीलया जनितविस्मय

कुर्वन्तमित्यतिभरेण नगानवाचः
पुष्पैर्विराममलिनां च न गानवाचः ।
श्रीमान्समस्तमनुसानु गिराविहर्त्तुं
बिभ्रत्यचोदि स मयूरगिराविहर्त्तुम् ॥ ५ ॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
ऋतुवर्णनं नाम षष्ठः सर्गः ॥ ६ ॥

हेतुफलमुत्प्रेक्ष्यत इति गुणहेतूत्प्रेक्षा । द्रुतविलम्बितं वृत्तम् ॥ ७८ ॥

कुर्वन्तमिति । इतीत्थं पुष्पैरेवातिभरेण महाभरेण नम्रत्वेन वा गौरवेण नगान्वृक्षानवाचः नीचानवाङ्मुखानित्यर्थः । अवाचीनानवाग्भागानित्यर्थः । अग्रेरवपूर्व्वा इत्विगित्यादिना क्विन्प्रत्ययः । कुर्व्वन्तमलिनां गानवाचो गीतध्वनेर्झङ्कारस्य च न विराममविराममसमाप्तिं कुर्व्वन्तं समस्तान्सर्व्वानृतून् अनुसानु सानुष्वित्यर्थः । विभक्त्यर्थेऽव्ययीभावः । बिभ्रति बिभ्राणे इह गिरौ रैवतकाद्रौ विहर्त्तुं क्रीडितुं श्रीमान्स हरिः मयूरगिरा केकया अचोदि प्रेरितः । भगवन्निह विहर ऋतुगणमनुगृहाणेति प्रार्थित इवेत्युत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । वृत्तमुक्तम् ॥ ७९ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये षष्ठः सर्गः ॥ ६ ॥

अनुगिरमृतुभिर्वितायमानाम्
अथ स विलोकयितुं वनान्तलक्ष्मीम्
निरगमदभिराद्धुमादृतानां
भवति महत्सु न निष्फलः प्रयासः ॥ १ ॥

इत्थं ऋतुगणप्रादुर्भावमभिधाय तत्फलतया भगवतः सानुचरस्य वनविहारलीलावर्णनमारभते। अनुगिरमिति । अथर्त्तुप्रादुर्भावानन्तरं स हरिः गिराविव्यनुगिरं। विभक्त्यर्थेऽव्ययीभावः। गिरेश्च सेनकस्येति समासान्तः। ऋतुभिर्वितायमानां वितन्यमानां । तनोतेः कर्म्मणि लटः शानजादेशः। तनोतेर्यकीति वैभाषिकआकारादेशः। वनान्तलक्ष्मीं विलोकयितु निरगमत् निर्गतः। पुषादीत्यादिना गमेर्लुङि च्लेरङादेशः। ऋतुगणभक्तिं स्वीकर्त्तुमिति भावः। तथाहि। अभिराद्धुमाराधयितुमादृतानामादरं कुर्व्वतामास्थावतामित्यर्थः। कर्त्तरि क्तः। प्रयासः सेवायासः महत्सु विषये निष्फलोन भवति न हि भक्तानुकम्पिनोमहान्तस्तांस्तेषां व्यर्थयन्तीति भावः। अतोहरेरपृतुगणानुग्रहणार्थे निर्गमोयुक्तइति। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः। सामान्यविशेषकार्य्यकारणभावाभ्यां निर्द्दिष्टप्रकृतार्थसमर्थनादर्थान्तरन्यासइति सर्व्वस्वसूत्रम्। अत्र सर्गे पुष्पिताग्रा वृत्तम्। अयुजि नयुगरेफतोयकारोयुजि च नजौ जरगाश्च पुष्पिताग्रेति लक्षणात् ॥ १ ॥

दधतीति। यदवोयादवाः। व्याख्यातं चैतत्। बह्वीर्बह्वः बहुविधा इत्यर्थः। बह्वादिभ्यश्चेति विकल्पादीकारः। सुमनसः पुष्पाणि। स्त्रियः सुमनसः पुष्पमित्यमरः। दधति दधन्ति। वा नपुंसकस्येति

दधति सुमनसो वनानि बह्वी-
र्युवतियुता यदवः प्रयातुमीषुः ।
मनसिशयमहास्त्रमन्यथामी
न कुसुमपञ्चकमप्यलं विसोढुम् ॥ २ ॥
अवसरमधिगम्य तं हरन्त्यो
हृदयमयत्नकृतोज्ज्वलस्वरूपाः ।
अवनिषु पदमङ्गनास्तदानीं
न्यदधत विभ्रमसम्पदोऽङ्गनासु ॥ ३ ॥

अभ्यस्तादृतुर्वैकल्पिको नुम्प्रतिषेधः । वनानि युवतियुताः स्त्रीसमेताः एव प्रयातुमीषुरिच्छन्ति स्म । अत्र हेतुमाह । अन्यथा युवतिजनाभावे अमी यदवो मनसि शेते इति मनसिशयः कामः । अधिकरणे शेतेरित्यच्प्रत्ययः हलदन्तात्सप्तम्याः संज्ञायामित्यलुक् । तस्य महास्त्रभूतं कुसुमपञ्चकमपि पञ्चापि कुसुमानीत्यर्थः । पञ्चानां सङ्घः पञ्चकं । सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययनेष्विति कप्रत्ययः । विसोढुं नालं न शक्ताः । सकलसुमनसां सामर्थ्ये तथा रविन्दादीनामेव पञ्चबाणवाचकप्रमाणसिद्धत्वादिति भावः । अतो युवतिभिः सह प्रयाणं युक्तमिति वाक्यार्थेन वाक्यार्थसमर्थनाद्वाक्यार्थसमर्थनरूपकाव्यलिङ्गमलङ्कारः । अरविन्दमशोकञ्च चूतञ्च नवमल्लिका नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः ॥ २ ॥

अवसरमिति । तमवसरं सहगमनावसरं अधिगम्य हृदयं हरन्त्यो हृदयङ्गमा भवन्त्यः सर्वं हि प्रार्थ्यमानमेव प्रियं भवतीत्यर्थः यत्नेन कृतं न भवतीत्ययत्नकृतं तथाप्युज्ज्वलं स्वरूपं

नखरुचिरचितेन्द्रचापलेखं
ललितगतेषु गतागतं दधाना ।
मुखरितवलयं पृथौ नितम्बे
भुजलतिका मुहुरस्खलत्तरुण्याः ॥ ४ ॥

यासां ताः स्वभावसुन्दरमूर्त्तय इत्यर्थः अङ्गनास्तदानीं तस्मिन्नवसरे अवनिषु पदं न्यदधत निहितवत्यः पादचारेणैव चेलुरित्यर्थः । दधातेर्लङ्यात्मनेपदेष्वनत इति झस्यादादेशः । अङ्गनासु विभ्रमसम्पदो विलाससम्पदः पदं न्यदधत तदानीं विलासाः प्रवृत्ता इत्यर्थः । अत्राङ्गनानां विलाससम्पदां चोभयोना मपि प्रकृतानामेव हृदयहरणादिना वर्णनासाम्येनौपम्यस्य गम्यमानत्वात्केवलप्रकृतविषया तुल्ययोगितालङ्कारः । वाच्यभेदेनाप्यङ्गनाविलाससम्पदामुत्तरोत्तरस्य पूर्वपूर्वविशेषकत्वावगमादेकावलीभेदो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः ॥ ३ ॥

न्यदधत विभ्रमसम्पदोऽङ्गनास्वित्युक्तं तामेव प्रपञ्चयति । नखेति । ललितगतेषु मन्दगमनेषु नखानां रुचिभिः प्रभाभिः रचिता इन्द्रचापलेखा यस्मिन् कर्मणि तद्यथा तथा गतागतं यातायाते । विप्रतिषिद्धं चानधिकरणवाचीति वैभाषिको द्वन्द्वैकवद्भावः । दधाना तरुण्याः भुजलतिका मुखराः कृता इति मुखरिताः ध्वनिता वलया यस्मिन् कर्मणि तद्यथा तथा । कटको वलयोऽस्त्रियामित्यमरः । पृथौ नितम्बे मुहुरस्खलत् चचाल । अत्र नखरुचीत्यालम्बनगुण उक्तः । गतागतं दधाना अस्खलदिति तच्चेष्टा । मुखरितवलयमिति तदलङ्कृतिः । तटस्थास्तु कालमाद्यः

अतिशयपरिणाहवान् वितेने
बहुतरमर्पितरत्नकिङ्किणीकः ।
अलघुनि जघनस्थलेऽपरस्या
ध्वनिमधिकं कलमेखलाकलापः ॥ ५ ॥
गुरुनिविडनितम्बबिम्बभारा
क्रमणनिपीडितमङ्गनाजनस्य ।
चरणयुगमसुस्रुवत्पदेषु
स्वरसमसक्तमलक्तकच्छलेन ॥ ६ ॥

अन्यत्र विस्तारतइति चतुर्विधोऽप्युद्दीपनक्रम उक्तः । उक्तञ्च आलम्बनगुणाश्चैव तच्चेष्टा तदलङ्कृतिः । तटस्थाश्चेति विज्ञेयाः चतुर्धोद्दीपनक्रमइति । तत्रालम्बनं रसस्य समवायिकारणं नायिका नायकस्य । तद्गुणा रूपलावण्यादिः । तच्चेष्टा भावहावादिः अन्यत्तु गमम् । एवमुत्तरत्रापि ॥ ४ ॥

अतिशयेति । अतिशयेन परिणाहवानतिविशालइत्यर्थः । अन्यथा तज्जघनस्यापर्य्याप्तेरिति भावः । परिणाहोविशालतेत्यमरः । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । बहुतरमर्पितान्याहिता रत्नानां किङ्किण्योयस्मिन्सः । नद्यृतश्चेति कप्प्रत्ययः । कलोमधुरारावो मेखलाकलापोऽपरस्याः स्त्रियः अलघुनि जघनस्थले अधिकं ध्वनिं वितेने । तदलङ्कृतिरियम् ॥ ५ ॥

गुर्विति । गुरु गुरुत्वगुणयुक्तं निविडं दृढं च यन्नितम्बबिम्बन्तदेव भारस्तस्याः क्रमणेनाधिष्ठानेन निपीडितं निष्पीडितं अङ्गनाजनस्य चरणयुगं कर्तृ पदेषु पादन्यासस्थानेषु अलक्तकच्छलेन

तव सपदि समीपमानये ता-
महमिति तस्य मयाग्रतोऽभ्यधायि ।
अतिरभसकृतालघुप्रतिज्ञा-
मनृतगिरं गुणगौरि मा कृथा माम् ॥७॥

सान्तरमनिमेषं सरसं सद्रवमेव । गुणो रागे द्रवे रस इत्यमरः । अश्रान्तमविच्छिन्नं यथा तथा असुस्रवत् स्रवति स्म । स्रवतेः चर पार्थाल्लुङि णिश्रीत्यादिना चङि धातोरुवङादेशः । द्रवद्रव्यकर्तृक एवायमकर्मकः अन्यकर्तृकत्वे तु सकर्मकः । अत्रालक्तकच्छलेनेत्यलक्तापह्नवेन स्वरसत्वारोपाच्छलादिशब्दैरसत्यत्वप्रतिपादनरूपोऽपह्नवालङ्कारः ॥ ६ ॥

अथ कस्याश्चित्सख्याः कुपितनायिकानुनयवचनं पञ्चभिः कुलकेनाह । तवेत्यादि । तां मत्सखीं सपदि तव समीपमहमानये आनयिष्यामि । भविष्यत्सामीप्ये वर्त्तमानप्रत्ययः कर्त्तृरभिप्राये आत्मनेपदं । इति मया तस्याग्रतोऽभ्यधायि अभिहितं । दधातेः कर्मणि लुङ् आतो युक् चिण्कृतोरिति युगागमः । हे गुणगौरि गुणैः सौभाग्यदाक्षिण्यादिभिर्गौरि पार्वतीति रूपकम् अतिरभसेनातित्वरया कृता अलघुर्महती प्रतिज्ञा त्वदानयनार्था यया तां मामनृतगिरमसत्यवाचं मा कृथाः मा कार्षीः मद्वचनं सर्वथा कर्त्तव्यमित्यर्थः । करोतेः लुङि थास् न माङ्योगे इत्यडागमप्रतिषेधः ॥ ७ ॥

ननु मत्प्रतिज्ञापि दुस्त्याज्येति विप्रतिषेधमाशङ्क्याह । न चेति । हे सुतनु शुभाङ्गि । दीर्घान्तोत्तरपदात्सम्बुद्धिः अन्यथा नद्यः

न च सुतनु न वेद्मि यन्महीया-

नसुनिरसस्तव निश्चयः परेण ।

वितथयति न जातु मद्वचोऽसा-

विति च तथापि सखीषु मेऽभिमानः ॥८॥

सततमनभिभाषणं मया ते

परिपणितं भवतीमनानयन्त्या ।

त्वयि तदिति विरोधनिश्चितायां

भवति भवत्वसुहृज्जनः सकामः ॥ ९ ॥

स्यात् । अहं न वेद्मीति न किन्तु वेद्म्येवेत्यर्थः । किं तद्वेद्मीत्यत आह । महीयान्महत्तरस्तव निश्चयः त्वदनैक्ये प्रतिज्ञापरेण जनान्तरेण सुनिरसः सुखमोच्यः । अस्यतेः खल्प्रत्ययः । स न भवतीत्यसुनिरस इति यत् तदित्यर्थलभ्यं । उद्देश्येन विधेयाक्षेपा यच्छब्दस्योत्तरवाक्यस्थत्वाच्च न पूर्ववाक्ये तच्छब्दप्रयोग इति निबन्धः । तथापि विदितत्वेऽपि असौ मत्सखी जातु कदाचिदपि मद्वचनं वितथयति नानृतीकरोतीति सखीषु मध्ये मेऽभिमानः स्वप्रतिज्ञाभङ्गेऽपि मत्प्रतिज्ञामेव पालयतीत्यहङ्काराभिःसङ्गमति ज्ञातमित्यर्थः ॥ ८ ॥

सततमिति । भवतीं त्वामनानयन्त्या आनयितुमशक्नुवत्या इत्यर्थः । मया सततं सदा ते तव । कर्मणि षष्ठी । अनभिभाषणमसंभाषणं परिपणितं । भवतीति भातेर्डवतुरित्यौणादिको डवतुप्रत्ययः उगितश्चेति ङीप् । तस्याः सम्बुद्धिर्हे भवति सुभगे त्वयि तदिति तदसम्भाषणमस्तु इति विरोधनिश्चितायां

गतधृतिरवलम्बितुं वनान्त-
ननलमनालपनादहं भवत्याः।
प्रणयिनि यदि न प्रसादबुद्धि-
र्भव मम मानिनि जीविते दयालुः ॥ १० ॥

निश्चितविरोधायां सत्यां । वाञ्छितार्थ्यादिष्विति विकल्पान्निष्ठायाः परनिपातः । असुहृज्जनो विपक्षवर्गः सकामः फलितमनोरथो भवतु भवेत्। प्राप्तकाले लोट्। अस्मद्विरोधकाङ्क्षिणामयमानन्दकालः प्राप्त इत्यर्थः ॥ ९ ॥

न केवलमावयोर्विरोधः प्राणहानिरपि मम स्यादित्याह। गतेति । गतधृतिरधीरो ऽहं भवत्यास्तवानालपनादसम्भाषणादालपनं विहायेत्यर्थः। ल्यब्लोपे पञ्चमी । असून् प्राणानवलम्बितुं धारयितुमनलमशक्तः । अलम्भूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः । वनेति खेदे अतएव हे मानिनि प्रणयिनि प्रिये प्रसादबुद्धिरनुग्रहबुद्धिर्न यदि नास्ति चेत्तथापि मम जीविते दयालुर्भव। स्पृहीत्यादिना आलुच् प्रत्ययः । स धूर्त्तोऽपि मत्प्राणत्राणार्थमनुयात्य इति भावः ॥ १० ॥

प्रियमिति । इतीत्थं नितान्तमागसोऽन्यासङ्गापराधस्य स्मरणेन सरोषे अतएव कषाये लोहिते कृते कषायिते आयते चाक्षिणी यस्याः सा तथोक्ता । निर्यासे च कषायोऽथ सौरभे लोहितेऽप्यवदिति विश्वः । वनिता नायिका चरणगतायाः पूर्वोक्तवाक्यान्ते प्रणतायाः सख्यावचसोऽनुरोधादनुसरणात्किल । किलेत्यपरमार्थे । वस्तुतस्तु अनुरागादेवेति भावः । प्रियं कथमपि

प्रियमिति वनिता नितान्तमागः
स्मरणसरोषकषायितायताक्षी ।
चरणगतसखीवचोऽनुरोधात्
किल कथमप्यनुकूलयाञ्चकार ॥ ११ ॥
द्रुतपदमिति मा वयस्य यासी-
र्ननु सुतनुं परिपालयानुयान्तीम् ।
न हि न विदितखेदमेतदीय-
स्तनजघनोद्वहने तवापि चेतः ॥ १२ ॥

कथञ्चिदनुकूलयाञ्चकार अभिमुखीचकार अनुजग्राहेत्यर्थः । एषा खण्डिता नायिका । ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता इति दशरूपकलक्षणात् । अत एव कविना आगःस्मरणसरोषकषायिताक्षीत्युक्तं । एषा चामर्षावेगचिन्ताखेदाद्यभिचाराद्यनुभाववती ॥ ११ ॥

अथ काचित्सखी कञ्चिदग्रे शीघ्रगामिनं युवानमाह । द्रुतेति । हे वयस्य सखे इतीत्थं द्रुतपदं शीघ्रपदक्रमं यथा तथा मा यासीः मा गमः । यातेर्लुङि न माङ्योगे इत्यट्प्रतिषेधः । अनुयान्तीमनुगच्छन्तीं सुतनुं सुभाङ्गीं प्रियामनुपालय प्रतीक्षस्व । असावपि शीघ्रमायातु तत्राह । न हीति । तव चेतोऽपि एतदीयस्तनजघनोद्वहने विदितखेदमनुभूतखेदं चेति न किन्तु वेत्त्येवेत्यर्थः । अतः कथं शीघ्रमायास्यतीति भावः । सम्भाव्यनिषेधनिवर्तने द्वौ प्रतिषेधाविति वामनः ॥ १२ ॥

इति वदति सखीजनेऽनुरागा-
द्दयिततमामपरश्चिरं प्रतीक्ष्य ।
तदनुगमवशादनायतानि
न्यधित मिमान इवावनिम्पदानि ॥ १३ ॥
यदि मयि लघिमानमागतायां
स्तव धृतिरस्ति गतास्मि सम्भ्रमोऽयम् ।
अनिभृतपदपातमापपात
प्रियमिति कोपपदेन कापि सख्या ॥ १४ ॥

इतीति । सखीजने इति वदति सति अपरः कश्चिद्दयिततमाम् अनुरागात् स्नेहाच्चिरं प्रतीक्ष्य तदनुगमवशात् तस्याः प्रियायाः कर्त्र्याः अनुगमः पश्चाद्गमनं तस्य वशादवनौ भुवि मिमानः मातुं कुर्वाण इवेत्युत्प्रेक्षा । माङो लटः कर्त्तरि शानजादेशः श्लाविति द्विर्भावः । अनायतान्यनन्तरालानि पदानि न्यधित निहितवान् । धाञो लुङि तङ् स्थाघ्वोरिच्चेतीकारः सिचः कित्त्वान्न गुणः ह्रस्वादङ्गादिति सकारलोपः । एषा च नायिका स्वाधीनपतिका । स्वाधीनपतिका सा तु या न मुञ्चति वल्लभमिति लक्षणात् । चेष्टा चेयम् ॥ १३ ॥

अथ काचित्परः प्रयातप्रियमेलनाय शीघ्रानुधावनं प्रार्थयमानां सखीमाह । यदीति । हे सखि मयि लघिमानमागतायां स्वयङ्गमनेन लाघवं प्राप्तायां तव धृतिरस्ति यदि सन्तोषो भवति चेत् । धृतिः सन्तोषधैर्ययोरित्यमरः । इयमेतदवस्थैव सम्प्रत्यस्मि अथ

अविरलपुलकः सह ब्रजन्त्याः
प्रतिपदमेकतरः स्तनस्तरुण्याः ।
घटितविघटितः प्रियस्य वक्ष
स्तटभुवि कन्दुकविभ्रमं बभार ॥ १५ ॥

एव गतास्मि इति वदन्तीति शेषः । इतिना गम्यमानार्थत्वादप्रयोगः अन्यथा पौनरुक्त्यादित्यालङ्कारिकाः । सख्या सह कोपपदेन कोपव्याजेन वस्तुतस्तु रागादेवेति भावः व्याजोऽपदेशो लक्ष्यञ्च निमित्तं व्यञ्जनम्पदमिति चामरः। काचिन्नायिका द्रुततराः शीघ्रतराः पदपाताः पादन्यासा यस्मिन् कर्म्मणि तद्यथा तथा प्रियं वल्लभ मापपात अनुधावति स्म । एषा च स्वयमप्रवृत्ता स्वलाघवशङ्कितया पूर्व्वं निर्व्वासितप्रिया अथेदानीं स्वयम्प्रवृत्तेः पश्चात्तप्ता चेति गम्यते । अतः कलहान्तरिता । कोपात्कान्तं परानुद्य पश्चात्तापसमन्वितेति लक्षणात् ॥ १४ ॥

अविरलेति । सह ब्रजन्त्याः पार्श्वमाश्रित्य गच्छन्त्यादित्यर्थः तरुण्याः सम्बन्धी अविरलपुलकः प्रियाङ्गसङ्गमात्सान्द्ररोमाञ्चः एकतरोऽन्यतरः द्वयोरन्यः सन्निकृष्टइति भावः । एकाच प्राचामिति द्वयोरेकस्य निर्द्धारणे तरच् प्रत्ययः । स्तनः प्रियस्य वक्षस्तट मिव तस्य भूः प्रदेशस्तस्यां वक्षस्तटभुवि प्रतिपदं घटितविघटितः संयुक्तवियुक्तः पतितोत्पतितः सन्निति यावत् । विशेषणयोरपि मिथोगुणप्रधानभावविवक्षया विशेषणं विशेष्येण बहुलमिति समासः । कन्दुकविभ्रमङ्गेन्दुकशोभाम् । गेन्दुकः कन्दुकस्त्यमरः । बभार । अन्यविभ्रमस्यान्यसम्बन्धायोगात्सादृश्याक्षेपे निदर्शना । एष।

अशिथिलमपरावसज्य कण्ठे
दृढपरिरब्धबृहद्बहिस्तनेन ।
हृषिततनुरुहा भुजेन भर्त्तु
र्मृदु मृदु व्यतिविद्धमेकबाहुम् ॥ १६ ॥
मुहुरसुसममाघ्नती नितान्तं
प्रणदितकाञ्चि नितम्बमण्डलेन ।
विषमितपृथुहारयष्टि तिर्य्य
क्कुचमितरा न्तदुरःस्थले निपीड्य ॥ १७ ॥

च प्रियपार्श्वगामिनी । इतः प्रभृति मदनरसेत्यतः प्राग्वक्ष्यमाणाः षट् नायिकाः स्वाधीनपतिकाः इष्टाः प्रगल्भा सेत्यनुसन्धेयम् ॥ १५ ॥

अथापरस्याश्च परकृति विशेषं विशेषकेणाह । अशिथिलमित्यादि । अपरा स्त्री दृढं परिरब्धौ गृहीतौ बृहद्बहिस्तनौ येन तेन हृषिता न्युदञ्चितानि तनुरुहि रोमाणि यस्य तेन पुलकितेनेत्यर्थः । क्तान्तोत्तरपदो बहुव्रीहिः हृषेर्लोमस्वितीडागमः । भजेन भर्त्तुः वामबाहुना मृदु गाढं यथा तथा व्यतिविद्धं व्यतिषञ्जितं मृदु कोमलमेकबाहुं निजदक्षिणबाहुं भर्त्तुः कण्ठे अशिथिलं दृढम वसज्यासज्य जगामेति भाविना सम्बध्यते ॥ १६ ॥

मुहुरिति । पुनः किं कृत्वा नितम्बमण्डलेन करणेन नितान्तमति शयेन प्रणदिता प्रकर्षेण नदन्ती काञ्ची यस्मिन् कर्म्मणि तद्यथा तथा । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । मुहुरसुसमं प्राणसममाघ्नती ताडयन्ती । हन्तेराङ्पूर्व्वात् शतः शचादेशे ङीप् सकर्म्म कत्वात् न आङो यमहन इत्यात्मनेपदम् । विषमिता विषमीकृता

गुरुतरकलनूपुरानुनादं
सललितनर्त्तितवामपादपद्मा ।
इतरदनतिलोलमादधाना
पदमथ मन्मथमन्थरं जगाम ॥ १८ ॥

॥ विशेषकम् ॥

लघुललितपदन्तदंसपीठ
द्वयनिहितोभयपाणिपल्लवान्या ।
सकठिनकुचचूचुकप्रणोदं
प्रियमबला सविलासमन्वियाय ॥ १९ ॥

पृथुहारयष्टिर्यस्मिन् कर्म्मणि तद्यथा तथा इतरं पूर्व्वश्लोकोक्तवक्षःस्तनादन्यन्दक्षिणमित्यर्थः कुचन्तस्य भर्त्तुरुरःस्थले तिर्यक् निपीड्य पूर्व्ववत्सम्बन्धः ॥ १७ ॥

गुरुतरेति । पुनर्गुरुतरः सान्द्रतरः कलोमधुरश्च नूपुरस्यानुनादोध्वनिर्यस्मिन् कर्म्मणि तद्यथा तथा सललितं सलीलं नर्त्तितं व्यापारितं वामं सव्यम्पादपद्मं यया सा इतरद्दक्षिणम्पदमनतिलोलमर्द्धचरणस्खलनादनतिचपलं यथा तथा आदधाना निक्षिपन्ती सती मन्मथेन मन्थरमलसञ्जगाम । एषा च पार्श्वगामिनी ॥ १८ ॥

अथान्यासामप्येकैकेन गतिविशेषमाह । लघ्वित्यादि अन्या अबला स्त्री तस्य प्रियस्यांसौ पीठे इव तयोर्द्वये निहितावुभौ पाणिपल्लवौ यया सा सती । उभादुदात्तोनित्यमिति यदुक्तस्तेन प्रयोजनं वृत्तिविषये उभशब्दस्य प्रयोगोमाभूत् उभयशब्दस्यैव

जघनमलघुपीवरोरु कृच्छ्रा-
दुरुनिविरीसनितम्बभारखेदि ।
दयिततमशिरोधरावलम्बि-
स्वभुजलताविभवेन काचिदूहे ॥ २० ॥
अनुवपुरपरेण बाहुमूल-
प्रहितभुजाकलितस्तनेन निन्ये ।
निहितदशनवाससा कपोले
विषमवितीर्णपदं बलादिवान्या ॥ २१ ॥

यथा स्यादित्युभयत्रेत्यादि भवतीति । लघनी द्रुते ललिते च पदे यस्मिन् कर्मणि तद्यथा तथा कठिनाभ्यां कुचचूचुकाभ्यां स्तनाग्राभ्यां यः प्रणोदोऽभिपीडनस्तेन सह यथा तथा । चूचुकन्तु कुचाग्रं स्यादित्यमरः । तेन सहेत्यादिना समासे वोपसर्जनस्येति सहशब्दस्य सभावः णोपदेशत्वात्प्रणोदइति णत्वं । सविलासं च प्रियमन्वियायानुजगाम । एषा पृष्ठगामिनी ॥ १९ ॥

जघनमिति । काचित् स्त्री अलघु गुरु पीवरौ पीनौ चारू यस्य तत् उरुर्महान् निविरीसोनिविडः । निविडं निविरीसं च दृढं गाढं प्रचक्षते इति वैजयन्ती । नेर्विड्ज्विरीसचाविति निशब्दादिरीसच् प्रत्ययः । स च योनितम्बः स्त्रीकटिपश्चाद्भागः । पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरइत्यमरः । सएव भारस्तेन खिद्यतइति तथोक्तम् । आभीक्ष्ण्ये णिनिः । जघनं कटीपुरोभागं दयिततमस्य शिरोधरायां ग्रीवायामवलम्बिन्योर्लम्बमानयोः स्वभुजलतयोर्विभवेन सामर्थ्येन कृच्छ्रादूहे उवाह ।

अनुवनमसितभ्रुवः सखीभिः
सह पदवीमपरः पुरोगतायाः ।
उरसि सरसरागपादलेखा
प्रतिमतयानुययावसंशयानः ॥ २२ ॥

वचेः स्वरितेत्त्वात्कर्त्रभिप्रायआत्मनेपदम् । इयञ्च पृष्ठगामिनी प्रियकण्ठ:बलम्बा ॥ २० ॥

अनुवपुरिति । अन्या स्त्री वपुषः पश्चादनुवपु: स्त्रीपृष्ठभागः । अव्ययं विभक्तीत्यादिना पश्चादर्थेऽव्ययीभावः । बाहुमूलयोः स्तोकचयोः प्रहितावधःप्रसारितौ भुजौ ताभ्यां आकलितस्तनेन गृहीतस्तनेन कपोले निहितदशनवाससा न्यस्ताधरेण किञ्चिदा वृत्तमुख्याः सत्याः कपोलं चुम्बतेत्यर्थः अपरेण कामिना विषम स्थिताङ्घ्रिसङ्घर्षात् श्लिष्टं वितीर्णपदं न्यस्ताङ्घ्रि यथा तथा बला दिव निन्ये नीता आरोप्य नीयमानेव गमयाञ्चक्रइत्यर्थः । एषा पुरोगामिनी ॥ २१ ॥

अनुवनमिति । अपरः कामी अनुवनं वनं प्रति सखीभिः सह पुरोगतायाः असितभ्रुवः स्वकान्तायाः पदवीमुरसि वक्षसि सरस आर्द्रः रागोलाक्षारञ्जनं यस्य तस्य पादस्य या रेखा विन्यासः सा प्रतिमा उपमानं यस्याः सा तत्प्रतिमा तस्य भावस्तत्ता तया तत्सदृशत येत्यर्थः असंशयानोऽसन्दिहानः । शीङोलटः कर्त्तरि शानजा देशः । अनुययौ । अत्र पादरेखाप्रतिमतयेति सादृश्यवस्तुना सुरत कालीनं पादताडनं वस्तु सरागपदार्थमहिम्ना प्रतीयतइति परगतः स्वतःसिद्धार्थशक्तिमूलोवस्तुध्वनिः संलक्ष्यक्रमध्वनिभेदः ॥ २२ ॥

मदनरसमहौघपूर्णनाभी
ह्रदपरिवाहितरोमराजयस्ताः ।
सरित इव सविभ्रमप्रयात
प्रणदितहंसकभूषणा विरेजुः ॥ २३ ॥
श्रुतिपथमधुराणि सारसाना
मनुनदि शुश्रुविरे रुतानि ताभिः ।
विदधति जनतामनःशरव्य
व्यधपटुमन्मथचापनादशङ्काम् ॥ २४॥

मदनेति । मदनस्य रसः शृङ्गारः अन्यत्र रसोजलं तस्य महौघेन महापूरेण पूर्णा नाभ्य एव ह्रदास्तेषां परिवाहाः कृताः परिवाहिताजलोच्छ्वासीकृताः रोमराजयो यासान्ताः । जलोच्छ्वासाः परीवाहाइत्यमरः । सरिज्जलानि ह्रदानापूर्य्य परितः उच्छ्वस न्तीति प्रसिद्धिः । सविभ्रमैः सविलासैः प्रयातैः प्रकृष्टगमनैः प्रणदिताः शिञ्जिताः ये हंसकाः पादकटकाः । हंसकाः पाद कटकाइत्यमरः । अन्यत्र हंसाएव हंसकाः मरालास्तएव भूषणानि यासान्ताः स्त्रियः सरितइव विरेजुः । मदनरसपूर्णेत्यनेन नाभीनां तदुद्बोधकत्वं व्यज्यते । परिवाहितरोमराजयइति रोम राजीनां परिवाहत्वरूपणान्नाभ्यएव ह्रदाइति रूपकाश्रयणन्ताः सरितएवेति श्लिष्टविशेषणेयमुपमाक्षेप एवेत्यन्ये ॥ २३ ॥

श्रुतिपथेति । अनुनदि नदीनां समीपे । समीपार्थेऽव्ययीभावः । अव्ययीभावश्चेति नपुंसकत्वे ह्रस्वत्वम् । ताभिः स्त्रीभिः जनानां समूहोजनता । ग्रामजनेत्यादिना सामूहिकस्तल् प्रत्ययः । तस्याः

मधुमथनवधूरिवाह्वयन्ति
भ्रमरकुलानि जगुर्यदुत्सुकानि ।
तदभिनयमिवावलिर्वनाना-
मतनुत नूतनपल्लवाङ्गुलीभिः ॥ २५ ॥

मनांसि एव शरव्यं लक्ष्यम् । लक्ष्यं शरव्यं चेत्यमरः । तस्य व्यधः वेधः। व्यधजपोरनुपसर्गे इत्यप्प्रत्ययः । तत्र पटुः समर्थो यो मन्मथचापनादः सइति शङ्कां भ्रमं विदधति विदधानानि । वा नपुंसकस्येति वैकल्पिको नुम्प्रतिषेधः । अतिपथमधुराणि श्राव्याणीत्यर्थः सारसानां रुतानि शुश्रुविरे श्रुतानि । सारसरुतश्रवणान्मन्मथोद्दीपनमासीदित्यर्थः । अत्र सारसरुते मन्मथचापनादभ्रमाद्भ्रान्तिमदलङ्कारः । कविसम्मतसादृश्याद्विषयेऽपिहितात्मनि । आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मतः इति लक्षणात् ॥ २४ ॥

मध्विति । उत्सुकान्युन्मनांसि भ्रमरकुलानि मधुमथनस्य हरेर्वधूराह्वयन्त्याकारयन्तीवेत्युत्प्रेक्षा। हूतिराकारणाह्वानमित्यमरः। अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्त्ताः इति ... जगुरिति यत् । गायतेर्लिट् । वनानामावलिर्नूतनपल्लवा एवाङ्गुल्यइत्येकदेशविवर्त्तिसावयवरूपकम् अत्रैव वनावली नर्त्तकीरूपगमकला दिति ।· ताभिस्तदभिनयं व्यञ्जकचेष्टामतनुतेव । व्यञ्जकाभिनयौ समावित्यमरः । अङ्गैरालम्बयेद्गीतं हस्तेनार्थं प्रदर्शयेदिति वचनात् । गीतार्थस्याह्वानस्य व्यञ्जनमङ्गुलिभिरकार्षीदिवेति क्रियास्वरूपोत्प्रेक्षा । पूर्वोक्तरूपकानुप्राणिता साह्वानोत्प्रेक्षासापेक्षेति सजातीयसङ्करोऽपीति ॥ २५ ॥

असकलकलिकाकुलीकृतालि
स्खलनविकीर्णविकासिकेशराणाम्।
मरुदवनिरुहां रजोवधूभ्यः
समुपहरन् विचकार कोरकाणि ॥ २६ ॥

असकलेति । मरुद्वनानिलः असकलाअसमग्राः अर्द्धविकचा इत्यर्थः ताभिः कलिकाभिः कोरकैराकुलीकृतानां संक्षोभितानामलिनां स्खलनेन विघट्टनेन विकीर्णा विक्षिप्ताः विकासिनः केशराः किञ्जल्का येषान्तेषामवनिरुहां । क्विप् । रजः परागं वधूभ्यः समुपहरन् प्रयच्छन् यथा कश्चित्कामीति भावः । धनमर्जयन्वसतीतिवत् लक्षणहेत्वोः क्रियाया इति हेत्वर्थे शतृप्रत्ययः। कोरकाणि कुड्मलानि । कलिका कोरकः पुमानित्यमरकोषे पुंस्त्वाभिधानं प्रायिकाभिप्रायम् । कोरकं कुड्मलेऽपि स्यात्कक्कोलक मृणालयोरिति विश्वप्रकाशादौ नपुंसकत्वस्याभिधानात्। विचकार विकाशयामासेत्यर्थः । विपूर्व्वात्किरतेः करोतेर्वा लिट् । अत्र कोरकविकाशकारणस्य समुपहरन्निति हेत्वर्थेन वधूसम्प्रदानकपरागोपहरणार्थत्वावगमात्फलोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या ॥ २६ ॥

उपवनेति । वने उपवनं । विभक्त्यर्थेऽव्ययीभावः । तत्र यः पवनस्तस्यानुपातेनानुसारेण दक्षैर्विचक्षणैरलिभिर्यद्यतः कारणात् अङ्गनाजनस्य सम्बन्धी परिमलो गन्धविशेषः। विमर्दोत्थे परिमलो गन्धे जनमनोहरे इत्यमरः। स एव विषयो भोग्यार्थः। रूपं स्पर्शो गन्धरसशब्दाश्च विषया अमी इति । अलम्भि लब्धः। लभेः कर्म्मणि लुङ् विभाषाचिणमुलोरिति विकल्पान्नुमागमः उपधाया

उपवनपवनानुपातदक्षै
रलिभिरलाभि यदङ्गनागणस्य।
परिमलविषयस्तदुन्नताना
मनुगमने खलु सम्पदोऽग्रतःस्थाः ॥२७॥
रथचरणधराङ्गनाकराब्ज
व्यतिकरसम्पदुपात्तसौमनस्याः।
जगति सुमनसस्तदादि नूनं
दधति परिस्फुटमर्थतोऽभिधानम् ॥ २८ ॥

इति वृद्धिः। तस्मादुन्नतानां महतामनुगमने पश्चाद्धावने अनुवृत्तौ च सम्पदोऽग्रतःस्थाः पुरोवर्त्तिन्यः खलु। सुपि स्थ इति कप्रत्ययः। अत्रानुगमनयोर्द्वयोरभेदाध्यवसायात् श्लेषोत्थापितातिशयोक्त्यनुप्राणितोऽयमर्थान्तरन्यासः सामान्येन विशेषसमर्थनरूपः ॥ २७ ॥

रथेति। सुमनसः पुष्पाणि रथचरणं चक्रन्तस्य धरो धारयिता हरिः। पचाद्यच्। तस्याङ्गनास्तासां कराब्जैर्व्यतिकरः सम्पर्कः स एव सम्पत् तया उपात्तं लब्धं सौमनस्यं सुमनस्त्वं सन्तुष्टचित्तत्वं याभिस्ताः सत्यः अत एव सौमनस्यलाभ आदिर्यस्मिन् कर्म्मणि तत्तदादि ततः प्रभृतीत्यर्थः अर्थतः पूर्व्वोक्तावयवार्थात् परिस्फुटमप्रसिद्धावयवार्थमभिधानं सुमनस इति नामधेयं दधति। पूर्व्वमश्वकर्णकादिवद्रूढमिति भावः। आख्याह्वे चाभिधानं च नामधेयं च नाम चेत्यमरः। स्त्रियः पुष्पाण्यवचेतुम्प्रवृत्ता इति फलितोऽर्थः। नूनमित्युत्प्रेक्षायां। अत्रोपात्तसौमनस्या इति सौमनस्योपादानस्य पदार्थस्य

अभिमुखपतितैर्गुणप्रकर्षा-
दवजितमुद्धतिमुज्ज्वलां दधानैः ।
तरुकिसलयजालमग्रहस्तैः
प्रसभमनीयत भङ्गमङ्गनानाम् ॥ २९ ॥

मुदितमधुभुजो भुजेन शाखा-
श्चलितविशृङ्खलशृङ्खकं धुवत्याः ।
तरुरतिशयितापराङ्गनायाः
शिरसि मुदेव मुमोच पुष्पवर्षम् ॥ ३० ॥

विशेषणगत्या । सुमनःपदार्थताहेतुकत्वोक्त्या काव्यलिङ्गम् तदुत्थापिता चेयमन्तदादिवोत्प्रेक्षेति सङ्करः तेन चाङ्गनाकराणामतिश्लाघ्यत्वं व्यज्यते ॥ २८ ॥

अभिमुखेति । अभिमुखपतितैः भञ्जनार्थमभिमुखमागतैः उज्ज्वलामुत्कृष्टामुद्धतिमुपरिप्रसारमौद्धत्यञ्च दधानैरङ्गनानामग्राणि च ते हस्ताश्चेति समानाधिकरणसमासः । अतएव हस्ताग्राग्रहस्तयोर्गुणगुणिनोरभेदादिति वामनः । तैरग्रहस्तैः कर्तृभिः गुणप्रकर्षाद्धेतोरवजितमवधीरितन्तरुकिसलयजालं प्रसभम्बलात् भङ्गं छेदं पराजयञ्चानीयत नीतं । प्रधानकर्मण्याख्येये लादो नादिकर्मणामिति किसलयजालस्य प्राधान्यादभिधानं । अत्राग्रहस्तेषु विशेषणमहिम्ना जिगीषुत्वस्य किसलयजाले जेतव्यत्वस्य च प्रतीतेः समासोक्तिरलङ्कारः ॥ २९ ॥

मुदितेति । मुदिता हृष्टा मधुभुजो मधुपायास्तु ताः शाखा भुजेन हस्तेन चलितानि विशृङ्खलानि अप्रतिहतरवाणि शङ्खकानि

अनवरतरसेन रागभाजा
करजपरिक्षतिलब्धसंस्तवेन ।
सपदि तरुणपल्लवेन वध्वा
विगतदयं खलु खण्डितेन मम्ले ॥ २१ ॥

वलयानि यस्मिन् कर्म्मणि तद्यथा तथा धुवत्याः कम्पयन्त्याः । धू विधूनने इति धातोस्तौदादिकाच्छतरि ङीप् क्ङिति चेति गुणवृद्धि प्रतिषेधादुवङादेशः । अतिशयिता सौन्दर्य्येणातिक्रान्ता अपरा स्त्री यया सा तस्याः शिरसि तरुर्मुदेव तदभिसरणसन्तोषेणेवेति गुणहेतूत्प्रेक्षा पुष्पवर्षं पुष्पवृष्टिं मुमोच ॥ २० ॥

अनवरतेति । अनवरतरसेनानवच्छिन्नद्रवेण अन्यत्रानुबद्धशृङ्गारेण रागभाजा रक्तेन प्रीतिभाजा च करजपरिक्षतिषु नखक्षतेषु लब्धसंस्तवेन प्राप्तपरिचयेन । संस्तवः स्यात्परिचय इत्यमरः । वध्वा विगतदयं निर्दयं यथा तथा खण्डितेन छिन्नेन निराकृतेन च तरुणपल्लवेन नवकिसलयेन युवविटेन च । पल्लवः किसलये विटे इति विश्वः । सपदि मम्ले म्लानं खलु प्रसिद्धौ । म्लायतेर्भावे लिट् । अत्राभिधायाः प्रकृतार्थे नियन्त्रितत्वादप्रकृतार्थप्रतीतिः शब्दशक्तिमूलो ध्वनिः न श्लेषः तेन चोभयोः पल्लवयोरौपम्यङ्गम्यते ॥ २१ ॥

अथासौ पुष्पावचये शृङ्गारचेष्टाः वर्णयन् कस्याश्चिच्चेष्टाविशेषमेकेनाह । प्रियमिति । अन्या स्त्री प्रियमभि प्रियस्याग्रत इत्यर्थः । अभिरभागे इत्यभेर्लक्षणार्थकर्म्मप्रवचनीयत्वात्तद्योगे द्वितीया । कुसुमेषूद्यतः कुसुमोद्यतः कुसुमग्रहणार्थमुत्थित

प्रियमभि कुसुमोद्यतस्य बाहो-
र्नवनखमण्डनचारु मूलमन्या ।
मुकुरितरकराश्रितेन पीन-
स्तनतटरोधि तिरोदधेंऽशुकेन ॥ २२ ॥
विततवलिविभाव्यपाण्डुलेखा
कृतपरभागविलीनरोमराजिः ।
कृशमपि कृशतां पुनर्नयन्ती
विपुलतरोन्मुखलोचनावलग्नम् ॥ २३ ॥

इत्यर्थः । प्रकृतिविकारभावाभावान्न तादर्थ्ये चतुर्थीसमासः । तस्य बाहोर्नवं यन्नखं नखक्षतं तदेव मण्डनं तेन चारु सुन्दरं मूलं कक्षभागमित्यर्थः मुकुरितरकरेण सव्यपाणिना आश्रितेन निहितेनांशुकेनोत्तरीयेण पीनं स्तनतटं रुणद्धीति पीनस्तनतटरोधि तदावरणं यथा तथा तिरोदधे तिरश्चकार । अत्र चापलाख्यः सञ्चारिभावः । आत्मप्रकाशिनी चेष्टा रागादेश्चापलं मतमिति लक्षणात् । प्रौढा चेयम् ॥ २२ ॥

अथापरस्याश्चेष्टाविशेषं षड्भिः कुलकेनाह । विततेत्यादि । काचिद्विततामिर्गात्रोन्नमनाद्विश्लिष्टाभिर्वलिभिस्त्रिवलिभिर्विभाव्याः संलक्ष्याः पाण्डुरेखाः रेखाकाराः वलीचयान्तरालभागाः ताभिः कृतपरभागाजनितवर्णोत्कर्षाः अतएव विशेषेण लीना विलीना रोमराजिर्यस्याः सा तथोक्ता कृशमपि स्वभावतएवेति भावः अवलग्नं मध्यं । मध्यमं चावलग्नं च मध्योऽस्त्रीत्यमरः । पुनः कृशतां नयन्ती अपपुष्पग्रहणाय गात्रविजृम्भणादिति भावः

प्रसकलकुचबन्धुरोद्धुरोरः
प्रसभविभिन्नतनूत्तरीयबन्धा।
अवनमदुदरोच्छ्वसद्दुकूल
स्फुटतरलक्ष्यगभीरनाभिमूला ॥ २४ ॥

व्यवहितमविजानती किलान्त
र्वणभुवि वल्लभमाभिमुख्यभाजम्।
अधिविटपि सलीलमग्रपुष्प
ग्रहणपदेन चिरं विलम्ब्य काचित् ॥ २५ ॥

तथा विपुलतरे उन्मुखे ऊर्ध्वमुखे च लोचने यस्याः सा अग्र पुष्पग्रहणार्थमिति भावः ॥ २३ ॥

प्रसकलेति। प्रसकलाभ्यामतिसमग्राभ्यां कुचाभ्यां बन्धुरमुन्नतानतम्। बन्धुरं तून्नतानतमित्यमरः। उद्धुरं निर्भरं दृढमिति यावत्। उरःप्रभृतिभ्य इत्यादिना समासान्तः। तस्मादुरसः प्रसभाद्बलात्कारादिभिन्नो विश्लिष्टस्तनूत्तरीयबन्धो यस्याः सा गात्रविजृम्भणादिस्तनकुचावरणेत्यर्थः। किञ्च अवनमतोऽन्तर्लीयमानादुदरादुच्छ्वसत् विश्लिष्यत् दुकूलं यस्य तत् अतएव स्फुटतरं यथा तथा लक्ष्यं गभीरमगाधं नाभेर्मूलमन्तरालं यस्याः सा ॥ २४ ॥

व्यवहितमिति। काचित्पूर्व्वोक्तविशेषणविशिष्टा अङ्गना अन्तर्वण भुवि वनाभ्यन्तरप्रदेशे। प्रनिरन्तरित्यादिना वनणकारस्य णत्वं। व्यवहितं तिरोहितं आभिमुख्यभाजं अभिमुखावस्थितमित्यर्थः तं वल्लभं प्रियं अविजानती किल जानानाप्यजानानेव अधि विटपि विटपिनि वृक्षे। विभक्त्यर्थेऽव्ययीभावः। सलीलं यथा

अथ किल कथिते सखीभिरत्रे
क्षणमपरेव ससम्भ्रमा भवन्ती ।
शिथिलितकुसुमाकुलाग्रपाणिः
प्रतिपदसंयमितांशुकावृताङ्गी ॥ ३६ ॥
कृतभयपरितोषसन्निपातं
सचकितसस्मितवक्त्रवारिजश्रीः ।
मनसिजगुरुतत्क्षणोपदिष्टं
किमपि रसेन रसान्तरं भजन्ती ॥ ३७ ॥

तथा अग्रे वृक्षाग्रे यानि पुष्पाणि तेषां ग्रहणस्य पदेन मिषेण चिरं विलम्ब्य प्रियाय स्वाङ्गप्रकाशनार्थमिति भावः ॥ ३५ ॥

अथेति । अथ विलम्बानन्तरं अत्रास्मिन्प्रिये सखीभिः कथिते सति किलायमत्रैवास्तइति निवेदिते सति क्षणं ससंभ्रमा अपरेव पूर्वविपरीतव्यापारकारणादन्येव भवन्ती बुद्धिपूर्वकारित्वमज्ञाननाटनेन वञ्चयन्तीत्यर्थः शिथिलितः पुष्पग्रहणान्निवर्त्तितः कुसुमाकुलः कुसुमव्याप्तोऽग्रपाणिर्यया सा तथोक्ता प्रतिपदं प्रतिस्थानं संयमितेन नियमितेनांशुकेन । अंशुकं स्यादुत्तरीये स्यादिति विश्वः । वस्त्रेणावृतमङ्गं यस्याः सा तथोक्ता सती ॥ ३६ ॥

कृतभयेति । किञ्च कृतः भयपरितोषयोः भर्तृदर्शनोत्थसाध्वसहर्षयोः सन्निपातः सङ्करोयेन तत् मनसिजातोमनसिजः स्मरः । सप्तम्यां जनेर्डः हलदन्तात्सप्तम्याः संज्ञायामित्यलुक् । सएव गुरुराचार्यस्तेन तत्क्षणे उपदिष्टन्तदेकहेतुकं इत्यर्थः ।

अवनतवदनेन्दुरिच्छतीव
व्यवधिमधीरतया यदस्थितास्मै ।
अहरत सुतरामतोऽस्य चेतः
स्फुटमभिभूषयति स्त्रियस्त्रपैव ॥ ३८ ॥

॥ षड्भिः कुलकम् ॥

किमप्यनिर्वाच्यं रसान्तरं लक्षणया भावान्तरं तच्चेह किलकिञ्चिताख्यं विवक्षितं कृतभयेत्यादिविशेषणेन क्रोधाश्रुहर्षभीत्यादेः सङ्करः किलकिञ्चितमिति लक्षणार्थस्य प्रतीतेः । रसेन रागेण हेतुना भजन्ती अतएव सचकिता सभयसम्भ्रमा । चकितम्भयसम्भ्रमइत्यमरः । सस्मिता हर्षात्समन्दहासा वक्राशारिजश्रीर्यस्याः सा सती । अत्र चकितस्मितयोः पूर्वोक्तभयहर्षानुभावत्वेनोक्तिः ॥ ३७ ॥

अवनतेति । अवनतवदनेन्दुः लज्जया नम्रमुखीत्यर्थः । अधीरतया अधृष्टतया व्यवधिं किञ्चिद्व्यवधानम् । उपसर्गे घोः किरिति किप्रत्ययः । इच्छती वाञ्छतीव तथा व्याकुला सतीत्यर्थः । आच्छीनद्योर्नुमिति विकल्पान्नुमभावः । अस्मै प्रियाय अस्थित आत्मानं प्रकाशयन्ती स्थितेत्यर्थः । तिष्ठतेः कर्त्तरि लुङ् । प्रकाशनस्थेयाख्ययोश्चेत्यात्मनेपदं स्थाघ्वोरिच्चेति सिचः कित्त्वमिकारश्च धातोरन्तादेशः कित्त्वान्न गुणः । इति यदतोहेतोरस्य प्रियस्य चेतः सुतरामहरत । तथाहि त्रपैव स्त्रियोऽभिभूषयति स्फुटमसिद्धमित्यर्थः । अतोऽस्याश्रपि त्रपाभूषितत्वादतिमनोहरत्वं युक्तमिति भावः । कुलकार्थान्तरन्यासौ । मध्या चेयं नायिका । लज्जामन्मथमध्यस्था मध्यमोदितयौवनेति लक्षणात् ॥ ३८ ॥

किसलयशकलेष्ववाचनीयाः
पुलकिनि केवलमङ्गके निधेयाः ।
नखपदलिपयोऽपि दीपितार्थाः
प्रणिदधिरे दयितैरनङ्गलेखाः ॥ ३९ ॥

कृतकृतकरुषा सखीमपास्य
त्वमकुशलेति कयाचिदात्मनैव ।
अभिमतमभि साभिलाषमाविः
कृतभुजमूलमबन्धि मूर्द्धि माला ॥ ४० ॥

किसलयेति । किसलयशकलेषु वर्त्तमाना इति शेषः अवाचनीयाः प्रसिद्धलिपिवैलक्षण्याद्वाचयितुमनर्हाः किन्तु केवलं पुलकिनि दयितस्पृष्टत्वात्तत्स्पर्शादेव रोमाञ्चवत्यङ्गके वपुषि निधेया विरहतापशान्त्यर्थमर्प्पणीयाः नखपदानि नखाङ्का एव लिपयोऽक्षराणि येषु ते न तु प्रसिद्धाक्षराः अतोऽवाचनीया इत्यर्थः । नैतावतानुतापकारित्वं चेत्याह तथापि दीपितार्थाः सङ्केतितसन्निवेशवशादेव द्योतिताभिधेयाःलिख्यन्त इति लेखाः । कर्म्मणि घञ्प्रत्ययः । अनङ्गस्य लेखाः तत्प्रयुक्ता इत्यर्थः । दयितैः दयिताभिः दयितैश्च । पुमांस्त्रियेत्येकशेषः । प्रणिदधिरे प्रणिहिता लिखिता इत्यर्थः । दधातेः कर्म्मणि लिट् । नेर्गदनदेत्यादिना नकारस्य णत्वम् । लोकप्रसिद्धलेख्यवैलक्षण्याद्व्यतिरेकालङ्कारः ॥ ३९ ॥

कृतेति । कृतकृतकरुषा कृतकृत्रिमरोषयाकया चित्सखिकया त्वमकुशला माल्यग्रथने कुशला नासीति सखीमपास्य निरस्यात्मना

अभिमुखमुपयाति मा स्म किञ्चि
त्त्वमभिदधाः पटले मधुव्रतानाम् ।
मधुसुरभिमुखाब्जगन्धलब्धे
रधिकमधित्वदनेन मा निपाति ॥ ४१ ॥

स्वयमेवाभिमतमभिप्रायाभिमुखं साभिलाषमाविष्कृतभुजमूलं प्रकाशितकक्षप्रदेशं यथा तथा मूर्ध्नि माला अबन्धि बद्धा । अयञ्च स्वाभिप्रायव्यञ्जकचेष्टारूपस्थापलाख्यः सञ्चारिविशेषः । नायिका प्रौढैव । स्मरमन्दीकृतव्रीडा प्रौढा सम्पूर्णयौवनेति लक्षणात् ॥ ४० ॥

अथ काञ्चिन्नायिकाम्प्रति सखीवचनं विशेषकेणाह । अभिमुखमिति । मधु मकरन्दं व्रतयन्ति भुञ्जत इति मधुव्रताः मधुपाः । कर्मण्यण्प्रत्ययः । तेषां पटले अभिमुखमुपयाति आगते सति त्वं किञ्चिन्मास्माभिदधाः न किञ्चिदालप मौनं भजेत्यर्थः । स्मोत्तरे लङ् च । न माङ्योग इत्यट्प्रतिषेधः । मौनस्य मधुकरबाधनिवृत्तिरेव फलमित्याह । मध्विति । मधुना मद्येन सुरभेर्मुखाब्जस्य यो गन्धस्तस्य लब्धेर्लाभात् । स्त्रियां क्तिन् । अनेन मधुव्रतपटलेन अधित्वत् त्वयि । विभक्त्यर्थेऽव्ययीभावः । त्वमावेकवचने इत्यत्रैकवचन इत्यर्थनिर्देशादिह विभक्त्यभावेऽप्येकार्थत्वे युष्मदो मपर्यन्तस्य त्वादेशः अतएव विभक्त्यभावात्त्वादेशोऽत्र चिन्त्य इति वल्लभवचनं चिन्त्यम् । अधिकमत्यन्तं सर्वथेत्यर्थः मा निपाति मा निपत्यताम् । भावे लुङि चिण्वृद्धिः । अपनिपातासम्भवेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः ॥ ४१ ॥

सरजसमकरन्दनिर्भरासु
प्रसवविभूतिषु भूरुहां विरक्तः ।
ध्रुवममृतपनामवाञ्छयासा
वधरममुं मधुपस्तवाजिहीते ॥ ४२ ॥

सरजसेति । किञ्च मधु पिबतीति मधुपो मधुलिट् मधुपश्च । आतोऽनुपसर्गे कः । भुवि रोहन्ति जायन्त इति भूरुहाः भूरुहाणां भौमानां देहिनां सन्निवेशेषु सह रजसा सरजसं । अचतुरेत्यादिना साकल्यार्थेऽव्ययीभावः समासान्तनिपातः । तेन सरजस्क इति बहुव्रीह्यर्थो लक्ष्यः मुख्यो वा महाकविप्रयोगबाहुल्यात् अव्ययीभावदर्शनं तु प्रायिकमित्युक्तं प्राक् । तथा च सरजसं सरजसो वा यो मकरन्दस्तेन निर्भरासु पूर्णासु न तु त्वदधरामृतेन नाप्यरजस्केनेति भावः । अन्यच्च रजः स्त्रीपुष्पं । स्याद्रजः पुष्पमार्त्तवमित्यमरः । तत्साहचर्यान्मकरन्दशब्देन शुक्रप्रतीतिः तेन शुक्रशोणितसन्निपातप्रायास्वित्यर्थः प्रसवविभूतिषु पुष्पसमृद्धिषु जन्मपरम्परासु च विरक्तः निस्पृहः सन् अमृतं पिबतीति अमृतप इति नाम्नो वाञ्छया असौ मधुपस्त्वाधरमोष्ठं प्रति आजिहीते आगच्छति ध्रुवं सत्यमित्युत्प्रेक्षार्था । अन्यच्च तु अमृतपो देव इति नामवाञ्छया देवभूयापेक्षयेत्यर्थः । अथ वा निःश्रेयसप्राप्तीच्छयेत्यर्थः । श्रेयो निःश्रेयसामृतमित्यमरः । ध्रुवं शाश्वतं अपरम्परासम्बन्धरहितं अमृतं परलोकपदं । शुभमिह चामुत्र चाप्नोति इत्यादौ लोके वेदे चेहपरलोकवचे रूढिप्रदर्शनात् । आजिहीते अभियातीत्यर्थः । ओ हाङ् गताविति

इति वदति सखीजने निमील-
द्द्विगुणितसान्द्रतराक्षिपक्ष्ममाला।
अपतदलिभयेन भर्तुरङ्कं
भवति हि विक्लवता गुणोऽङ्गनानाम् ॥ ४२ ॥

॥ विशेषकम् ॥

धातोर्लिटि श्नाविति द्विर्भावः ईर्हल्यघोरितीकारः। इह नायिकावदनसौरभहेतुकस्य मधुपानामागमनस्य स्मितपानमवाञ्छाहेतुकत्वोत्प्रेक्षणाद्गुणहेतूत्प्रेक्षा सा च ध्रुवमिति व्यञ्जकप्रयोगाद्वाच्या सती मधुपस्याधरोष्ठेनासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्त्युत्थापितेति सङ्करः। पूर्वोक्ताप्रकृतार्थप्रतीतिस्तु मधुपादिशब्दानामभिधयाप्रकृतार्थनियन्त्रितत्वाच्छब्दशक्तिमूलो ध्वनिरेव न श्लेष इत्यलं विस्तरेणेति ॥ ४२ ॥

इतीति। इति इत्थं सख्येव जनस्तस्मिन्सखीजने वदति सति निमीलन्त्यौ भयान्मुकुलीभवन्त्यौ अतएव द्वे आवृत्ती ययोस्ते द्विगुणे द्विरावृत्ते। गुणास्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्विति वैजयन्ती। ते कृते द्विगुणिते अतएव सान्द्रतरे अक्षिपक्ष्ममाले नेत्रलोमपङ्क्ती यस्याः सा काचिदिति शेषः। अक्षिग्रहणस्य पक्ष्मद्वयद्वैगुण्यलक्षणोरक्षोरेवेति द्योतनार्थत्वान्न पौनरुक्त्यम्। अलिभयेन भर्तुरङ्कमुत्सङ्गमपतत् प्राप्तवती। अहो महत्कष्टं यत्कीटकादपि भयमित्याशङ्क्याह। अङ्गनानां न तु पुंसामिति भावः विक्लवता भीरुता गुणो भवति हि न तु दोष इति भावः। अतएव जनसमक्षं भर्तुरङ्कारोहणमपि न दोषः पार्श्वस्थालम्बनादीनां भयानुभावत्वात्। कुलकेऽलङ्कारोऽयमर्थान्तरन्यासः ॥ ४२ ॥

मुखकमलकमुन्नमय्य यूना
यदभिनवोढवधूर्बलाददुम्बि ।
तदपि न किल बालपल्लवाग्र
ग्रहपरया विविदे विदग्धसख्या ॥ ४४ ॥
व्रततिविततिभिस्तिरोहितायां
प्रतियुवतौ वदनं प्रियः प्रियायाः ।
यदधयदधरावलोपनृत्य
त्करवलयस्वनितेन तद्विवव्रे ॥ ४५ ॥

मुखेति । यूना अभिनवोढवधूर्नवोढाङ्गनापि बलात् बला त्कारात् मुखं कमलमिवेत्युपमितसमासः । तदल्पं मुखकमलकम् । अल्पार्थे कन्प्रत्ययः । उन्नमय्य उद्धृत्य । ल्यपि लघुपूर्वादित्य यादेशः । अचुम्बि चुम्बितेति यत् तच्चुम्बनं विदग्धसख्या चतुरसख्या बालपल्लवानां ग्रहोपहरणम् । ग्रहवृद्वनिश्चिगमश्चे त्यप्प्रत्ययः । तत्परया तदासक्तया सत्या कश्चिद्व्यासङ्गं कल्पयन्त्ये त्यर्थः न विविदे अपि किल न प्रकाशितमिति विमृत वक्तव्य मित्यपिशब्दार्थः । किलेत्यलीके वस्तुतो विदित्वाप्यविदित्वेव स्थितं वैदग्ध्यात् अन्यथा तयोर्विस्रम्भविहारविघातादिति भावः । मुग्धेयं नायिका । उदयद्यौवना मुग्धा लज्जाविदित मन्मथेति लक्षणात् ॥ ४४ ॥

व्रततीति । प्रतिकूला युवतिः प्रतियुवतिः सपत्नी तस्यां व्रतति विततयो लताजालानि । वल्ली तु व्रततिर्लतेत्यमरः । ताभिस्तिरोहितायां सत्यां प्रियः प्रियायावदनमधयत् अपिबदिति यत् । धेटोभावा

विलसितमनुकुर्व्वती पुरस्ता
द्धरणिरुहाधिरुहोवधूर्लतायाः ।
रमणमृजुतया पुरः सखीना
मकलितचापलदोषमालिलिङ्ग ॥ ४६ ॥

सललितमवलम्ब्य पाणिनांसे
सहचरमुच्छ्रितगुच्छवाञ्छयान्या ।
सकलकलभकुम्भविभ्रमाभ्या
मुरसि रसादवतस्तरे स्तनाभ्याम् ॥ ४७ ॥

दिकालङ् । तद्वदनपानं अधरावलोपेनाधरखण्डनेन तज्जनित व्यथयेत्यर्थः न्त्यतोः स्खलतोः करयोर्वलयानां कङ्कणानां स्वनितेन ध्वनिना विवशे विरुतम् तदेव तस्यास्तदनुमापकमभूदित्यर्थः । अत्रैका दृष्टा अपरा त्वीर्ष्यानिर्व्वेदवतीत्यनुसन्धेयम् ॥ ४५ ॥

विलसितमिति । वधूः काचित् स्त्री पुरस्तादग्रे धरणिरुह मधिरोहतीति धरणिरुहाधिरुट् वृक्षाधिरूढा । रुहेः क्विप् । तस्यालतायाः विलसितं चेष्टितम् । भावे क्तः । अनुकुर्व्वती एव मित्याश्लेषप्रकारमभिनयन्ती ऋजुतया अकुटिलबुद्धितया सखीनां पुरोऽग्रे अकलितः अविचारितस्वापलमनुचितकरणमेव दोषो यस्मिन् कर्म्मणि तद्यथा तथा रमणं प्रियमालिलिङ्ग । एषा हर्षात्सुक्यवती प्रौढा च ॥ ४६ ॥

सललितमिति । अन्या स्त्री उच्छ्रितगुच्छवाञ्छया उन्नतस्तवक लिप्सया सललितं सविलासं यथा तथा सहचरं प्रियम्पाणिना। श्लिष्यादाप्नेनेति शेषः अंसे अवलम्ब्यावष्टभ्य सकलयोः समग्रयोः

मृदुचरणतलाग्रदुःस्थितत्वा
दसहतरा कुचकुम्भयोर्भरस्य ।
उपरि निरवलम्बनं प्रियस्य
न्यपतदथोच्चतरोच्चिचीषयान्या ॥ ४८ ॥

कलभकुम्भयोः करिकुम्भयोर्विभ्रमइव विभ्रमः सौन्दर्य्यं ययो स्ताभ्यां स्तनाभ्यां रभसाद्रागादुरसि अवतस्तरे आच्छादयामास सहचरमित्यनुषङ्गः । अभिमुखावस्थानादिति भावः । स्तृणातेः कर्त्तरि लिट् । ऋतश्च संयोगादेर्गुणः शर्पूर्वाः खय इत्यभ्याससकार लोपः । इयञ्च प्रौढैव ॥ ४७ ॥

मृदिति । अन्या स्त्री उच्चतराणामत्युन्नतकुसुमानामुच्चेतु मवचेतुमिच्छया उच्चतरोच्चिचीषया । चिनोतेः सनन्तात् स्त्रियाम प्रत्यये टाप् । विभाषा चेरिति कुत्वविकल्पः । मृदुचरणतलाग्रेण दुःस्थितत्वात् दुःखेन स्थितत्वात् कुचकुम्भयोर्भरस्य । पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः । न सहतेऽत्यन्तमित्यसहतरा । सहेः पचाद्यजन्तान्नञ्समासात्तरप्प्रत्ययः । भरमसहमानेत्यर्थः । कर्तृयोगात् कर्म्मणि षष्ठी । अथास्मिन्नवसरे निरवलम्बनं यथा तथा प्रियस्योपरि न्यपतत् निरवलम्बनत्वान्निपपातेत्यर्थः । एषा च प्रौढा । स्वभावोक्तिरलङ्कारः ॥ ४८ ॥

उपरिजेति । उपरिजानि उपरि जातानि तरोर्जातानि तरुजानि कुसुमानि तानि याचमानां अपचित्य देहीति प्रार्थयमानां प्रथितपृथुपयोधरां प्रशस्तपीवरकुचां मुग्धवधूं अकुटिलधियं स्त्रियं परिरम्भलोलुपः आश्लेषलालसोऽन्यः कुशलतया वञ्चना

उपरिजतरुजानि याचमानां
कुशलतया परिरम्भलोलुपोऽन्यः ।
प्रथितपृथुपयोधरां गृहाण
स्वयमिति मुग्धवधूमुदास दोर्भ्याम् ॥४९॥

इदमिदमिति भूरुहां प्रसूनै
र्मुहुरतिलोभयता पुरः पुरोऽन्या ।
अनुरहसमनायि नायकेन
त्वरयति रन्तुमहो जनं मनोभूः ॥ ५० ॥

पटुतया स्वयं गृहाण त्वमेवाप चिनुष्वेत्यर्थः इति गम्यमानार्थत्वा दुक्तेति न प्रयुक्तं पौनरुक्त्यात् । दोर्भ्यामुदास उदक्षिपत् । अयञ्चैकायत्तत्वादनुकूलनायकः नायिका तु स्वाधीनपतिका प्रौढा च ॥ ४९ ॥

इदमिदमिति । अन्या स्त्री इदमिदमिति इदं ग्राह्यमिदं ग्राह्यमित्युक्त्वेत्यर्थः भूरुहां वृक्षाणां प्रसूनैः पुष्पैः पुरः पुरो मुहुरतिलोभयता प्रलोभयता नायकेन रहोऽनु अनुरहसमेकान्तं । अन्ववतप्तमित्यव्ययीभावसमासान्तः । अनायि नीता । तथा हि मनोभूः कामोजनं रन्तुं त्वरयति देशकालानपेक्षयेति भावः । अतएवाश्चर्यमहो इति । पूर्ववन्नायिकानायकविवेकः । अर्थान्तर न्यासः ॥ ५० ॥

विजनमिति । अन्या स्त्री विजनमेकान्तमिति हेतोरसुं वल्लभं चण्डं बलाद्गृहीत्वा आकृष्य अथान्तिके विपक्षं सपत्नीजनं वीक्ष्य स्खलनभीतेः स्खलनभयादभिपतितुं मनोरथस्या न अभिपतितुमना ।

विजनमिति बलादमुं गृहीत्वा
क्षणमथ वीक्ष्य विपक्षमन्तिकेऽन्या ।
अभिपतितुमनालघुत्वभीते
रभवदमुञ्चति वल्लभेऽतिगुर्वी ॥ ५१ ॥

अधिरजनि जगाम धाम तस्याः
प्रियतमयेति रुषा स्रजावनद्धः ।
पदमपि चलितुं युवा न सेहे
किमिव न शक्तिहरं ससाध्वसानाम् ॥ ५२ ॥

तुङ्काममनसोरपीति मकारलोपः । अपसर्त्तुकामेत्यर्थः वल्लभे अमुञ्चत्यत्यजति सति तस्य विपक्षानवेक्षणादिति भावः अति गुर्वी अतिगौरववत्यभवत् स्वयङ्ग्रहलाघवतिरोधानात् भर्तृवल्लभत्व प्रकाशनाच्चेति भावः । भाग्यवतां सर्व्वं श्रेयसे भवतीति रहस्यम् । एषा त्वतिप्रगल्भैव ॥ ५१ ॥

अधीति । अधिरजनि रजन्यां । विभक्त्यर्थेऽव्ययीभावः । तस्याः सपत्न्या इत्यर्थः। बुद्धिस्थत्वान्नामग्रहणासहत्वाच्च तच्छब्देन निर्देशः। धाम गृहं जगामेति रुषा हेतुना प्रियतमया कर्त्र्या स्रजा करणे नावनद्धो युवा पदमपि । अत्यन्तसंयोगे द्वितीया । चलितुं न सेहे न शशाक । तथा हि ससाध्वसानां भययुतानां किमिव किं वा । इवशब्दो वाक्यालङ्कार इवेतोपदर्थोपमोत्प्रेक्षावाक्यालङ्कारे ष्विति गणव्याख्याने । शक्तिं हरतीति शक्तिहरं । हरतेरनुद्यमने ऽजिति चप्रत्ययः । न भवतीति शेषः । अस्तिर्भवन्तीपरोऽप्रयु ज्यमानोऽप्यस्तीति वचनात् । भवन्तीति लटः पूर्वाचार्य्याणां संज्ञा।

न खलु वयममुष्य दानयोग्याः
पिबति च पाति च यासकौ रहस्त्वाम् ।
व्रज विटपममुं ददस्व तस्यै
भवतु यतः सदृशोश्चिराय योगः ॥ ५३ ॥

सर्व्वस्यापि भीरूणां शक्तिहरत्वादबलाजनः स्रगबलोऽपि यूनः शक्तिहर इति युक्तं इति सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । खण्डितेयं नायिका ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायितेति लक्षणात् । नायकस्तु दक्षिणः । भयसम्भ्रमसहनादिभिस्तस्यानेकत्र दक्षिणइति लक्षणार्थप्रतीतेरिति ॥ ५२ ॥

अथ काचित्खण्डिता निजकान्तमागस्कारिणं पल्लवदानेन प्रसादयन्तं चतुर्भिर्भर्त्सयितुमारभते । नेत्यादि । वयममुष्य दानयोग्यान भवामः खलु किन्तु या असावेवासकौ त्वत्प्रिया । अव्यय सर्व्वनाम्नामकच् प्राक्टेरित्यकच् । रहोरहसि । रहस्योपांशु चालिङ्गे इत्यमरः । त्वां पिबति पानं करोति । पा पाने भौवादिकात् कर्त्तरि लिट् पाघ्रेत्यादिना पिबादेशः । पाति रक्षति च अन्यतो वारयति चेत्यर्थः । पा रक्षणे अदादित्वाच्छपोलुक् । तस्यै अमुं विटान्पातीति विटपं पल्लवं । विटपः पल्लवे षिड्गे इति विश्वः । ददस्व प्रयच्छ । दद दाने इति भौवादिकाल्लोट् । व्रज गच्छ यतोदानाच्चिराय चिरकालात् चिरार्थेऽव्यय सदृशोरनुरूपयोर्योगोभवतु उभयोरपि विटपत्वादिति भावः । समालङ्कारोऽयम् । सा समालङ्कृतिर्योगो वस्तुनोरनुरूपयोरिति लक्षणात् ॥ ५३ ॥

तव कितव किमाहितैर्वृथा नः
क्षितिरुहपल्लवपुष्पकर्णपूरैः ।
ननु जनविदितैर्भवद्व्यलीकैः
श्चिरपरिपूरितमेव कर्णयुग्मम् ॥ ५४ ॥

तवेति । हे कितव धूर्त्त वृथा व्यर्थमेवाहितैः तत्कार्य्यस्यान्यथा सिद्धत्वादिति भावः तव सम्बन्धिभिः क्षितिरुहाणां पल्लवाः पुष्पाणि च तान्येव कर्णं पूरयन्तीति कर्णपूराः कर्णावतंसाः । कर्म्मण्यण् । तैर्नोऽस्माकं किं तत्साध्यं न किञ्चिदस्तीत्यर्थः । गम्यमानसाधनक्रियापेक्षया कर्णपूराणां करणत्वात्तृतीया । उक्तञ्च न्यासोद्योते न केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्य अपि तु गम्यमानापीति । किन्तु नन्वङ्ग जनविदितैर्जनेर्ज्ञातैरिति प्रसिद्धैः । जनेषु विदितैरिति सप्तमीसमासः क्तस्य च वर्त्तमानइति क्तयोगे षष्ठीप्रतिप्रसवत्वेऽपि क्तेन च पूजायामिति षष्ठीसमास निषेधात् जनानामाधारत्वविवक्षायां तदप्राप्तेः । भवद्व्यलीकैस्तवा प्रियवचनैः कर्णयुग्मं चिरपरिपूरितं नित्यं पूर्णमेव अतः परि पूरितस्य पूरणायोगादलमेवैभिरित्यर्थः । अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुत्वेनोपनिबन्धाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ५४ ॥

मुकुरिति । अलिनादैर्मुकुलपदहसितां प्रतारणार्थेति प्रहस्यमानामिव स्थितामेनां कलिकां कोरकं अवपल्लविकयेत्य । कलहे च युगे कलिरिति वैजयन्ती । स्त्रीप्रत्ययस्त्वविवक्षितः शेषे । नोऽस्माकं किमर्थं वितरसि हे शठ गूढविप्रियकारिन् तथाच

मुकुरुपदृसितामिवालिनादै
र्वितरसि नः कलिकां किमर्थमेनाम् ।
वसतिमुपगतेन धाम्नि तस्याः
शठ कलिरेष महांस्त्वयाऽद्य दत्तः ॥५५॥
इति गदितवती रुषा जघान
स्फुरितमनोरमपक्ष्मकेशरेण ।
श्रवणनियमितेन कान्तमन्या
सममसिताम्बुरुहेण चक्षुषा च ॥ ५६ ॥

॥ कलापकम् ॥

प्रियायाधाम्नि भवने वसतिं स्थितिमुपगतेन त्वयाद्यैव वर्त्तमानो महान् कलिः कलहो दत्तः स्वदत्त एव महति कलौ स्थिते किं कल्यन्तरेणेत्यर्थः । अत्रापि पूर्व्ववाक्यार्थस्योत्तरवाक्यार्थहेतुत्वा द्वाक्यार्थहेतुकं काव्यलिङ्गम् कलिकामिति श्लेषोत्थापितया कोरक कलहयोर्भेदे अभेदरूपातिशयोक्त्यानुप्राणितमिति सङ्करः ॥५५॥

इतीति । इतीत्थं गदितवत्युक्तवती अन्या स्त्री रुषा कान्तं स्फुरितान्युज्ज्वलानि मनोरमाणि च पक्ष्माणीव केशराणि अन्यत्र केशराणीव पक्ष्माणि यस्य तेन श्रवणनियमितेन श्रोत्रे धृतेन निरुद्धेन च असिताम्बुरुहेण नीलोत्पलेन चक्षुषा च समं युगप ज्जघान ताडयामास । एषा खण्डिता नायकस्तु धृष्टः । व्यक्ताङ्गोनि र्भयोधृष्ट इति लक्षणात् । अत्र स्फुरितेत्यादितुल्यधर्म्मगम्योपमानयो रसिताम्बुरुहचक्षुषोरुभयोरपि ताडनसाधनतयोपात्तत्वेन प्रकृता प्रकृतास्पदा तुल्ययोगिता । लक्षणं तूक्तम् ॥ ५६ ॥

विनयति सुदृशोदृशः पराग
प्रणयिनि कौसुममाननानिलेन ।
तदहितयुवतेरभीक्ष्णमक्ष्णो
र्द्वयमपि रोषरजोभिरापुपूरे ॥ ५७ ॥
स्फुटमिदमभिचारमन्त्रएव
प्रतियुवतेरभिधानमङ्गनानाम् ।
वरतनुरमुनोपहूय पत्या
मृदुकुसुमेन यदाहताप्यमूर्च्छत् ॥ ५८ ॥

विनयतीति । प्रणयिनि प्रिये सुदृशः प्रियायाः दृशो लोचनात् एकस्मादेवेति भावः कुसुमेषु भवं कौसुमम्परागं रजःकणन्त्वेकमेवेति भावः आननानिलेन निजमुखफूत्कारेण विनयत्यपनयति सति तदहितयुवतेः तस्य सपत्न्याः अक्ष्णोर्द्वयमपि न त्वेकमेवेति भावः रोषाएव रजांसि तैरभीक्ष्णमापुपूरे नैकेन रजःकणेन किञ्चित् स्पृष्टमात्रमिति भावः । पूरयतेः कर्म्मणि लिट् । पूर्णमित्यर्थः ॥ ५७ ॥

स्फुटमिति । इदम्प्रतियुवतेः सपत्न्याः अभिधानं नामधेयं अङ्गनानामभिचारः परमारणकर्म्म यथा श्येनेनाभिचरन्यजेतेति तस्य मन्त्रोऽभिचारमन्त्रः सएव स्फुटमित्युत्प्रेक्षा यद्यस्माद्वरतनुः स्त्री पत्या भर्त्रा अमुना सपत्नीनामधेयेनोपहूय मृदुकुसुमेन मृदुप्रहरणमचिरावचिततत्वद्योतनाय देवताभिचारमन्त्राणामनादि संस्कारभावं द्योतयति तेनाप्याहता अमूर्च्छत् यदुच्चारणपूर्व्वकं

समदनमवतंसितेऽधिकर्णं
प्रणयवता कुसुमे सुमध्यमायाः ।
व्रजदपि लघुतां बभूव भारः
सपदि हिरण्मयमण्डनं सपत्न्याः ॥५९॥

अवजितमधुना तवाहमक्ष्णो
रुचिरतयेत्यवनम्य लज्जयेव ।
श्रवणकुवलयं विलासवत्या
भ्रमररुतैरुपकर्णमाचचक्षे ॥ ६० ॥

कुसुमताडनमपि मारकं सोऽभिचारमन्त्र एव सत्यं अन्यथा केवलकुसुमेऽपि तत्प्रसङ्गादित्यर्थः ॥ ५८ ॥

समदनमिति । प्रणयवता प्रियेण सुमध्यमायाः प्रियायाः अधिकर्णं कर्णे । विभक्त्यर्थेऽव्ययीभावः । कुसुमे समदनं यथा तथा अवतंसिते अवतंसीकृते सति सपदि लघुतां हीनतामगुरुत्वं च व्रजदपि समानएकः पतिर्यस्यास्तस्याः सपत्न्याः । नित्यं सपत्न्यादिष्विति ङीप् नकारश्च तस्मादेव निर्देशात्समानशब्दस्य सभाव निपातः । हिरण्यस्य विकारो हिरण्मयं । दाण्डिनायनेत्यादिना निपातः । तन्मण्डनं भारोबभूव । यत्किञ्चिदपि प्रेम्णा कान्तेन स्वहस्तदत्तं श्लाघ्यं मण्डनं भवति अन्यन्महार्घमपि हीनं भारश्च न तु मण्डनमित्यर्थः । लघुगुरुत्वगुणविरोधस्य हीनार्थत्वेन परिहारादिरोधाभासभेदः ॥ ५९ ॥

अवजितमिति । विलासवत्याः स्त्रियः श्रवणकुवलयं श्रवणो त्पलं कर्तृ अहमधुना तवाक्ष्णोरुचिरतया रुचिरस्य भावः

अवचितकुसुमा विहाय वल्ली-
र्युवतिषु कोमलमाल्यमालिनीषु ।
पदमुपदधिरे कुलान्यलीनां
न परिचयो मलिनात्मनां प्रधानम् ॥ ६१ ॥

रुचिरता । भावे तल् । तथा सौन्दर्य्येणावजितमिति वक्तव्यानुवादः । अतएव लज्जया अवनम्य भ्रमरच्छलैः तन्मिषेणेत्यर्थः उपकर्णङ्कर्णे । विभक्त्यर्थेऽव्ययीभावः । आचचक्षुरिवेत्युत्प्रेक्षा ॥ ६० ॥

अवचितेति । अलीनां कुलानि अवचितानि युवतिभिरुपात्तानि कुसुमानि यासां ताः रिक्ता इत्यर्थः वल्लीः पुष्पलताः विहाय कोमलानि माल्यानि मलन्ते धारयन्तीति तासु कोमलमाल्यमालिनीषु । मल मल्ल धारणे इति धातोर्णिनिः ऋन्नेभ्यो ङीप् । युवतिषु पदमुपदधिरे निदधुः तथा हि मलिनात्मनां कृष्णदेहानां दुष्टचित्तानां च परिचयश्चिरकालसाहचर्य्यं न प्रधानं न प्रयोजकं किन्तु भुक्तिरेवेति भावः । अतः परिचितलतात्यागो नाश्चर्य्यमित्यर्थः । अत्र मलिनात्मनामिति कृष्णाङ्गत्वस्य दुष्टचित्तत्वेन सहाभेदाध्यवसायेनार्थान्तरन्यासस्योत्थापनात् श्लेषप्रतिभोत्थापितातिशयोक्त्यनुप्राणितोऽयमिति सङ्करः ॥ ६१ ॥

अथोत्तरसर्गे जलक्रीडावर्णनाय तदुपोद्घातत्वेनासां वनविहारोद्भवं श्रमातिरेकं सप्तभिः कुलकेन दर्शयति । गतेत्यादि । शिरसि जाताः शिरोरुहाः । सप्तम्याञ्जनेर्डः हलदन्तादित्यादिना सप्तम्या अलुक् । तेषां पाशः कलापः श्लथस्य तस्य यः पातः तस्य भारादिवेति हेतूत्प्रेक्षा । न पादादौ खल्वादय इति वामनोक्त

श्लथशिरसिजपाशपातभारा-
दिव नितरां नतिमद्भिरंसभागैः ।
मुकुलितनयनैर्मुखारविन्दै-
र्घनमहतामिव पक्ष्मणां भरेण ॥ ६२ ॥
अधिकमरुणिमानमुद्वहद्भि-
र्विकसदशीतमरीचिरश्मिजालैः ।
परिचितपरिचुम्बनाभियोगा-
दपगतकुङ्कुमरेणुभिः कपोलैः ॥ ६३ ॥

निषेधेऽपि इवशब्दस्य पादादौ प्रयोगः कवेः दोर्दण्डात् । नितरा मतिशयेन । अव्ययादामुप्रत्ययः । नतिमद्भिरंसभागैरुपलक्षिताभि र्नितम्बिनीभिरिति भाविना सम्बन्धः एवमुत्तरत्रापि योज्यम् । नतांसत्वमुत्तमस्त्रीलक्षणं । पुनर्घनमहतां सान्द्रदीर्घाणां पक्ष्मणां भरेणेवेति पूर्ववद्धेतूत्प्रेक्षा मुकुलितनयनैर्मुखारविन्दैः । अनयो रुत्प्रेक्षयोः संसृष्टिः ॥ ६२ ॥

अधिकमिति । पुनः परिचितानां प्रणयिनां परिचुम्बनैरभि योगात्मर्दनादपगतकुङ्कुमरेणुभिः अतएव विकसन्ति वैमल्या त्प्रतिफलन्ति अशीतमरीचेरुष्णांशोरश्मिजालानि येषु तैः । असम्बन्धे सम्बन्धेत्यतिशयोक्तिः । अतएवाधिकमरुणिमानमुद्वहद्भिः कुङ्कुमा पायेऽप्यातपलङ्घनादतिलोहितैरित्यर्थः कपोलैर्गण्डस्थलैः ॥ ६३ ॥

अवचितेति । पुनरवचिताः क्रमेण परिसमाप्ताः ललिताः क्रियाः सुकुमारचेष्टा अपि यस्य तेन ललिततरेण मृदुतरेण

अवसितललितक्रियेण बाह्वो-
र्ललिततरेण तनीयसा युगेन ।
सरसकिसलयानुरञ्जितैर्वा
करकमलैः पुनरुक्तरक्तभाभिः ॥ ६४ ॥

स्मरसरसमुरःस्थलेन पत्यु-
र्विनिमयसङ्क्रमिताङ्गरागरागैः ।
भृशमतिशयखेदसम्पदेव
स्तनयुगलैरितरेतरं निषण्णैः ॥ ६५ ॥

तनीयसा तनुतरेण बाह्वोर्युगेन पुनः सरसैरार्द्रैः किसलयैरनुरञ्जितैर्वा अनुरञ्जनं प्रापितैरिव पुनरुक्ताद्विगुणाः रक्ताभासो येषान्तैः पुनरुक्तरक्तभाभिः । हलि सर्वेषामिति यकारलोपः । करकमलैः पाणिपङ्कजैः । अचेतरजनकरापेक्षया पुनरुक्तरक्तत्वं स्वाभाविकमेव तच्च किसलयरञ्जनहेतुकत्वमुत्प्रेक्ष्यते इवार्थे वा शब्दः तदुत्प्रेक्षायाम्प्रयुक्तः ॥ ६४ ॥

स्मरेति । पुनः स्मरेण सरसं सानुरागं यथा तथा पत्युरुरःस्थलेन कर्त्रा विनिमयेन व्यतिहारेण सङ्क्रमितोऽङ्गरागोऽनुलेपनं तेन रागो रञ्जनं येषु तैः अतिशयोऽतिशयितोयः खेदस्तस्य सम्पदा महिम्नेवेत्युत्प्रेक्षा भृशमितरेतरमिथः परस्परं श्रितैः स्तनयुगलैः ॥ ६५ ॥

श्लथमिति । पुनः अतनुना महता कुचभरेणानतेन नमेव प्रागेवेति भावः । भूयः पुनश्च श्रमजनिता आनतिर्यस्य तेन शरीरकेण सुकुमारशरीरेण किञ्च समुचिता ऽनभ्यस्ता । अभ्यसे

अतनुकुचभरानतेन भूयः
श्रमजनितानतिनाशरीरकेण ।
अनुचितगतिसादनिःसहत्वं
कलभकरोरुभिरूरुभिर्दधानैः ॥ ६६ ॥

अपगतनवयावकैश्चिराय
क्षितिगमनेन पुनर्वितीर्णरागैः ।
कथमपि चरणोत्पलैश्चलद्भि
र्भृशविनिवेशवशात्परस्परस्य ॥ ६७ ॥

सोऽप्युचितं न्याय्यमिति यादवः । तया गत्या पादचारेण यः सादः कार्श्यं तेन यन्निःसहत्वं अक्षमत्वं तद्दधानैः गन्तुमशक्तै रित्यर्थः । न सहन्त इति निःसहाः पचाद्यजन्तेनोपसर्गस्य समासे त्वप्रत्ययः । कलभकराः करिहस्ता इवोरवो महान्तस्तैरूरुभिः सक्थिभिः । सक्थि क्लीबे पुमानूरुरित्यमरः ॥ ६६ ॥

अपगतेति । पुनश्चिराय चिरं क्षितिगमनेनापगतो नवयावको नवलाक्षारागो येषां तैः पुनस्तेनैव वितीर्णरागैः सौकुमार्यादुत्पादितरागैः परस्परस्य भृशविनिवेशवशात् स्थिरन्यासवशात् एवं स्थिरं निवेश्य तदुत्तरक्षणेनैतरचालनक्रमेणेत्यर्थः कथमपि महता प्रयत्नेन । कथमादि तथाप्यन्तं यत्नगौरवभेदयोरित्युत्पलः । चलद्भिश्चरणोत्पलैः ॥ ६७ ॥

मुहुरिति । नितम्बिनीभिरुक्तधर्मोपलक्षिताभिः स्त्रीभिर्मुहु रित्येवं वनविभ्रमाभिषङ्गात् वनभ्रमणासङ्गात्तदा नितरामतिमात्रम् । तमेर्भावे लुङ् । नोदात्तोपदेशस्य मान्तस्यानाचमेरिति

मृदुरिति वनविभ्रमाभिषङ्गा-
दलमि तदा नितरां नितम्बिनीभिः।
मृदुतरतनवोऽलसाः प्रकृत्या
चिरमपि ताः किमुत प्रयासभाजः ॥६८॥
प्रथममलघुमौक्तिकाभमासीत्
श्रमजलमुज्ज्वलगण्डमण्डलेषु ।
कठिनकुचतटाग्रपाति पश्चा-
दथ शतशर्करतां जगाम तासाम् ॥६९॥

वृद्धिप्रतिषेधः । यद्वा चेतदित्याह । मृदुतरतनवोऽतिकोमला-
ङ्ग्यः स्त्रियः प्रकृत्या अलसाः जडाः अथ चिरमपि प्रयासभाजश्चेत्
किमुत सुतरामलसाः स्युरित्यर्थः । अत्राप्रकृतमार्गक्लमस्य
कथने नागन्तुकस्य कैमुत्यन्यायतः सिद्धत्ववर्णनादर्थापत्तिरलङ्कारः ।
एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यदापतेत् । कैमुत्यन्यायतः सा स्यादर्था-
पत्तिरलङ्क्रियेति लक्षणात् । श्रमस्यात्र सञ्चारी वाच्यः । श्रमः
खेदोऽध्वरत्योरिति लक्षणात् ॥ ६८ ॥

अथ श्रमानुभवं स्वेदं वर्णयति । प्रथममिति अथ तासां
स्त्रीणां श्रमजलं प्रथममुज्ज्वलगण्डमण्डलेषु उज्ज्वलगण्ड-
स्थलेषु अलघुमौक्तिकाभं स्थूलमुक्ताफलसदृशमासीत् । पश्चात्कठिन-
तरकुचाग्रपाति सत् अथ पतनानन्तरं शतं शर्कराः शतशर्करम् ।
समाहारे द्विगुरेकवचनं वा टावन्तइति नपुंसकत्वम् । तस्य भाव-
स्तत्ता तां शतशर्करतां शतशकलत्वं जगाम । अत्रैकस्य श्रमजलस्य
क्रमेणानेकाश्रयसम्बन्धनिबन्धनात्पर्यायालङ्कारभेदः । क्रमेणैक

विपुलकमपि यौवनोद्धतानां
घनपुलकोदयकोमलं चकाशे ।
परिमलितमपि प्रियैः प्रकामं
कुचयुगमुज्ज्वलमेव कामिनीनाम् ॥ ७० ॥

अविरतकुसुमावचायखेदा
न्निहितभुजालतयैकयोपकण्ठम् ।
विपुलतरनिरन्तरावलग्न
स्तनपिहितप्रियवक्षसा ललम्बे ॥ ७१ ॥

मनेकस्मिन्नाधारे वर्त्तते यदि । एकस्मिन्नथ वानेकमपर्यायालङ्कृति
मतेति लक्षणात् ॥ ६८ ॥

अन्येऽपि कुचमण्डलमविकृतशोभमित्याह । विपुलकमिति ।
यौवनोद्धतानां कामिनीनां कुचयुगं विपुलकं पुलकरहितमपि
घनपुलकोदयेन सान्द्ररोमोद्गमेन कोमलं सहेति विरोधः
विपुलं विस्तृतं तदेव विपुलकमित्यविरोधः प्रियैः प्रकामम्परितो
मलमस्येति परिमलं तत्कृतं परिमलितं मलिनीकृतं तथाप्यु
ज्ज्वलं विमलमेव चकास्ति विरोधः परिमलवत्कृतं परिमलित
मित्यविरोधः । मलमात्तत्करोतीति णिचि कर्मणि क्तः णाविष्ट
वद्भावे विन्मतोर्लुक् । अपिर्विरोधे । विरोधाभासालङ्कारयोः
संसृष्टिः ॥ ७० ॥

अथैकस्याः प्रियकण्ठावलम्बने अमानुभावमेकेनाह । अवि
रतेति । अविरतोऽयः कुसुमानामवचायोऽस्तेन चयनं । चया
दाने चेरस्तोयदति घञ् । तेन यः [illegible]

अभिमतमभितः कृताङ्गभङ्गा
कुचयुगमुन्नतिवित्तमुन्नमय्य ।
तनुरभिलषितं क्लमच्छलेन
व्यवृणुत वेल्लितबाहुवल्लरीका ॥ ७२ ॥

कण्ठे । विभक्त्यर्थेऽव्ययीभावः । निहिते भुजालते यया तया । दोः प्रकोष्ठो भुजो बाहुर्भुजा च स्मर्यते बुधैरिति वैजयन्ती । विपुलतरौ निरन्तरमवलग्नौ संश्लिष्टौ च यौ स्तनौ ताभ्यां पिहितं छादितं प्रियस्य वक्षो यया तयैकया स्त्रिया सस्वजे लम्बितम् । भावे लिट् ॥ ७१ ॥

अथापरस्याः अङ्गभङ्गाख्यमपरमनुभावमाह अभिमतमिति । तनुः काचित्तन्वी । वोतो गुणवचनादिति विकल्पादनीकारः । अभिमतमभितः प्रियमभीत्यर्थः उन्नतिवित्तं औन्नत्येन प्रतीतम् । विदेर्भावार्थाद्विक्तो भोगप्रत्यययोरिति प्रत्ययार्थे निष्ठानत्वाभाव निपातः । कुचयुगमुन्नमय्य उत्तुङ्गीकृत्य कृतोऽङ्गभङ्गो गात्र विजृम्भणं यया सा तथा वेल्लिते मिथस्त्वेष्टिते बाहुवल्लर्यौ भुजलते यया सा । नद्यृतश्चेति कप् । क्लमच्छलेन श्रमापनोदक चेष्टाव्याजेनेत्यर्थः अभिलषितमालिङ्गनाद्यभिलषितं व्यवृणुत प्रकटितवती । वृणोतेर्लङ् । प्रौढेयमुत्सुका च ॥ ७२ ॥

अथ कस्याश्चिन्मुग्धायाः प्रियचापलोक्तिद्वारा स्वेदोद्गमम्प्र कटयति । हिमेति । हिमलवसदृशो हिमकणनिभान् श्रमोदबिन्दून् स्वेदबिन्दूनित्यर्थः । मन्थोदनेत्यादिना उदकस्योदादेशः । अप कृतवती किल प्रमार्जनेव न तु तत्र तात्पर्यमिति भावः तदपेक्ष

हिमलवसदृशः श्रमोदबिन्दू-
नपनयता किल नूतनोढवध्वाः ।
कुचकलशकिशोरकौ कथंचि-
त्तरलतया तरुणेन पस्पृशाते ॥ ७३ ॥

गत्वोद्रेकं जघनपुलिने रुद्धमध्यप्रदेशः
क्रामन्नूरुद्रुमभुजलताः पूर्णनाभीह्रदान्तः ।
उल्लङ्घ्योच्चैः कुचतटभुवं प्लावयन्रोमकूपान्
स्वेदापूरो युवतिसरितां व्याप गण्डस्थलानि ॥ ७४ ॥

यूना नूतनोढवध्वाः कुचौ कलशाविव तौ च किशोरकाविव उच्छूनत्वसाम्यादश्वशावाविव । अश्वशावः किशोरक इत्यमरः । तौ कुचकलशकिशोरकौ । उभयत्राप्युपमितसमासः । कथंचित् क्लेशेन सप्रतिषेधमेवेत्यर्थः तरलतया चपलतया उत्सुकतयेत्यर्थः पस्पृशाते स्पृष्टौ । स्पृशेः कर्मणि लिट् । मुग्धेयम् ॥ ७३ ॥

अथ सर्वासामेव स्वेदोद्रेकं वर्णयति । गत्वेति । युवतय एव सरितस्तासां स्वेद एवापूरः प्रवाहः जघनमेव पुलिनं तत्रोद्रेकं गत्वा । रुद्धः आवृतो मध्यप्रदेशोऽवलग्नभागः प्रवाहदेशश्च येन सः पूर्णनाभीह्रदान्तः । रेफान्तमकारान्तं वा । पूर्णेति पूरेर्ण्यन्तात्कर्मणि क्तः वा दान्तेत्यादिना णिलुगिट्प्रतिषेधनिपातः । उच्चैरुन्नतौ कुचावेव तटौ तयोर्भुवं प्रदेशमुल्लङ्घ्य रोमकूपान् रोमाणि रोमरन्ध्राणि तान्येव कूपान् प्लावयन् पूरयन् गण्डस्थलानि कपोलभागान् उन्नतभूभागांश्च प्राप । अत्र युवतिषु सरित्त्वस्य तदवयवेष्ववयवानां च निरूपणात्समवस्तुविषयसावयवरूपकं श्लेषानुप्राणितम् ।

प्रियकरपरिमार्गादङ्गनानां यदाभू-
त्पुनरधिकतरैव स्वेदतोयोदयश्रीः ।
अथ वपुरभिषेक्तुन्तास्तदाम्भोभिरीषु-
र्वनविहरणखेदम्लानमम्लानशोभाः ॥ ७५ ॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
वनविहारोनाम सप्तमः सर्गः ॥ ७ ॥

मन्दाक्रान्ता वृत्तम् । मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेदिति लक्षणात् ॥ ७४ ॥

एवमध्वश्रमानुभावं स्वेदोद्रेकं वर्णयित्वा तत्फलभूतां जलविहारेच्छामासां दर्शयति । प्रियेति । यदा अङ्गनानां प्रियकरपरिमार्गात् प्रियकरस्पर्शात् । मृजेर्घञ् प्रत्ययः । स्वेदतोयोदयश्रीः स्वेदोद्गमसम्पत् पुनर्भूयोऽप्यधिकतरैवाभूत् तदा अम्लानशोभाः अक्षीणकान्तयः वपुषि म्लानेऽपीति भावः ताअङ्गनावनविहरणखेदेन म्लानम् । म्लायतेः कर्त्तरि क्तः संयोगादेरातोधातोर्यण्वतइति निष्ठानत्वम् । वपुरङ्गं अथ कात्स्न्येन । मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेत्यमरः । अम्भोभिरभिषेक्तुं ईषुः इच्छन्ति स्म । इषेर्लिट् । अत्र पूर्ववाक्यार्थस्योत्तरवाक्यार्थसमर्थनहेतुत्वेनोपनिबन्धाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । मालिनी वृत्तम् ॥ ७५ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्ये सप्तमः सर्गः ॥ ७ ॥

आयासादलघुतरस्तनैः स्तनद्भिः
श्रान्तानामविकचलोचनारविन्दैः ।
अभ्यम्भःकथमपि योषितां समूहै-
स्तैरुर्वीनिहितमचलत्पदं प्रचेले ॥ १ ॥

अथ वपुरभिषेकुकामास्ता अम्भोभिरीयुरित्युक्तं तदेव वर्णयितुमारभते । आयासादिति । अलघुतरस्तनैः पृथुतरकुचैरिति मान्द्यहेतूक्तिः । स्तनद्भिर्भृषाभिः श्वसद्भिर्वा शब्दायमानैः । स्तन शब्द इति धातोर्लटः शत्रादेशः । अविकचलोचनारविन्दैः अर्धनिमीलिताक्षिपद्मैः आयासाद्गमनविहारखेदात् श्रान्तानां क्लान्तानां योषितान्तैः समूहैः कर्तृभिः उर्व्यान्निहितानि निक्षिप्तानि । डुधाञ् धारणे इति धातोः कर्मणि क्तः । तथैव चलन्ति पदानि यस्मिन् कर्मणि तद्यथा तथा उत्क्षेपणाशक्त्या भुवि बलादाकृष्यमाणचरणमित्यर्थः । अभ्यम्भोऽम्भः प्रति कथमपि प्रचेले प्रचलितम् । भावे लिट् । स्वभावोक्तिरलङ्कारः । स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनमिति लक्षणात् । अस्मिन्सर्गे प्रहर्षिणी वृत्तम् । म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयमिति लक्षणात् ॥ १ ॥

यान्तीनामिति । समम्पङ्क्तिभो यान्तीनां । आच्छीनद्योर्नुमिति वैकल्पिको नुमागमः । असितभ्रुवां स्त्रीणामंसानामन्तराद्भेदो र्नितान्तं महत्यन्तरे अवकाशे सत्यपि विपुलतया हेतुना मिथः संसक्तैरन्योन्यश्लिष्टैर्नितम्बैर्हृदिस्तृतमपि तद्वर्त्म सम्बाध्यत इति सम्बाधः सङ्कटम् । सङ्कटं ना तु सम्बाध इत्यमरः । सङ्कुलमपि

यान्तीनां सममसितभ्रुवां नतत्वा
दंसानां महति नितान्तमन्तरेऽपि ।
संसक्तैर्विपुलतया मिथो नितम्बैः
सम्बाधं बृहदपि तद्बभूव वर्त्म ॥ २ ॥
नीरन्ध्रद्रुमशिशिरां भुवं व्रजन्तीः
साशङ्कं मुहुरिव कौतुकात्करैस्ताः ।
पस्पर्श क्षणमनिलाकुलीकृतानां
शाखानामतुहिनरश्मिरन्तरालैः ॥ ३ ॥

विशेष्यलिङ्गत्वं सम्बाधमनुवर्त्तत इति भाष्यकारादिप्रयोगादिष्यते । बभूव । नतांसत्वनितम्बवैपुल्योक्त्या सौन्दर्य्यातिशय उक्तः । असम्बाधेऽपि सम्बाधाभिधानादतिशयोक्तिः ॥ २ ॥

नीरन्ध्रेति । नीरन्ध्रैः सान्द्रैर्द्रुमैः शिशिरां भुवं व्रजन्तीर्गच्छन्तीः ताः स्त्रीः अतुहिनरश्मिरुष्णांशुः क्षणमनिलेनाकुलीकृतानां चलितानां शाखानामन्तरालैर्नीरन्ध्रत्वेऽपि मुहुरनिलचालनजनितै रवकाशैर्मुहुः कौतुकादौत्सुक्यादिव साशङ्कम्परदारत्वात्सभयमित्यर्थः करैः पस्पर्श स्पृष्टवान् । अत्र चलच्छाखाहेतुकस्य तपनकरस्पर्शस्यौत्सुक्यहेतुकत्वोत्प्रेक्षणाद्गुणहेतूत्प्रेक्षा ॥ ३ ॥

अथ कस्याश्चिद्वृत्तं श्वेतातपत्रच्छलेनोत्प्रेक्षते । एकस्या इति वदनसरोजेन स्त्रीमुखपङ्कजेन निर्ज्जितश्रीश्चन्द्रमाः एतेन वदनसरोजस्य चन्द्रविजयात्सरोजान्तरवैलक्षण्यं चन्द्रस्य निकृष्टत्वञ्चोक्तम् । अत एव सेवार्थं तस्यैकार्थं आगत्य तपनकरैः करालितायाः भीषितायाः पीडितायाश्चेत्यर्थः । करालो भीषणेऽन्यवदिति विश्वः ।

एकस्यास्तपनकरैः करालिताया
बिभ्राणः सपदि सितोष्णवारणत्वम् ।
सेवायै वदनसरोजनिर्जितश्री
रागत्य प्रियमिव चन्द्रमाश्चकार ॥ ४ ॥

स्वं रागादुपरि वितन्वतोत्तरीयं
कान्तेन प्रतिपदवारितातपायाः ।
सच्छत्रादपरविलासिनीसमूहा
च्छायासीदधिकतरा तदापरस्याः ॥ ५ ॥

एतेन सेवावकाशो दर्शितः एकस्याः कस्याश्चिदङ्गनायाः सपदि आतपक्षणे एव सितोष्णवारणत्वं स्वयमेव श्वेतातपत्रत्वं बिभ्राणः सन्प्रियञ्चकारेव इति क्रियास्वरूपोत्प्रेक्षा । पराजितः कथाचित्सेवनया जेतुश्चित्तसन्तोषमुपार्जयतीति भावः ॥ ४ ॥

स्वमिति । रागाद्धेतोरुपरि प्रियायामूर्द्धनि स्वं स्वकीयमुत्तरीयं वितन्वता विस्तारयता कान्तेन प्रियेण प्रतिपदं पदे पदे वारितः आतपो यस्याः तस्या अपरस्याः कस्याश्चिदङ्गनायाः सच्छत्रात् छत्रयुक्तादपरविलासिनीसमूहात्सकाशात् । पञ्चमीविभक्ते इति पञ्चमी । अधिकतरा छाया अनातपः कान्तिश्च तदा आसीत् । छत्रच्छायातोऽपि कान्तस्वहस्तधृतोत्तरीयच्छायैवानन्यसाधारणी ज्यायसी मुखकान्तिरपि तस्या एव भूयसीति भावः । छाया त्वनातपे कान्तावित्यमरः । एतेन सच्छत्रादच्छत्रस्याधिकच्छायेति विरोधोऽपि निरस्त इति विरोधाभासोऽलङ्कारः ॥ ५ ॥

संस्पर्शप्रभवसुखोपचीयमाने
सर्वाङ्गे करतललग्नवल्लभायाः ।
कौशेयं व्रजदपि गाढतामजस्रं
सस्रंसे विगलितनीवि नीरजाक्ष्याः ॥ ६ ॥

गच्छन्तीरलसमवेक्ष्य विस्मयिन्य
स्तास्तन्वीर्न विदधिरे गतानि हंस्यः ।
बुद्ध्वा वा जितमपरेण काममावि
ष्कुर्वीत स्वगुणमपत्रपः क एव ॥ ७ ॥

संस्पर्शेति । करतले लग्नो वल्लभो यस्यास्तस्याः स्वहस्तेन तद्धस्तं गृहीत्वा गच्छन्त्या इत्यर्थः । अतएव नीरजाक्ष्याः सर्वाङ्गे संस्पर्शप्रभवेन प्रियाङ्गसङ्गप्रभवेन सुखेनोपचीयमाने पोषं गमिते सति । अतएव गाढतां दृढत्वं व्रजदपि विगलितनीवि सुखपारवश्यादिश्लिष्टग्रन्थि कौशेयं दुकूलं अजस्रं सस्रंसे स्रस्तम् । एषा दृष्टा हर्षितरोमा च ॥ ६ ॥

गच्छन्तीरिति । हंस्यो हंसाङ्गनाः अलसमन्दं गच्छन्तीस्तास्तन्वीः स्त्रीरवेक्ष्य विस्मयिन्योऽगतिसौष्ठवाद्विस्मयवत्यः सत्योगतानि स्वं लीलागमनानि न विदधिरे न चक्रुः लज्जयेति भावः । तथा हि परेण जितं स्वगुणं बुद्ध्वा वा बुद्ध्वापीत्यर्थः । क एव कोवा अपत्रपः सन् कामं आविष्कुर्वीत प्रकाशयेत् न कश्चिदपीत्यर्थः । इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वम् । अत्र तिरश्चां विवेकिमानिनयोक्त्या गतिकरणनिषेधसमर्थनार्थोऽर्थान्तरन्यासः ॥ ७ ॥

श्रीमद्भिर्जितपुलिनानि माधवीना-
मारोहैर्निबिडबृहन्नितम्बबिम्बैः ।
पाषाणस्खलनविलोलमाशु नूनं
वैलक्ष्याद्ययुरवरोधनानि सिन्धोः ॥ ८ ॥
मुक्ताभिः सलिलरयात्तशुक्तिपेशी-
मुक्ताभिः स्फुटरुचि सैकतं नदीनाम् ।
स्त्रीलोकः परिकलयाञ्चकार तुल्यं
पर्यस्तैर्विगलितहारचारुभिः स्वैः ॥ ९ ॥

श्रीमद्भिरिति । श्रीमद्भिः शोभावद्भिः निबिडा बृहन्तश्च नितम्बबिम्बाः कटिपश्चाद्भागा येषां तैः माधवस्येमाः माधव्यस्तासां हरिवधूनां आरुह्यन्त इत्यारोहैः कटिपुरोभागैः जघनैः जितपुलिनानि जितसैकतानि सिन्धोरवरोधनानि समुद्रमहिष्यो नद्य इत्यर्थः । वैलक्ष्यात्पराजयकृतमनःसंकोचाद्धेतोः पाषाणेषु स्खलनेनाभिघातेन विलोलं यथा तथा आशु ययुः अगुः नूनं । नदीनां स्वाभाविक्याः पाषाणस्खलिताशुगतेः वैलक्ष्यहेतुकत्वोत्प्रेक्षणात् गुणहेतूत्प्रेक्षा ॥ ८ ॥

मुक्ताभिरिति । स्त्रीलोकः स्त्रीजनः कर्ता । सलिलरयेणात्ताः शुक्तयो मुक्तास्फोटास्ता एव पेश्यः कोशाः पुटा इति यावत् । मुक्तास्फोटः स्त्रियां शुक्तिरिति पेशीकोशो द्विहीने इति चामरः । ताभिर्मुक्ताभिर्विमुक्ताभिर्मुक्ताभिर्मौक्तिकैः । अथ मौक्तिकं मुक्तेत्यमरः । स्फुटरुचि स्फुटशोभं नदीनां सिकतामयं सैकतं पुलिनं । तोयोत्थितं तत्पुलिनं सैकतं सिकतामयमित्यमरः । सिकताशर्कराभ्यां

उत्क्षिप्तस्फुटितसरोरुहार्घ्यमुच्चैः
सस्नेहं विहगरुतैरिवालपन्ती ।
नारीणामथ सरसी सफेनहासा
प्रीत्येव व्यतनुत पाद्यमूर्मिहस्तैः ॥ १४ ॥
नित्याया निजवसतेर्निरासिरे य
द्रागेण श्रियमरविन्दतः कराग्रैः ।
व्यक्तत्वं नियतमनेन निन्युरस्याः
सापत्न्यं क्षितिसुतविद्विषोमहिष्यः ॥ १५ ॥

सद्योविदधुः तादात्म्यभावनया स्वयं इष्टाइव शोषकुरिति शीत्कारा सम्बन्धे तत्सम्बन्धातिशयोक्त्या तथासामुद्दीपकमासीदित्युक्तम् ॥१३॥

उत्क्षिप्तेति । अथानन्तरमुत्क्षिप्तं स्फुटितसरोरुहं विकचारविन्दमेवार्घ्यमर्घ्यद्रव्यं यस्मिन्नत्तथा सस्नेहं विहगरुतैरालपन्ती स्वागतादिवचनं व्याहरन्तीव स्थिता इत्युत्प्रेक्षा । फेनइव हासस्तेन सहिता सफेनहासा स्मितपूर्वाभिभाषिणीत्यर्थः । सरसी पुष्करिणी नारीणामूर्मिभिरेव हस्तैः पाद्यम्पादोदकम् । पादार्घाभ्याञ्चेति यत् प्रत्ययः । प्रीत्येवेत्युत्प्रेचाव्यतनुत रूपकानुप्राणितोत्प्रेक्षावृत्यस्य सापेक्षत्वात् संसृष्टिः ॥ १४ ॥

नित्याया इति । क्षितिसुतविद्विषोनरकद्विषोहरेः महिष्यः करायैः पाणिपल्लवैः करचैः रागेण रक्तवर्णेन इच्छया च श्रियं शोभां रमां च नित्यायाः सदातन्याः निजवसतेः स्वस्थानादरविन्दतोऽरविन्दान्निरासिरे निष्कासयामासुः निरसुरेति यावत् । उपसर्गादस्यत्यूह्योर्वा वचनमिति विकल्पादात्मनेपदम् । अनेन

आस्कन्दन् कथमपि योषितो न याव
द्भीमत्यः प्रियकरधार्य्यमाणहस्ताः ।
औत्सुक्यात्त्वरितममूस्तदम्बु ताव
त्सङ्क्रान्तप्रतिमतया दधाविवान्तः ॥ १६ ॥

ताः पूर्व्वं सचकितमागमय्य गाधं
कृत्वाथो मृदुपदमन्तराविशन्त्यः ।
कामिन्योमनइव कामिनां सराग
रङ्गैस्तज्जलमनुरञ्जयांबभूवुः ॥ १७ ॥

निराशेनास्याः श्रियः सापत्न्यं सपत्नीत्वम् । ब्राह्मणादित्वात् ष्यञ् प्रत्ययः । व्यक्तत्वं निन्युर्व्यक्तीचक्रुरित्यर्थः । अत्र श्रीशब्देन रमा शोभयोरभेदाध्यवसायेन श्रीनिबन्धस्य सापत्न्यव्यक्तीकरणार्थत्वो त्प्रेक्षणात् श्लेषप्रतिभोत्थापितातिशयोक्त्यनुप्राणितेयं फलोत्प्रेक्षेति सङ्करः ॥ १५ ॥

आस्कन्दन्निति । भीमत्यः प्रवेशभीरवो योषितः प्रियकरै र्धार्य्यमाणहस्ताः प्रियकरावलम्बाः सत्यः यावत्कथमपि नास्कन्दन् न प्राविशन् तावत्सङ्क्रान्तप्रतिमतया सङ्क्रान्तप्रतिबिम्बतया तदम्बु कर्त्तृ औत्सुक्यादुत्कण्ठतया त्वरितममूरन्तर्दधाविव अन्तःप्रावेशय दिवेत्यर्थः । प्रतिबिम्बसङ्क्रमणादन्तर्धानोत्प्रेक्षणात् क्रियानिमित्ता क्रियास्वरूपोत्प्रेक्षा ॥ १६ ॥

ताइति । ताः कामिन्यः कामिनः कामुकस्य मनइव तज्जलं पूर्व्वंप्रथमं सचकितं सभयं यथा तथा गाधमुत्तानमागमय्य गमनेन ज्ञात्वा पुरःप्रविष्टपुरुषमुखेन गाधं तदिति परामृश्येत्यर्थः ।

संक्षोभं पयसि मुहुर्महेभकुम्भ
श्रीभाजा कुचयुगलेन नीयमाने ।
विश्लेषं युगमगमद्रथाङ्गनाम्नो
रुद्धः क इव सुखावहः परेषाम् ॥ १८ ॥

अन्यत्र दूतमुखेन ज्ञात्वेत्यर्थः । अथो ऽनन्तरं मृदु मन्दम्पदं कृत्वा पदं न्यस्य अन्यत्र तु स्वयं सम्भाषणादिकं कृत्वेत्यर्थः । अन्तरमभ्यन्तरमाविशन्त्यः प्रविष्टाः सत्यः अन्यत्र रहस्यकर्म्मणि प्रवृत्ताइत्यर्थः । सरागैः साङ्गरागैः सानुरागैश्च अङ्गैर्गात्रैरनुरञ्जयाम्बभूवुः तद्वर्णाक्रान्तं चक्रुः अन्यत्र त्वनुरक्तं चक्रुरित्यर्थः । श्लेषसङ्कीर्णेयमुपमा ॥ १७ ॥

संक्षोभमिति । महेभकुम्भश्रीभाजा तत्सदृशश्रीभाजेत्यर्थः । अतएवासम्भवद्वस्तुसम्बन्धोनिदर्शनालङ्कारः । कुचयुगलेनोपमितेनेति भावः । पयसि मुहुः संक्षोभं नीयमाने प्राप्यमाणे सति रथाङ्गनाम्नोर्युगञ्चक्रवाकयुगलं विश्लेषं वियोगमगमत् त्रियोगावस्थमपोति भावः । तथाहि उद्धृत्त उद्धतो ऽवृत्तस्य उद्धतं वक्षेति वा वृद्धत्तः अन्यो ऽद्धृत्तउन्मार्गवर्त्तीति यावत् स क इव केषां परेषां स्वेतरेषां सुखावहः सुखकरः न कोऽपीत्यर्थः अयञ्च स्वेच मूलातिशयोक्तिजीवितो ऽर्थान्तरन्यासः ॥ १८ ॥

आसीनेति । शीतं न सहतइति शीतासहुः शीतभीरुः । शीते आभ्यन्तरक्षणे आकुर् वक्तव्यः । अतएव परसि अवतरितुं प्रवेष्टुमनिच्छुरनभिलाषुकाअतएव तटभुवि आसीना उपविष्टा । आवेः कर्त्तरि शानच् ईदासइतीकारः । एषे कदलीवक्षादिवाक

आसीना तटभुवि सस्मितेन भर्त्रा
रम्भोरूरवतरितुं सरस्यनिच्छुः ।
धुन्वाना करयुगमीक्षितुं विलासान्
शीतालुः सलिलगतेन सिच्यते स्म ॥ १९ ॥

नेच्छन्ती सममनुना सरोऽवगाढुं
रोधस्तः प्रतिजलमीरिता सखीभिः ।
आश्लिक्षद्भयचकितेक्षणं नवोढा
वोढारं विपदि न दूषिताऽतिभूमिः ॥ २० ॥

यस्याः सा रम्भोरूः स्त्री । ऊरूत्तरपदादौपम्य इत्यूङ्प्रत्ययः । सलिलगतेन स्वयं सलिलं प्रविष्टेन सस्मितेन भर्त्रा विलासानीक्षितुं करयुगन्धुन्वाना कम्पयन्ती । धुनोतेः कर्त्तरि शानच् प्रत्ययः । सिच्यते स्म सिक्ता ॥ १९ ॥

नेति । अमुना सममनेन भर्त्रा सह सरोऽवगाढुमवगाहितुं । स्वरतिसूतिसूयतिधूञूदितो वेति विकल्पादिडागमः । नेच्छन्ती तस्मान्न्यथा अनिच्छन्ती । नञर्थस्य नशब्दस्य सुप्सुपेति समासः नञ् समासो वा । अथ सखीभिः प्रतिजलं जलम्प्रति रोधसो रोधसः । पञ्चम्यास्तसिल् । ईरिता नुन्ना नवोढा नववधूः भयेन चकितेक्षणं सम्भ्रान्तदृष्टि यथा तथा वोढारम्भर्त्तारमाश्लिक्षत् । आलिङ्गितवती । श्लिष आलिङ्गने इति धातोर्लुङि च्लेः क्सादेशः । न च धात्वंदेशापत्तिरित्याह । विपदि विपत्तौ अतिक्रान्ता भूमि रतिभूमिरमर्यादा न दूषिता । आपत्काले नास्ति मर्यादेति न्यायादिति भावः । अर्थान्तरन्यासालङ्कारः ॥ २० ॥

तिष्ठन्तमम्भसि पुमांसमंसमात्रे
तद्दघ्नमल्पवयती किलात्मनोऽपि ।
अभ्येतुं सुतनुरभीरियेष मौग्ध्या
दाश्लेषि द्रुतममुना निमज्जतीति ॥ २१ ॥

आनाभेः सरसि नतभ्रुवावगाढे
चापल्यादथ पयसस्तरङ्गहस्तैः ।
उच्छ्रायि स्तनयुगमध्यरोहि लब्ध
स्पर्शानां भवति कुतोऽथवा व्यवस्था ॥२२॥

तिष्ठन्तमिति । सुतनुः शुभाङ्गी स्त्री अंसः प्रमाणमस्येति अंसमात्रे अंसप्रमाणे । प्रमाणे द्वयसजद्दघ्नञ्मात्रचिति मात्रच् प्रत्ययः । पयसि जले तिष्ठन्तं पुमांसं वीक्ष्येति शेषः । आत्मनोऽपि तत्पयः तद्दघ्नं तावन्मात्रमंसमात्रं अवयती जानती किल तथा सम्भावयन्तीत्यर्थः । वार्त्तासम्भाव्ययोः किलेत्यमरः । अवपूर्वादिणः शतरि इणो यणिति यणादेशः उगितश्चेति ङीप् । किलशब्दस्तु लोकार्थत्वे मौग्ध्यविरोधः । अतएव मौग्ध्यादविवेकादभीर्निर्भीका सती अभ्येतुं पुमांसमभिगन्तुमियेष इच्छति स्म । अमुना पुंसा निमज्जतीति द्रुतमाश्लेषि आश्लिष्टा ॥ २१ ॥

आनाभेरिति । नतभ्रुवा स्त्रिया सरसि आनाभेर्नाभिपर्य्यन्तं । आङ् मर्य्यादाभिविध्योरिति विकल्पादसमासः। अवगाढे प्रविष्टे सति । गाहेः कर्मणि क्तः । अथ पयसस्तापल्यान्लोल्यात् । ब्राह्मणादिषु पाठात् ष्यञ्प्रत्ययः । तरङ्गैरेव हस्तैस्तरङ्गहस्तैरुच्छ्रायो ऽस्यास्तीत्युच्छ्रायि उन्नतिमत् स्तनयुगमध्यरोहि अधिरूढम् ।

कान्तानां कुवलयमप्यपास्तमक्ष्णोः
शोभाभिर्न मुखरुचाऽहमेकमेव ।
संहर्षादलिविरुतैरितीव गाय
ल्लोलोर्म्या पयसि महोत्पलं ननर्त्त ॥ २३ ॥

भिक्षुकपादप्रसारणन्यायादिति भावः । रोहतेः कर्म्मणि लुङ् । अथ वा तथारोहीत्यर्थः । लब्धस्पर्शानां लब्धप्रवेशानामित्यर्थः । कुतः कुत्र वा । सार्व्वविभक्तिकस्तसिल् । व्यवस्था मर्य्यादा भवति न कुत्रापीति भावः प्रायेण सर्व्वेऽप्यसम्भवप्रसरचारिण एवेति भावः। अत्र चापल्यादिति द्वयोरपि लौल्ययोरभेदाध्यवसायमूलातिशयोक्त्या तरङ्गहस्तैरिति रूपकेण च पयसि कामित्वप्रतीतेः समासोक्तिः तदुपजीवो चायाङ्करन्यायइति सङ्करः ॥ २२ ॥

कान्तानामिति । लोलोर्म्या चपलोर्म्मिणा । तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्येति विकल्पात्पुंवद्भावः । पयसि महोत्पल मरविन्दं कर्त्तृ । अरविन्दं महोत्पलमित्यमरः । कान्तानां मुख रुचा अहमेकमेव नापास्तं किन्तु तासामक्ष्णोः शोभाभिः कुवलय मप्यपास्तं इति संहर्षात्सन्तोषाद्धेतोरलिविरुतैर्गायत् अलिरुत रूपं गानं कुर्व्वदिति रूपकम् । इत्थम्भूतलक्षणइति तृतीया । ननर्त्तेव । न दुःखम्पञ्चभिः सहेति न्यायान्नृत्यति स्म । अत्रोर्म्मि चलनहेतुके महोत्पलचलने अलिनादसंहर्षहेतुकगानमानन्दनृत्तो त्प्रेक्षणात्क्रियानिमित्तक्रियास्वरूपोत्प्रेक्षा वाच्या ॥ १२ ॥

चरन्तीति । चलाः शफर्य्यः चातुकामामत्स्यः । प्रोष्ठी तु शफरी द्वयोरित्यमरः । ताभिर्विघट्टितौ विक्षिप्ताबूरू यस्याः सा अतएव

त्रस्यन्ती चलशफरीविघट्टितोरू
र्वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो
र्लीलाभिः किमु सति कारणे रमण्यः ॥२४॥
आक्रष्टप्रतनुवपुर्लतैस्तरङ्गै
स्तस्यास्तदथ सरोमहार्णवस्य ।
अक्षोभि प्रसृतविलोलबाहुपद्मै
र्योषाणामुरुभिरुरोजगण्डशैलैः ॥ २५ ॥

त्रस्यन्ती बिभ्यती । वा भ्राशेत्यादिना विकल्पात् श्यनि शतरि ङीप् । वामौ सुन्दरावूरू यस्याः सा वामोरूः स्त्री । संहित शफलक्षणवामादेश्चेत्यूङ् प्रत्ययः । विभ्रमस्य विलासस्यातिशयमाप तथा हि रमण्यो हेतोर्विनापि कारणं विनापि । पृथग्विनेत्यादिना विकल्पात्पञ्चमी । लीलाभिर्विलासैः प्रसभमकामं क्षुभ्यन्ति अहो निष्कारणक्षोभादाश्चर्यमित्यर्थः । कारणे सति किमु वक्तव्यम् । अत्राप्रकृतनिष्कारणक्षोभकथनात्सकारणक्षोभस्य कैमुत्यन्यायसाम्यल वर्णनादर्थापत्तिरलङ्कारः । दण्डापूपिकयार्थान्तरस्यापतनमर्था पत्तिरिति सूत्रम् ॥ २४ ॥

आक्रष्टेति । अथानन्तरमाक्रष्टाः प्रतनवोऽवपूंष्येव लता यस्ते स्तरङ्गैः प्लवमानैः प्रसृताः आयताविलोलाश्चलाबाहव एव पद्मा गच्छन्ति येषां तैः । गिरिभिर्मण्डलं पद्मवत्तस्य तदवयवेषूपचारः । उरुभिर्महद्भिर्योषाणां स्त्रीणां उरोजैरेव गण्डशैलैर्गिरिच्युतैः स्थूलोपलैस्तस्य सर एव महार्णवस्तस्य तदम्भः अक्षोभि ।

गाम्भीर्य्यन्दधदपि रत्नमङ्गनाभिः
संक्षोभं जघनविघट्टनेन नीतः ।
अम्भोधिर्विकसितवारिजाननोऽसौ
मर्य्यादां सपदि विलङ्घयाम्बभूव ॥ २६ ॥
आदातुन्दयितमिवावगाढमारा
दूर्मीणां ततिभिरभिप्रसार्य्यमाणः ।
कस्याश्चिदिततचलच्छिखाङ्गुलीको
लक्ष्मीवान्सरसि रराज केशहस्तः ॥ २७ ॥

क्षुभ्यतेर्ण्यन्तादण्यन्ताद्वा कर्म्मणि लुङ् । समस्तवस्तुविषयकं सावयवं रूपकम् ॥ २५ ॥

गाम्भीर्य्यमिति । गाम्भीर्य्यमगाधत्वं अविकारित्वञ्च दधदपि गम्भीरः सन्नपि रत्नं विहर्त्तुं सङ्गन्तुमङ्गनाभिः जघनस्य विघट्टनेन सङ्घर्षेण प्रक्षोभञ्चलनञ्चित्तविकारञ्च नीतः अतएव विकसितं वारिजमाननमिव वारिजमिव चाननं यस्य सः अम्भांसि धीयन्तेऽस्मिन्निति अम्भोधिर्जलाशयः कश्चित्पुमांश्च तत्तुल्यो गम्यते । कर्म्मण्यधिकरणे चेति किप्रत्ययः । सपदि मर्य्यादां सीमानं औचितीञ्च विलङ्घयाम्बभूव लङ्घितवान् । धीरोऽपि स्त्रीसन्निकर्षाद्विक्रियत इति भावः । अत्र गाम्भीर्य्यादिप्रकृताम्भोधिविशेषणसाम्यादप्रकृतविशेष्यपुरुषप्रतीतेः समासोक्तिरलङ्कारः । सा च प्रतीयमानाभेदाध्यवसायमूलातिशयोक्त्यनुप्राणितेति सङ्करः ॥ २६ ॥

आदातुमिति । सरसि वितताः प्रसारिताश्चलन्त्यश्च शिखा अग्राण्येवाङ्गुल्यो यस्य सः । नद्युतश्चेति कप् । लक्ष्मीवान् शोभावान् ।

उन्निद्रप्रियकमनोरमं रमण्याः
संरेजे सरसि वपुः प्रकाशमेव ।
युक्तानां विमलतया तिरस्क्रियायै
नाक्रामन्नपि हि भवत्यलं जलौघः ॥२८॥

माद्युपधायाश्च मतोर्वोऽयवादिभ्य इति मतुपो मकारस्य वत्वं। कस्याश्चित्केशहस्तः केशपाशः। पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः। हस्त इति करस्य ध्वन्यते। आरात्समीपे। आराद्दूरसमीपयोरित्यमरः। अवगाढमन्तर्मग्नं दयितमादातुं ग्रहीतुमिव ऊर्मीणामन्तर्भिरूर्म्यूहैरभिप्रसार्यमाणोऽभितो व्यापार्यमाणः सन् रराज। अत्रादातुमिव प्रसार्यमाण इति प्रसारणस्यादानार्थत्वोत्प्रेक्षणादियं क्रियानिमित्ता क्रियाफलोत्प्रेक्षा। सा च चलच्छिरखाकुलोक इति रूपकानुप्राणितया हस्त इति श्लेषमूलयावाच्यस्य केशकलापस्य प्रतीयमानात्कराद्भेदे अभेदरूपातिशयोक्त्या निर्व्यूढेति सङ्करः॥ २७ ॥

उन्निद्रेति। उन्निद्रं यत् प्रियकं असनकुसुमं। सर्जकासनबन्धूकपुष्पप्रियकजीवकाइत्यमरः। तदिव मनोरमं कनकगौरमित्यर्थः। रमण्यावपुः सरसि प्रकाशमेव जलमग्नमपि वैमल्यादृश्यमेव संरेजे। तथा हि। जलौघो जलपूरो जडौघो मूर्खसमूहश्च डलयोरभेदात्। आक्रामन्नाच्छादयन्नपि अन्यत्र अधिक्षिपन्नपि विमलतया वैमल्येन युक्तानां शुद्धानां तिरस्क्रियायै तिरोधानाय परिभवाय च अलं समर्थो न भवति हि। श्लेषमूलया भेदेऽभेदरूपातिशयोक्त्यानुप्राणितोऽयमर्थान्तरन्यासः॥ २८ ॥

किन्तावत्सरसि सरोजमेतदारा
दाहोस्विन्मुखमवभासते युवत्याः ।
संशय्य क्षणमिति निश्चिकाय कश्चि
द्विब्बोकैर्बकसहवासिनां परोक्षैः ॥२९॥

अङ्गानि द्रुतकनकोज्ज्वलानि गन्धाः
कौसुम्भं पृथुकुचकुम्भसङ्गि वासः ।
मार्द्वीकं प्रियतमसन्निधानमास
न्नारीणामिति जलकेलिसाधनानि ॥ ३० ॥

किमिति । सरस्यारादूरादेतत्पुरोवर्ति तावत्सरोजं किमाहोस्वित् उत युवत्यामुखं अवभासते इति क्षणं संशय्य संदिह्य । शीङः क्त्वो ल्यप् अयङ्यि क्ङितीत्ययङादेशः । कश्चिद्विलासी बकसहवासिनां बकसहचारिणां पद्मानामित्यर्थः विलासशून्यताद्योतनार्थमित्थन्निर्देशः । परोक्षैरप्रत्यक्षैरननुभूतपूर्वैरविद्यमानैरिति यावत् विब्बोकैर्विलासैरित्यर्थः यद्यपि विब्बोकोऽनादरक्रियेत्युक्तं तथापि विशेषवाचिनां सामान्ये लक्षणेत्यदोषः । निश्चिकाय विशेषदर्शनान्मुखमेवेति निश्चितवानित्यर्थः । सन्देहालङ्कारोऽयम् । विषयोविषयी यत्र सादृश्यात्कविसम्मतात् । सन्देहगोचरौ स्यातां सन्देहालङ्कृतिश्च सेति लक्षणात् । सोऽप्यन्ते निश्चयोक्तेर्निश्चयान्तः ॥ २९ ॥

अथ जलक्रीडासम्भारानाह । अङ्गानीति । द्रुतेन तप्तनिर्मलेन कनकेनोज्ज्वलानि स्निग्धानीत्यर्थः । अङ्गानि क्रीडानुयन्तॄणि । अङ्गं प्रभवे शिखरे चिह्ने क्रीडानुयन्तरि इति विश्वः । गन्धा

उत्तुङ्गादनिलचलांशुकास्तटान्ता
च्चेतोभिः सह भयदर्शिनां प्रियाणाम् ।
श्रोणीभिर्गुरुभिरदृश्यमुत्पतन्त्य
स्तोयेषु द्रुततरमङ्गनानिपेतुः ॥ २१ ॥

चन्दनकुङ्कुमादिगन्धद्रव्याणि । अतएव पुंसि बहुत्वं च । गन्धस्तु सौरभे योगे गन्धके गर्वलेशयोः। सएव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इत्यभिधानात् । पृथु विशालं कुचकुम्भसङ्गि कुचावरणं कुसुम्भेन रक्तं कौसुम्भम् । तेन रक्तं रागादित्यण् प्रत्ययः । वासोवस्त्रं मृद्वीकाया विकारो मार्द्वीकं द्राक्षामद्यम्। मृद्वीका गोस्तनी द्राक्षेत्यमरः। किञ्च प्रियतमसन्निधानं सर्व्वसाफल्यकारणमिति भावः। इत्येतानि नारीणां जलकेलिसाधनानि जलक्रीडोपायाआसन्। उद्दीपकसम्पत्तिरुक्ता। अत्र शृङ्गादीनां केलिसाधनत्वस्वरूपतुल्यधर्म्मयोगात् प्रकृतत्वाच्च केवलप्रकृतगोचरा तुल्ययोगिता ॥ २० ॥

उत्तुङ्गादिति। अनिलेन वेगानिलेन चलांशुकाश्चलद्वसना अङ्गनाः उत्तुङ्गात्तटान्ताद्भयदर्शिनाम्भयोत्प्रेक्षिणामनर्थाशङ्किनामित्यर्थः। प्रियाणां चेतोभिः सह तेषामन्तर्नैवावधानादिति भावः। गुरुभिर्गुर्व्वीभिः। वोतोगुणवचनादिति विकल्पाद्ङीकारः। श्रोणीभिर्हेतुना अदृश्यं मन्दमुत्पतन्त्यस्तोयेषु द्रुततरं निपेतुः। गुरुत्वस्य पतनहेतुत्वादुत्पतनविरोधित्वाच्च शीघ्रपातोमन्दोत्पतनञ्चेति भावः। अत्र प्रियचेतःपाताङ्गनापातयोः कार्य्यकारणयोरसहभाविनोः सहभावोक्तेः कार्य्यकारणयोः पौर्व्वापर्य्यविध्वंसनरूपातिशयोक्त्युपजीविना सहोक्तिरलङ्कारः। सहार्थेनान्वयोपच

मुग्धत्वादविदितकैतवप्रयोगा
गच्छन्त्यः सपदि पराजयं तरुण्यः ।
ताः कान्तैः सह करपुष्करेरिताम्बु
व्यात्युक्षीमभिसरणग्लहामदीव्यन् ॥ २२ ॥

भवेदतिशयोक्तिः । कल्पितौपम्यपर्य्यन्ता सा सहोक्तिरिहेष्यत इति लक्षणात् । चैतौ वत्पेतुरित्यौपम्यकल्पनया कार्य्यगताशुभाव प्रतीतेश्चमत्कार इति रहस्यम् । तात्कालिकांशुकचलनादिरूप स्वभावविशेषप्रकाशनात् स्वभावोक्तिश्चेति सङ्करः ॥ २१ ॥

मुग्धत्वादिति । मुग्धत्वान्मूढत्वादविदिताः कैतवप्रयोगा मुख मेलनादिकपटाचरणानि याभिस्ताः अतएव सपदि पराजय मृच्छन्त्यस्तास्तरुण्यः कान्तैः सहाभिसरणं स्वयमभिगमनं ग्लहो द्यूत पणो यस्यास्ताम् । पणोऽक्षेषु ग्लह इत्यमरः । अक्षेषु ग्लह इति ग्रहेरेवाप्पणे लत्वनिपातः । अप्प्रत्ययस्तु ग्रहवृदृनिश्चिगम श्चेत्येव सिद्ध इति केचित् । अन्ये तु ग्लहिप्रकृत्यन्तरमङ्गीकृत्या प्प्रत्ययस्यैव निपातो घञपवादोऽयमित्याहुः । करपुष्करैः करकमलै रीरितैरम्बुभिर्व्यात्युक्षीं व्यतिहारेणोक्षणं परस्पराभ्युक्षणमित्यर्थः । कर्म्मव्यतिहारे णच् स्त्रियामिति णच् प्रत्ययः णचः स्त्रियामञा देशः । टिड्ढाणञित्यादिना ङीप् । तां व्यात्युक्षीमदीव्यन् तया अक्रीडन्नित्यर्थः । दिवः कर्म चेति विकल्पात्कर्मत्वम् । अत्राविदित कैतवप्रयोगस्य विशेषणगत्या पराजयहेतुत्वादर्थहेतुकं काव्यलिङ्ग मलङ्कारः ॥ २२ ॥

योग्यस्य त्रिनयनलोचनानलार्चि-
र्निर्दग्धस्मरपृतनाधिराजलक्ष्म्याः।
कान्तायाः करकलशोद्यतैः पयोभि-
र्वक्त्रेन्दोरकृत महाभिषेकमेकः॥ ३३ ॥
सिञ्चन्त्याः कथमपि बाहुमुन्नमय्य
प्रेयांसं मनसिजदुःखदुर्बलायाः।
सौवर्णं वलयमवागलत्कराग्रा-
ल्लावण्यश्रियइव शेषमङ्गनायाः॥ ३४ ॥

योग्यस्येति। त्रिनयनस्त्र्यम्बकः। क्षुभ्नादिषु चेति निषेधात्पूर्वपदात्संज्ञायामिति णत्वाभावः। तस्य लोचनानलार्चिषा निर्दग्धस्य स्मरस्य याः पृतनास्तासामधिराज्यमाधिपत्यं तदेव लक्ष्मीस्तस्याः योग्यस्यार्हस्य त्रैलोक्यविजयिनः स्थाने तादृशस्यैव स्थाप्यत्वादिति भावः। कान्तायाः वक्त्रेन्दोः स्मरसखत्वादस्येति भावः। करावञ्जलिरेव कलशस्तेनोद्यतैरुत्क्षिप्तैः पयोभिर्महाभिषेकमेकः कश्चित्कामी अकृत कृतवान्। करोतेर्लुङि तङ् तनादिभ्यस्तथासोरिति सिचो लुक्। अत्र जलक्रीडासेके महाभिषेकत्वारोपेण प्रतीयमानकरकलशेति रूपकानुप्राणितेति सङ्करः ॥ ३३ ॥

सिञ्चन्त्या इति। मनसिजदुःखेन स्मरपीडया दुर्बलाया अत एव कथमपि बाहुमुन्नमय्योत्क्षिप्य प्रेयांसं प्रियतमम्। प्रियस्थिरेत्यादिना प्रादेशः। सिञ्चन्त्याः स्नपयन्त्याः अङ्गनायाः कराग्रात् सौवर्णं हिरण्मयं वलयं कङ्कणं। कङ्कणं वलयोऽस्त्रियामित्यमरः। शेषमिव

जिह्मन्ती दृशमपरा निधाय पूर्व्वं
मूर्त्तेन प्रणयरसेन वारिणेव ।
कन्दर्प्पप्रवणमनाः सखीसिसिक्षा
लक्ष्येण प्रतियुवमञ्जलिञ्चकार ॥ २५ ॥

लावण्यं कान्तिविशेषः । चतुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् प्रत्ययः । लवणोरसरचोऽब्धिभेदेषु लवणा त्विषीति विश्वः । यद्वा मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति च यदङ्गे तल्लावण्यमिहोच्यते । तस्य श्रीः सम्पत्तस्याः शेषमतिरिक्तं शरीरसम्पदव शिष्टमिति यावत् । शेषः सङ्कर्षणेऽनन्ते उपयुक्तेतरेऽन्यवदिति विश्वः । तदिवावागलदपतत् । शेषमिति गुणनिमित्तजातिस्वरूपोत्प्रेक्षा ॥ २४ ॥

जिह्मन्तीति । कन्दर्प्पप्रवणमनाः स्मरपरवशचित्ता अत एव दृशं निधाय पुंस्येव दृष्टिं कृत्वा जिह्मन्ती दृष्टिविशेषेण स्नेहं प्रकाशयन्तीत्यर्थः । अपरा स्त्री सख्याः सिसिक्षा सेक्तुमिच्छा तस्याः लक्ष्येण व्याजेन बद्धाञ्जलिरेव तिष्ठन्ती न तु सिसिक्षन्तीति द्योतनाय सिसिक्षेतीच्छायां सनः प्रयोगः । प्रतियुवं युवानं प्रति । अनश्चेत्यव्ययीभावसमासान्तः । मूर्त्तेन मूर्त्तिमता प्रणयरसेनेवेत्युत्प्रेक्षा । पाठादर्थस्य बलीयस्त्वादिवशब्दस्य व्यवहितेनान्वयः वारिणा पूर्व्वमञ्जलिञ्चकार प्रार्थयामासेत्यर्थः ॥ २५ ॥

आनन्दमिति । आनन्दं दधति प्रियसम्भावनया हर्षन्दधाने श्यामायाम्मध्यमयौवनायाः स्त्रियः । श्यामा यौवनमध्यस्थेत्युत्पलः । मुखे वदने दयिततमेन अतिशयेन दयितः प्रियः । अतिशये तमप्

आनन्दं दधति मुखे करोदकेन
श्यामायाद्दयिततमेन सिच्यमाने ।
ईर्ष्यन्त्या वदनमसिक्तमप्यनल्प
स्वेदाम्बुस्नपितमजायतेतरस्याः ॥ ३६ ॥
उद्वीक्ष्य प्रियकरकुड्मलापविद्धै
र्वक्षोजद्वयमभिषिक्तमन्यनार्याः ।
अम्भोभिर्मुहुरसिचद्वधूरमर्षा
दात्मीयं पृथुतरनेत्रयुग्ममुक्तैः ॥ ३७ ॥

प्रत्ययः । तेन कर्त्रा करोदकेनाञ्जलिजलेन सिच्यमाने सति ईर्ष्यन्त्याः असहमानायाः । परोत्कर्षाक्षमेर्ष्या स्यादिति लक्षणात् । इतरस्याः सपत्न्या वदनमसिक्तमपि प्रियेणेति शेषः । अनल्पेन स्वेदाम्बुना स्नपितं सिक्तमजायताभवत् ईर्ष्याकृतकोपकार्य्यत्वात् स्वेदादीनामिति भावः । असिक्तमपि सिक्तमिति विरोधः । तस्य स्वेदाख्यकारणोक्तेराभासत्वम् ॥ ३६ ॥

उद्वीक्ष्येति । प्रियस्य करकुड्मलाभ्यां पाणिपुटाभ्यामपविद्धैः सिक्तैरम्भोभिरभिषिक्तं अन्यनार्याः सपत्न्याः वक्षोजद्वयमुद्वीक्ष्य वधूर्नायिका अमर्षादीर्ष्याकृतकोपादात्मीयं वक्षोजद्वयं पृथुतरेण नेत्रयुग्मेन मुक्तैरम्भोभिर्बाष्पैर्मुहुरसिचत् अभिषिक्तवती । तन्मत्सरादिवेति भावः । अतो वस्तुनालङ्कारध्वनिः । लिपिसिचिह्वश्चेति सिञ्चतेर्लुङि च्लेरङादेशः ॥ ३७ ॥

कुर्वद्भिरिति । मुखरुचिं मुखकान्तिं उज्ज्वलां कुर्वद्भिर्यैस्तोयैर्विलासी विलसनशीलः कामी । वौ कषलसेत्यादिना घिनुण्

कुर्वद्भिर्मुखरुचिमुज्ज्वलामजस्रं
यैस्तोयैरसिचत वल्लभां विलासी ।
तैरेव प्रतियुवतेरकारि दूरा
त्कालुष्यं शशधरदीधितिच्छटाच्छैः ॥३८॥
रागान्धीकृतनयनेन नामधेय
व्यत्यासादभिमुखमीरितः प्रियेण ।
मानिन्या वपुषि पतन्निसर्गमन्दो
भिन्दानो हृदयमसाहि नोदवज्रः ॥३९॥

प्रत्यय: । वल्लभामजस्रमसिचत सिक्तवान् । स्वरितेत्त्वादात्मनेपदं आत्मनेपदेष्वन्यतरस्यामिति सिञ्चतेर्लुङि च्लेरङादेशः । शशधरदीधितिच्छटाच्छैः शशिकरनिकरस्वच्छैः तैरेव तोयैर्दूरात्प्रतियुवतेः सपत्न्याः कालुष्यं आविलत्वं वैवर्ण्यञ्चाकारि स्वच्छतोयैः कालुष्यं कृतमिति विरुद्धकार्य्योत्पत्तिरूपो विषमभेदः । तथान्यथेत्य सङ्गतिः वैवर्ण्यकालुष्ययोरभेदाध्यवसायादतिशयोक्तिस्तदुत्थापितेति सङ्करः ॥ ३८ ॥

रागेति । रागेण विपक्षानुरागेणान्धीकृतनयनेन प्रियेण नामधेयव्यत्यासाद्विपक्षनामपूर्व्वकमभिमुखमीरितः स्त्रीवपुषि पतन् निसर्गमन्दः स्वभावजडः तथापि हृदयम्भिन्दानो विदारयन्नुदकमेव वज्रोऽशनिरुदवज्रः । मन्थौदनेत्यादिना विकल्पादुदादेशः। मानिन्या विपक्षनामग्रहणजनितकोपवत्या नायिकया नासाहि न सोढः । तीक्ष्णयोगादतीक्ष्णमपि तीक्ष्णम्भवतीति भावः । उदवज्र इति केवलनिरवयवरूपकम् ॥ ३९ ॥

प्रेम्णोरः प्रणयिनि सिञ्चति प्रियायाः
सन्तापं नवजलविप्रुषो गृहीत्वा ।
उद्भूताः कठिनकुचस्थलाभिघाता
दासन्नां भृशमपराङ्गनामधाक्षुः ॥ ४० ॥

सङ्क्रान्तं प्रियतमवक्षसोऽङ्गरागं
साध्व्यस्याः सरसि हरिष्यतेऽधुनाऽम्भः ।
दृष्ट्वैवं सपदि हृतेऽपि तत्र तेपे
कस्याश्चित् स्फुटनखलक्ष्मणः सपत्न्या ॥४१॥

प्रेम्णेति । प्रणयिनि प्रेम्णा प्रियाया उरः सिञ्चति सति कठिनकुचस्थलाभिघातादुद्भूता उत्पतिताः नवजलस्य विप्रुषो बिन्दवः । पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियामित्यमरः । तस्याः सिक्तायाः सन्तापं गृहीत्वा आदायासन्नां समीपस्थामपराङ्गनां सपत्नीं भृशमधाक्षुः सन्तापयन्ति स्म । दहतेर्लुङि वदव्रजेत्यादिना सिचि वृद्धिः घत्वादिकार्य्यं । तत्सेकादेवापरस्याः तापोदयात्तत्तापस्यैवाधानमुत्प्रेक्ष्यते साच व्यञ्जकाप्रयोगाद्गम्या ॥ ४० ॥

सङ्क्रान्तमिति । प्रियतमवक्षसः सकाशात्सङ्क्रान्तं गाढालिङ्गनात्कुचतटलग्नं अस्याः सिक्तायाः अङ्गरागमधुनैव सरसि अम्भः कर्त्तृ । साधु निःशेषं हरिष्यते प्रमार्क्ष्यति एवन्तुष्टा इति बुद्धा सपदि तत्र तस्मिन्नङ्गरागे हृतेऽपि स्फुटनखलक्ष्मणो व्यक्तनखचिह्नायाः कस्याश्चिन्नायिकायाः सम्बन्धिनि सपत्न्या तेपे तप्तम् । भावे लिट् । तदिदमातपात्तस्य छायामभिप्सतो दारुणदवदहनवेष्टनं यदङ्गरागमेव द्रष्टुमक्षमायानखक्षतसाक्षात्कार इति । अत्र सन्ताप

ह्रीतायाः प्रतिसखि कामिनान्यनाम्ना
ह्रीमत्याः सरसि गलन्मुखेन्दुकान्तेः ।
अन्तर्द्धिं द्रुतमिव कर्त्तुमश्रुवर्षै-
र्भूमानं गमयितुमीषिरे पयांसि ॥ ४२ ॥

सान्त्वर्थेन विषलाङ्गनाङ्गरागक्षालनेन तद्विरुद्धसन्तापोत्पादना द्विरुद्धकार्य्योत्पत्तिरूपो विषमालङ्कारः ॥ ४१ ॥

ह्रीताया इति । प्रतिसखि सख्याः समीपे सखीसमक्षमित्यर्थः । समीपार्थेऽव्ययीभावे नपुंसकत्वह्रस्वत्वे । कामिना प्रियेणान्यस्याः सपत्न्याः नाम्ना अन्यनाम्ना । सर्व्वनाम्नो वृत्तिमात्रे पुंवद्भावः । ह्रीतायाः अतएव गलन्मुखेन्दुकान्तेः ह्रीमत्याः लज्जितायाश्च कस्याश्चिदिति शेषः । सरसि द्रुतं शीघ्रमन्तर्द्धिं अन्तर्द्धानं । अदन्तरोरुपसर्गवृत्तिवचनादुपसर्गे घोः किरिति किप्रत्ययः । कर्त्तुमश्रुवर्षैः कर्त्तृभिः पयांसि सरोजलानि भूमानं गमयितुं वृद्धिमापयितुम् । गतिबुद्धीत्यादिनाऽणिकर्त्तुः कर्मत्वं प्राधान्या दभिधानञ्च । ईषिरे इव इष्टानि किम् इत्युत्प्रेक्षेयमनुपाल भिभिक्ता तथा मरणदुःखादपि दुःसहं सपत्न्याः दुःखमिति वस्तु ध्वनिः ॥ ४२ ॥

सिक्तयाइति । प्रणयवता प्रियेण चणं पूर्व्वमन्यां सपत्नी मभिषिच्य पश्चात् सिक्ताया अन्यस्याः अबलायाः स्त्रियाः वक्त्रं कर्म मन्युः कोपएव कर्त्ता कालिम्ना कार्ष्ण्येन वैवर्ण्येन सहेति यावत् समधित सन्दधे वतेति खेदे । सम्पूर्व्वाद्धधातेः कर्मणि लुङि तङ् स्थाध्वो रिच्चेतीकारः सिचः कित्त्वान्न गुणः ह्रस्वादङ्गादिति सकारलोपः ।

सिक्तायाः क्षणमभिषिच्य पूर्व्वमन्या
मन्यस्याः प्रणयवता वताबलायाः ।
कालिम्ना समधित मन्युरेव वक्त्रं
प्राप्ताक्ष्णोर्गलदपशब्दमञ्जनाम्भः ॥ ४३ ॥
उद्वोढुं कनकविभूषणान्यशक्तः
सध्रीचा वलयितपद्मनालसूत्रः ।
आरूढप्रतिवनिताकटाक्षभारः
साधीयो गुरुरभवद्भुजस्तरुण्याः ॥ ४४ ॥

गलत् स्रवत् अक्ष्णोः सम्बन्धि अञ्जनाम्भः कज्जलोदकमपशब्दं वर्ण्यापवादमपि कोपकालिमतिरोधानेन स्वकालिम्न एव प्रकाशनादिति भावः । पूर्व्वेण वाक्यार्थेनोत्तरवाक्यार्थसमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ४३ ॥

उद्वोढुमिति । कनकविभूषणान्युद्वोढुमशक्तः सौकुमार्यादिति भावः । अतएव सहाञ्चतीति सध्र्यङ् तेन सहचरेण कर्त्रा । ऋत्विगादिना क्विन्प्रत्ययः सहस्य सध्रिरिति सहशब्दस्य सध्र्यादेशः अनिदितामिति नकारलोपः अच इत्यकारलोपे चाविति दीर्घः । वलयितानि वलयीकृतानि पद्मनालसूत्राणि मृणालतन्तवो यस्य सः मृणालकृतकङ्कण इत्यर्थः । तथापि आरूढः आरूढवान् प्रतिवनितायाः सपत्न्याः कटाक्ष एव भारो यस्य सः तया सासूयं दृष्ट इत्यर्थः । अतएव तरुण्या भुजो बाहुः साधीयो बाढतरमिति क्रियाविशेषणं । अन्तिकबाढयोर्नेदसाधाविति बाढशब्दस्य साधादेशः । गुरुर्भारवान् साध्यश्चाभवत् । अत्र कनकभूषणाभावेऽपि तत्कार्य्य

आबद्धप्रचुरपरार्ध्यकिङ्किणीको
रामाणामनवरतोदगाहभाजाम् ।
नारावं व्यतनुत मेखलाकलापः
कस्मिन्वा सजलगुणे गिरां पटुत्वम् ॥ ४५ ॥
पर्य्यङ्के सरसि हृतेंऽशुके पयोभि
र्लोलाक्षे सुरतगुरावपत्रपिष्णोः ।
सुश्रोण्या दलवसनेन वीचिहस्त
न्यस्तेन द्रुतमकृताब्जिनी सखीत्वम् ॥ ४६ ॥

गुरुत्ववर्णनादिभावना सा च गुरुरिति श्लेषप्रतिभोत्थापितेति श्लेषानुप्राणितेति सङ्करः ॥ ४४ ॥

आबद्धेति । उदकस्य गाहोऽवगाहनं उदगाहः । मन्थौदनेत्यादिना उदादेशः । तमनवरतम्भजन्ति यास्तासामनवरतोदगाहभाजां रामाणां स्त्रीणां सम्बन्धी आबद्धाः प्रोताः प्रचुरा भूयिष्ठाः परार्ध्याः श्रेष्ठाश्च किङ्किण्यो यस्मिन्सः तथोक्तः । नद्यृतश्चेति कप् । मेखलाकलापः आरावं ध्वनिं न व्यतनुत । तथा हि जलेन सह सजलो जलार्द्रो गुणः सूत्रं यस्य सः तथा डलयोरभेदाज्जडगुणो जडधर्मो जाड्यन्तेन सहेति सजडगुणो जडश्च तस्मिन् कस्मिन्वा मेखलाकलापे पुंसि वा गिरां वाचां ध्वनीनाञ्च पटुत्वं सामर्थ्यञ्च कुत्रापीत्यर्थः । श्लेषमूलाभेदातिशयोक्त्यनुप्राणितोऽयमर्थान्तरन्यासः ॥ ४५ ॥

पर्य्यङ्क इति । परि परितोऽङ्कं स्वच्छं अन्तर्गतवस्तुतिरोधायकमित्यर्थः । तस्मिन् सरसि पयोभिरंशुके स्त्रीपरिधाने

नारीभिर्गुरुजघनस्थलाहतानां
मास्यश्रीविजितविकाशिवारिजानाम् ।
लोलत्वादपहरतां तदङ्गरागं
संजज्ञे स कलुषआशयो जलानाम् ॥ ४७ ॥

हृते स्थानादपसारिते सति सुरतगुरौ रमणे च लोलाचे श्रोण्या सकृद्दृष्टौ सतीत्यर्थः । लोलश्चलसतृष्णयोरित्यमरः । वङ्क्षोहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् । अपत्रपिष्णोरपत्रपमाणायाः । लज्जा सापत्रपान्यतद्दृत्यमरः । अलङ्कृञित्यादिना इष्णुच् प्रत्ययः । सुश्रोण्याः प्रियायाः प्रस्तुतोचितनिर्देशोऽयं अकाले नलिनी द्रुतं वीचिरेव हस्तस्तेन न्यस्तेन दलं पर्णमेव वसनन्तेन तद्दानेनेत्यर्थः । सखीव सखीत्यच्चकारेत्यर्थः । अत्राङ्गिन्यादिषु सखीत्वाद्यारोपात्समस्तवस्तुवृत्ति सावयवरूपकम् ॥ ४६ ॥

नारीभिरिति । नारीभिः कर्त्रीभिः गुरुजघनस्थलैराहतानां आस्यश्रीभिर्मुखशोभाभिर्विजितानि विकाशीनि वारिजानि पद्मानि येषान्तेषां लोलत्वाच्चलत्वात्सतृष्णत्वाच्च । लोलश्चलसतृष्णयोरित्यमरः । तासामङ्गरागमपहरतां आयतानां जलानां तोयानां जडानाञ्च स आशयो हृदो हृदयञ्च कलुषोऽप्रसन्नः क्षुभितश्च संजज्ञे सञ्जातः अपकर्षगुणाङ्गमलहरणादिभिराशयः कलुषोभवतीति ध्वनिः । अभिधायाः प्रकृतार्थे नियन्त्रणाच्च श्लेषः ॥ ४७ ॥

सौगन्ध्यमिति । कामं पर्याप्तं सौगन्ध्यं सुरभिगन्धित्वं सुगन्धित्वं च । गन्धोगन्धककामोदे लेशे सम्बन्धिगर्वयोरिति विश्वः ।

सौगन्ध्यं दधदपि काममङ्गनानां
दूरत्वाद्गतमथमाननोपमानम् ।
नेदीयोजितमिति लज्जयेव तासा
मालोले पयसि महोत्पलं ममज्ज ॥ ४८ ॥

प्रभ्रष्टैः सरभसमम्भसोऽवगाढ
क्रीडाभिर्विदलितयूथिकापिशङ्गैः ।
आकल्पैः सरसि हिरण्मयैर्वधूना
मौर्वाग्निद्युतिशकलैरिव व्यराजि ॥ ४९ ॥

दधदपि अथ दूरत्वात्पूर्व्वं दूरस्थत्वादङ्गनानामाननोपमानं मुख सादृश्यं गतम् । दूरस्थाः पर्व्वतारम्याइति वदिति भावः । सम्प्रति पुनस्तासां नेदीयोनेदिष्ठमन्तिकतमं सत् । अन्तिकवाढयो र्नेदसाधावित्यन्तिकशब्दस्य नेदादेशः । जितम्परिभूतमभूव मिति लज्जयेव महोत्पलमरविन्दं आलोले चले पयसि ममज्ज यथा दूरे साम्येन दृश्यमानः सम्बन्धी सन्निधाववमानितः कश्चिल्लज्जया निलीयते तद्वदिति । अत्र पयस्युत्पलमज्जनेऽजमज्जने लज्जा हेतुकत्व मुत्प्रेक्ष्यतइति श्लेषमूलातिशयोक्तिहेतूत्प्रेक्षयोः संसृष्टिः ॥ ४८ ॥

प्रभ्रष्टैरिति । सरभसं सत्वरं अम्भसोऽवगाढ़ाएव क्रीडा ताभिः प्रभ्रष्टैर्जलावगाढक्षोभाद्भ्रष्टैः च्युतैर्विदलिताविकसिता यूथिकाः पीतयूथिका हेमपुष्पिकापरपर्य्यायाविवक्षिताः अन्यथा पिशङ्गत्वायोगात् । गणिका यूथिकाम्बष्ठा सा पीता हेमपुष्पिके त्यमरः । तद्वत्पिशङ्गैर्हिरण्मयैः सौवर्णैः । दाण्डिनायनेत्यादिना निपातः । वधूनामाकल्पैर्भूषणैः सरसि मौर्वाग्निद्युतिशकलैर्वड़वा

आस्माकी युवतिदृशामसौ तनोति
च्छायैव श्रियमनपायिनीं किमेभिः ।
मत्वैवं स्वगुणपिधानसाभ्यसूयैः
पानीयैरिति विदधाविरेऽञ्जनानि ॥५०॥

प्रयत्नादपापि सन्निहितैर्वडवानलज्वालाखण्डैरिवेत्युत्प्रेक्षा । व्यराजि विराजितम् । भावे लुङ् ॥ ४९ ॥

आस्माकीति । अस्माकमियमास्माकी अस्मदीया अस्मत्कारितेत्यर्थः । युष्मदस्मदोरन्यतरस्यां खञ्चेति चकारादण्प्रत्ययः । तस्मिन्नणि च युष्माकास्माकाविति प्रकृतेरस्माकादेशः टिड्ढाणञि त्यादिना ङीप् । असौ छाया कान्तिः विमलेति यावत् सैव युवतिदृशामनपायिनीं स्थायिनीं श्रियन्तनोति एभिरञ्जनैः किं एतत् साध्यन्न किञ्चिदस्तीत्यर्थः । गम्यमानसाधनापेक्षया करणत्वात् तृतीया इत्युक्तं प्राक् । एवं मत्वा उक्तप्रकारेणाञ्जनवैफल्यं निश्चित्येत्यर्थ । अतएव गम्योत्प्रेक्षेयं । स्वगुणस्य स्वाविष्कृतदृङ्नैर्मल्यगुणस्य पिधानं तिरोधानं । अपिधानतिरोधानपिधानाच्छादनानि चेत्यमरः । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो रित्यकारलोपः । तेन साभ्यसूयैः सेर्ष्यैः पातुमर्हैः पानीयैः । अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरमित्यमरः । तव्यत्तव्यानीयर इति पिबतेरनीयर् प्रत्ययः । अञ्जनानि कज्जलानि इति अनेन स्वगुणप्रकाशनयोग्यतया विवक्षितेन प्रकारेण निःशेषत्वरूपेणेत्यर्थः । विदधाविरे विधौतानि क्षालितानीत्यर्थः । धावु गतिशुद्ध्योरिति धातोः कर्मणि लिट् ॥ ५० ॥

निर्धौते सति हरिचन्दने जलौघै-
रापाण्डोर्गतपरभागयाङ्गनायाः ।
अक्लाय स्तनकलशद्वयादुपेये
विच्छेदः सहृदययेव हारयष्ट्या ॥ ५१ ॥

निर्धौतेति । हरिचन्दने रक्तचन्दने जलौघैर्निर्धौते क्षालिते सति । धावेः कर्मणि क्तः च्छ्वोः शूडनुनासिके चेति वकारस्योठादेशः एत्येधत्यूठ्स्विति वृद्धिरौकारः । आपाण्डोः पाण्डुवर्णादङ्गनायाः स्तनकलशद्वयात् गतपरभागया सावर्ण्याद्विगतवर्णोत्कर्षया । अत एव सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । हारयष्ट्या कर्त्र्या सहृदयया सचित्तयेवेत्युत्प्रेक्षा । निजपरभागहानिपरम्लानवत्येवेत्यर्थः । अक्लाय सपदि । द्राक् झटित्यञ्जसाक्लाय स्राक् मङ्क्षु सपदि द्रुतमित्यमरः । विच्छेदस्त्रुटनमुपेये प्राप्तः । हीनजीवनादजीवनमेव वरमिति भावः । उपपूर्वादिणः कर्मणि लिट् । विक्षोभहेतुकस्य हारविच्छेदस्य सहृदयहेतुकत्वोत्प्रेक्षा सा चोक्तसामान्योत्थापितेति सङ्करः ॥ ५१ ॥

अन्यूनमिति । अन्यूनं समग्रममृतस्य पीयूषस्य गुणं माधुर्यादिकं धारयन्तौ । अगन्धमव्यक्तरसं शीतलं च तृषापहम् । अच्छं लघु च पथ्यञ्च तोयं गुणवदुच्यते इति । उक्तोदकगुणञ्च धारयन्तौ सरसीपक्षे । अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृतमिति विश्वः । संफुल्लानि विकचानि । उत्फुल्लसम्फुल्लयोरुपसङ्ख्यानान्निष्ठातस्य लत्वम् । स्फुरितानि चञ्चलानि च यानि

अन्यूनं गुणममृतस्य धारयन्ती
संफुल्लस्फुरितसरोरुहावतंसा ।
प्रेयोभिः सह सरसी निषेव्यमाणा
रक्तत्वं व्यधित वधूदृशां सुरेव ॥ ५२ ॥

स्नान्तीनां बृहदमलोदबिन्दुचित्रौ
रेजाते रुचिरदृशामुरोजकुम्भौ ।
हाराणां मणिभिरुपाश्रितौ समन्ता-
दुत्सूत्रैर्गुणवदुपघ्नकाम्ययेव ॥ ५३ ॥

सरोरुहाण्येकत्र सहजानि अन्यत्र संस्कारार्थं क्षिप्तानि तान्येव तंसो भूषणं यस्याः सा तथोक्ता । प्रेयोभिः सह निषेव्यमाणा स्नानपानाभ्यामिति भावः । सरसी पुष्करिणी वधूदृशां रक्तत्वमारुण्यं व्यधित विधत्ते स्म । तथा सुरा च । व्यधितेति धाञः कर्त्तरि लुङि तङ् । इहोत्साहवर्द्धनाय मुक्तः सेचनात्कृतानीति स्नोके सलिलक्रीडाप्रस्तावे माद्वीकमिति परिगणनाच्च सरसीवत्सुराया अपि प्रकृतत्वविवक्षायां तुल्ययोगिता तदविवक्षायान्तु दीपकं सुरेवेति पाठे त्वप्रकृतविवक्षैव कार्या अन्यथा उपमानुपमा स्यात् । न च तुल्ययोगितावकाशः इवशब्देन गम्यौपम्यलक्षणभङ्गादिति ॥ ५२ ॥

स्नान्तीनामिति । स्नान्तीनां जलमवगाहमानानां रुचिरदृशां सुदृशां सम्बन्धिनौ बृहद्भिरमलैरुदबिन्दुभिश्चित्रौ । मन्थौदनेत्यादिना उदकशब्दस्योदादेशः । उरोजकुम्भौ उत्सूत्रैः हाराणां मुक्ताहाराणां मणिभिर्गुटिकाभिरुपहन्यते उपगम्यते पीड्यते वा उपघ्नमाश्रय इति । हनेरप्रत्ययान्त उपधालोपीति निपातः । गुणवतः

आरूढः पतित इति स्वसम्भवोऽपि
स्वच्छानां परिहरणीयतामुपैति ।
कर्णेभ्यश्च्युतमसितोत्पलं वधूनां
वीचीभिस्तटमनु यन्निरासुरापः ॥ ५४ ॥

औदार्यादिगुणवतः सूत्रवतस्य उपघ्नस्य काम्याआत्मन इच्छा गुणवदुपघ्नकाम्या तया गुणवदुपघ्नकाम्यया आत्मनो गुणवदाश्रया काङ्क्षयेत्यर्थः । काम्यचेति काम्यच्प्रत्ययान्तधातुत्वादप्रत्ययादिति स्त्रियामप्रत्यये टाप् । समन्तादुपाश्रितौ संश्लिष्टाविव रेजाते राजेते स्म । फणाञ्च सप्तानामिति विकल्पादेत्वाभ्यासलोपौ । गुणवच्छब्देन सूत्रशब्देन च सूत्रभेदे सूत्रान्तरमाश्रयत् इति प्रतीतिः श्लेषानुप्राणितयातिशयोक्त्यानुप्राणितेयमुत्प्रेक्षा ॥ ५३ ॥

आरूढ इति । स्वसम्भवोऽप्यात्मसम्भवोऽपि आरूढउच्चस्थानगतउत्तमाङ्गस्य पतितस्तथा भ्रष्ट इति हेतोः आरूढपतितत्वादित्यर्थः । स्वच्छानां निर्मलानां परिहरणीयतां त्याज्यत्वमुपैति । अत्र्यावसितो राज्ञोदासश्रामरणात्मिक इति स्मरणादिति भावः । वीचीभिस्तटमनु तटं प्रति निरासुश्चिक्षिपुः । कुतः यस्मादापः वधूनां कर्णेभ्यः च्युतमसितोत्पलं स्वसम्भवमपीति भावः विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः समर्थनवाक्यगतश्लेषमूलातिशयोक्त्या सङ्कीर्णः ॥ ५४ ॥

इन्तानामिति । तोयेष्वधि अधितोयम् । विभक्त्यर्थेऽव्ययीभावः । अङ्गनानामयावकं प्रक्षालितलाक्षारागं अधरन्दन्तानां पदानि दन्तक्षतानि तथा अविशेषकं धौताङ्गरागं तनुं शरीरं मत्स्याः

दन्तानामधरमयावकं पदानि
प्रत्यग्रास्तनुमविलेपनां नखाङ्काः ।
आनिन्युः श्रियमधितोयमङ्गनानां
शोभायै विपदि सदाश्रिता भवन्ति ॥ ५५ ॥
कस्याश्चिन्मुखमनु धौतपत्त्रलेखं
व्यातेने सलिलभरावलम्बिनीभिः ।
किञ्जल्कव्यतिकरपिञ्जरान्तराभि-
श्चित्रश्रीरलमलकाग्रवल्लरीभिः ॥ ५६ ॥

नवानखाङ्काश्च श्रियमानिन्युः प्रापयामासुः । नीवह्योर्हरते श्चैवेति वचनात् द्विकर्मकत्वम् । तथा हि सतः सज्जनान् सुन्दरांश्चाश्रिताः सदाश्रिताः ये केचिदिति शेषः । विपदि विभवाभावकालेऽपि शोभायै वैभवाय भवन्ति । क्लृपेः सम्पद्यमाने चतुर्थी वक्तव्येति क्लृपेरर्थनिर्देशाच्चतुर्थी । अर्थान्तरन्यासः ॥ ५५ ॥

कस्याश्चिदिति । धौतपत्त्रलेखं क्षालितपत्त्रावलीकं कस्याश्चिन्मुखमनु मुखेन सम्बद्धं यथा तथा मुखे इति यावत् । तृतीयार्थ इत्यनोः कर्म्मप्रवचनीयत्वात् द्वितीया । सलिलभरेणावलम्बिनीभिर्लम्बमानाभिः आर्जवकृताभिरित्यर्थः । किञ्जल्कव्यतिकरेण केसरमिश्रणेन पिञ्जराण्यन्तराणि मध्यभागा यासान्ताभिः अलकाग्रवल्लर्य्योमञ्जर्य्य इवेत्युपमितसमासः । वल्लरी मञ्जरी स्त्रियामित्यमरः । ताभिरलकाग्रवल्लरीभिश्चित्रश्रीर्मकरिकापत्त्रशोभा अलं व्यातेने सम्पादिता । तनोतेः कर्म्मणि लिट् । अत्र चित्रस्य श्रीरिव श्रीरिति निदर्शनाभेदः ॥ ५६ ॥

वक्षोभ्योघनमनुलेपनं यदूना

मुत्तंसानहरत वारि मूर्द्धजेभ्यः ।

नेत्राणाम्मदरुचिरक्ततैव तस्थौ

चक्षुष्यः खलु महतामपैरैरलङ्घ्यः ॥ ५७ ॥

योऽबाह्यः स खलु जलैर्निरासि रागो

यश्चित्ते स तु तदवस्थएव तेषाम् ।

धीराणां व्रजति हि सर्व्वएव नान्तः

पातित्वादभिभवनीयतामपरस्य ॥ ५८ ॥

अथ श्लोकद्वयेन पुंसामप्यवस्थाभेदं वर्णयति । वक्षोभ्य इत्यादि । वारि सरउदकं कर्तृ यदूनां यादवानां वक्षोभ्योघनं सान्द्रमनुलेपनमङ्गरागमहरत । ह्रियतेर्लङ् । अत्र वधूनामिति क्वाचित्कः पाठः वक्षोजानुपेक्ष्य वक्षोमात्रनिर्देशादुत्तरश्लोके तेषामिति पुल्लिङ्गपरामर्शाच्च न ग्राह्यः । मूर्द्धजेभ्यः शिरोरुहेभ्यः उत्तंसान् शेखरानहरत नेत्राणां मदरुचिर्मदरागोऽक्ततैव तथैव तस्थौ वारि विहारस्यापि रागजनकत्वादिति भावः । अतएव रागद्वयस्याप्यभेदाध्यवसायेन तदवस्थानिर्देशादतिशयोक्तिः । तथा हि महता चक्षुषि भवश्चक्षुष्यः प्रियोऽक्षिजश्च । प्रियेऽक्षिजे च चक्षुष्य इति विश्वः । शरीरावयवाच्चेति यत् । परैरलङ्घ्योऽदुर्द्धर्षः खलु । चक्षुष्य इति श्लेषमूलातिशयोक्तिः तया पूर्वोक्तया च सङ्कीर्णोऽयमर्थान्तरन्यासः ॥ ५७ ॥

य इति । तेषां यदूनां बहिर्भवो बाह्यः । बहिषष्टिलोपो यञ्च चेति वचनात् यञ् प्रत्ययः । योऽरागोऽङ्गरागः स रागो जलैर्घो

फेनानामुरसिरुहेषु हारलीला
चेलश्रीर्जघनतलेषु शैवलानाम् ।
गण्डेषु स्फुटरचनाऽपपत्त्रवल्ली
पर्य्याप्तं पयसि विभूषणं वधूनाम् ॥ ५९ ॥

अङ्गैश्च निरासि निरस्तः खलु । अस्यतेः कर्म्मणि लुङ् । चित्ते योरागः स तु सैवावस्था यस्य स तदवस्थएव न निरस्तइत्यर्थः । अत्र रागयोरभेदाध्यवसायादतिशयोक्तिः । तथा हि सर्व्वोऽपि धीराणां महतामन्तःपातित्वादन्तर्गतत्वादेवेति यावत् परस्याभिभवनीयतां न भजति अन्यथा भजत्येवेत्यर्थः पूर्व्ववदलङ्कारः ॥ ५८ ॥

फेनानामिति । वधूनां भ्रष्टभूषणानामपीति भावः पयसि विभूषणं पर्य्याप्तं समग्रमासीदित्यर्थः । कुतः फेनानां डिण्डीराणां उरसि रुहन्तीत्युरसिरुहाः स्तनाः । सुपीति योगविभागात्क प्रत्ययः हलदन्तादित्यलुक् । तेषु हारलीला मुक्तावलिश्रीः जातेति शेषः । शैवलानां जघनतलेषु चेलश्रीर्वस्त्रशोभा जाता । गण्डेषु कपोलेषु शैवलाइति विभक्तिविपरिणामादनुषङ्गः । स्फुटरचना व्यक्तविन्यासाऽपपत्त्रवल्ली पत्रपत्त्रलता जातेति शेषः । अत्र फेनानां हारलीलेव लीला शैवलानां चेलश्रीरिव श्रीरिति निदर्शनाभ्यां शैवलाः पत्त्रवल्लीति रूपकेण च वाक्यार्थैस्तुर्यवाक्यार्थसमर्थकैस्तैरेवाङ्गाङ्गिभावेन सङ्कीर्णं वाक्यार्थहेतुकं काव्यलिङ्गम् ॥ ५९ ॥

भ्रश्यद्भिरिति । वधूनामङ्गेभ्यो भ्रश्यद्भिः पतद्भिर्मृदुभिः सौवर्णं कुसुमकुन्दैर्भूषणैर्लज्जया अंशयुक्तया ह्रियेवेत्युत्प्रेक्षा जलानि

भ्रश्यद्भिर्जलमभि भूषणैर्वधूना-
मङ्गेभ्यो गुरुभिरमज्जि लज्जयेव ।
निर्माल्यैरथ ननृते ऽवधीरितानां-
मप्युच्चैर्भवति लघीयसां हि धार्ष्ट्यम् ॥६०॥
आमृष्टास्तिलकरुचः स्रजो निरस्ता
नीरक्तं वसनमपाकृतो ऽङ्गरागः ।
कामः स्त्रीरनुशयवानिव स्वपक्ष-
व्याघातादिति सुतरांश्चकार चारूः ॥ ६१ ॥

अमज्जि जले मग्नम् । भावे लुङ् । अथानन्तरमेव न तु विलम्बेनेति भावः निर्माल्यैर्भुक्तोज्झितमाल्यैर्ननृते जले अमज्जि भ्रंशेऽपि निर्लज्जैरिति भावः । तथा हि अवधीरितानां तिरस्कृतानामपि लघीयसामुच्चैर्धार्ष्ट्यं निर्लज्जत्वमेवाधिकम्भवतीति अर्थान्तरन्यासः । महान्तः पदभ्रंशे लज्जिताः क्वचिल्लीयन्ते तुच्छास्तु निर्लज्जा विजृम्भन्त इति भावः । अप्सु गुरूणि मज्जन्ति लघूनि प्लवन्त इति परमार्थः ॥ ६० ॥

आमृष्टा इति । तिलकरुचः पत्रशोभाः आमृष्टाः स्रजो माला निरस्ताः वसनं कौसुम्भं वासो नीरक्तमरक्तं निरस्तरागमित्यर्थः । कृतमिति शेषः । अङ्गरागोऽपाकृतः सर्वं च जलैरित्यर्थः । इतीत्थं स्वपक्षव्याघातात् स्ववर्गवधादनुशयवाननुतापवानिवेत्युत्प्रेक्षा । कामः स्त्रीः स्त्रियः । वाम्शसोरितीयङादेशविकल्पात्पक्षे सवर्णदीर्घः । सुतरां चारूः पूर्वतोऽपि रमणीयाश्चकार स्त्रीणां काम एव मुख्यमण्डनं हृद्यमेवेति भावः ॥ ६१ ॥

शीतार्तिं बलवदुपेयुषेव नीरै-
रासेकाच्छिशिरसमीरकम्पितेन ।
रामाणामभिनवयौवनोष्मभाजा-
माश्लेषि स्तनतटयोर्नवांशुकेन ॥ ६२ ॥
श्च्योतद्भिः समधिकमात्तमङ्गसङ्गा-
ल्लावण्यं तनुमदिवाम्बुवाससोऽन्तैः ।
उत्तेरे तरलतरङ्गरङ्गलीला-
निष्णातैरथ सरसः प्रियासमूहैः ॥ ६३ ॥

शीतेति । नीरैस्तोयैरासेकादासेचनात् शीतार्त्तिं शीतव्यथां बलवत् सुष्ठु उपेयुषेव प्राप्तवतेवेत्युत्प्रेक्षा । अतएव शिशिरसमीरकम्पितेन शीतवातवेपितेन नवांशुकेन कर्त्रा अभिनवो यो यौवनोष्मा उष्णत्वं तद्भाजोः रामाणां स्तनतटयोराधारयोराश्लेषि आश्लिष्टं संसक्तं । भावे लुङ् । सेकहेतुकस्यांशुकश्लेषस्य शीतार्त्तिहेतुकत्वमुत्प्रेक्ष्यत इति गुणहेतूत्प्रेक्षा ॥ ६२ ॥

इत्थमासां जलक्रीडामुक्त्वा जलादुत्तरणं वर्णयति । श्च्योतद्भिरिति । अथ जलक्रीडानन्तरमङ्गसङ्गात् गात्रसम्पर्कात् आत्तमुपात्तं संक्रान्तमिति यावत् । समधिकमतिरिक्तं तनुमत् मूर्त्तिमत् लावण्यमिव कान्तिसारमित्युत्प्रेक्षा अम्बु श्च्योतद्भिः क्षरद्भिः । भौवादिकत्वाल्लघूपधगुणः । तरलाश्चपलास्तरङ्गा एव रङ्गा नृत्तस्थानानि तेषु लीलानर्त्तितानि तासु निष्णातैः कुशलैः । निनदीभ्यां स्नातेः कौशले इति षत्वम् । वाससोऽन्तैः वसनप्रान्तैरुपलक्षितैः प्रियासमूहैः स्त्रीसङ्घैः सरसो ह्रदादुत्तेरे उत्तीर्णं निर्गतमित्यर्थः । तरतेर्भावे लिट् ॥ ६३ ॥

दिव्यानामपि कृतविस्मयां पुरस्ता
दम्भस्तः स्फुरदरविन्दचारुहस्ताम्।
उद्वीक्ष्य श्रियमिव काञ्चिदुत्तरन्ती
मस्मार्षीज्जलनिधिमन्थनस्य शौरिः॥ ६४॥
श्लक्ष्णं यत्परिहितमेतयोः किलान्त
र्द्धानार्थं तदुदकसेकसक्तमूर्वोः।
नारीणां विमलतरौ समुल्लसन्त्या
भासान्तर्द्दधतुरूरू दुकूलमेव॥ ६५॥

दिव्यानामिति। दिवि भवा दिव्यास्तेषामपि कृतविस्मयां सौन्दर्यातिरेकेण जनिताद्भुतरसां स्फुरदरविन्दाभ्यां चारू हस्तौ यस्यास्तां पद्महस्तामित्यर्थः पुरस्तादग्रतः अम्भसो जलात्। पञ्चम्यास्तसिल्। उत्तरन्तीं निष्क्रामन्तीं काञ्चित् स्त्रियं मथ्यमानात् समुद्रात् सद्यः प्रादुर्भवन्तीं श्रियमिव लक्ष्मीमिवोद्वीक्ष्य जलनिधिमन्थनस्य समुद्रमन्थनमित्यर्थः। मन्थेर्भावादिकस्ये दित्वान्नुमागमः अधीगर्थेत्यादिना कर्म्मणि षष्ठी। अस्मार्षीत् स्मृतवान्। अत्र समुद्रमन्थनस्मारकया श्रियमिवेत्युपमया सादृश्यात् श्रीः स्मृतेति स्मरणालङ्कारप्रतीतेरलङ्कारध्वनिः॥ ६४॥

श्लक्ष्णमिति। एतयोरूर्वोरन्तर्द्धानार्थं किल छादनार्थं श्लक्ष्णं स्निग्धं यत् दुकूलं परिहितमाच्छादितमुदकसेकेन संसक्तं संश्लिष्टं तत् दुकूलं कर्म विमलतरौ नारीणामुरू पीवरौ ऊरू एव कर्त्तारौ समुल्लसन्त्या स्फुरन्त्या भासा निजकान्त्या अन्तर्द्दधतुः छादितवन्तौ तदेतद्रूपत्वमिति भावः। अत्र दुकूलस्योरुच्छादकत्वेऽपि तद

वासांसि न्यवसत यानि योषितस्ताः
शुभ्राभ्रद्युतिभिरहासि तैर्मुदेव ।
अत्याक्षुः स्नपनगलज्जलानि यानि
स्थूलाश्रुस्रुतिभिररोदि तैः शुचेव ॥ ६६ ॥

भावेऽप्यौकेरसम्बन्धेऽपि सम्बन्धरूपातिशयोक्तिः । तदपेक्षया चोर्वीदुकूलानां छादकयोराच्छादकत्वौकेरसम्बन्धे सम्बन्धरूपातिशयोक्त्यानुप्राणितेति सजातीयसङ्करः तदनुप्राणितस्य विषमालङ्कारः इति विजातीयसङ्करः । तेन चोर्वीलोकोत्तरं लावण्यं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ६५ ॥

वासांसीति । ताः योषितो यानि वासांसि न्यवसत निवसितवत्यः । वस आच्छादन इति धातोः कर्त्तरि लुङ् । शुभ्राभ्राणां द्युतिरिव द्युतिर्येषां तैः वासोभिर्मुदा नारीनिवसनानन्देनाहासीव हसितमिव । भावे लुङ् । स्नपनेन गलज्जलानि स्रवत्तोयानि यानि वासांसि अत्याक्षुः त्यक्तवत्यः तैः शुचा स्थूला अश्रुस्रुतिर्येषां तैः अरोदीव रोदनं कृतमिव । भावे लुङ् । अत्र धावल्यगुणजलगलनक्रियानिमित्तयोर्हासरोदनक्रिययोः सजातीयोत्प्रेक्षयोः सङ्करः ॥ ६६ ॥

आर्द्रत्वादिति । आर्द्रत्वेन प्रेम्णा च सरसत्वादतिशयिनीमतिशयवतीं संसक्तिं संश्लेषं परिचयं चापेयिवद्भिः प्राप्तवद्भिः अतएव भृशं भूरिशो बहुशोऽवधूतैर्निरस्तैरपि अन्यत्र निम्नाङ्गैरपि नवरक्तैरेव नवरक्तकैः नूतनरक्तवस्त्रैर्नवानुरागिभिश्च वाम[illegible] चेतसां [illegible]र्विवेकः वत वेरे कथमपि प्रपेदे प्राप्तः ।

आर्द्रत्वादतिशयिनीमुपेयिवद्भिः
संसक्तिं भृशमपि भूरिशोऽवधूतैः ।
अङ्गेभ्यः कथमपि वामलोचनानां
विश्लेषो वत नवरक्तकैः प्रपेदे ॥ ६७ ॥

प्रत्यंसं विलुलितमूर्द्धजा चिराय
स्नानार्द्रं वपुरुदवापयत् किलैका ।
नाजानादभिमतमन्तिकेऽभिवीक्ष्य
स्वेदाम्बुद्रवमभवत्तरां पुनस्तत् ॥ ६८ ॥

एकत्रातिश्लेषादन्यत्रातिपरिचयाच्चेति भावः । अत्रायमर्थः कामिनीधनपरायणाभिर्वेश्याभिरवधूताः कथञ्चिन्मुक्ता इत्यर्थान्तरप्रतीतिः । इह विशेष्यस्यापि श्लिष्टत्वाच्छब्दशक्तिमूलध्वनिरेव ॥ ६७ ॥

प्रत्यंसमिति । एका स्त्री प्रत्यंसमंसयोः । विभक्त्यर्थेऽव्ययीभावः । विलुलितमूर्द्धजा विकीर्णकेशा सती स्नानार्द्रं वपुः चिराय चिरमुदवापयदशोषयदिति यावत् । वातेर्ण्यन्तात् लङ् । अर्त्तिह्रीत्यादिना पुगागमः । किल खलु पुनस्तद्वपुः अभिमतं प्रियमन्तिकेऽभिवीक्ष्य स्वेदाम्बुनो द्रवन्द्रवमच्: शुक्लादिवत् गुणे पुंसि गुणिनि भेद्यलिङ्गः । आपो द्रवाः सर्पींषि द्रवाणि द्रवद्गुणेन गुणिनीत्यादिप्रयोगात् । अभवत्तरामतिशयेनाभवदित्यर्थः । तिङश्चेति तरप् । किमेत्तिङित्यादिना तिङन्तादामुप्रत्ययः । तद्धितश्चासर्वविभक्तिरित्यव्ययत्वम् । नाजानात् वाक्यार्थः कर्म तद्ध्रुव भवन्न ज्ञासीदित्यर्थः अविरतस्वेदार्द्रतामजानती स्नानार्द्रमेवेति

सीमन्तं निजमनुबध्नती कराभ्या-
मालक्ष्यस्तनतटबाहुमूलभागा।
भर्त्रान्या मुहुरभिलष्यता निदध्ये
नैवाहो विरमति कौतुकं प्रियेभ्यः॥ ६९॥

मन्यमाना पुनः पुनः वपुरुद्दापयन्त्येवास्त इति तात्पर्यार्थः। अत्र वपु मत्कर्तृकस्य वीक्षणस्य वपुष्युपचारात् द्रवणक्रियायाः समान कर्तृकत्वात्पूर्वकालता निर्वाहः एषा च गर्वौत्सुक्यादिसञ्चारिसङ्कीर्ण स्वेदरोमाञ्चादिसात्त्विकसम्पन्ना स्मिताद्यनुभाववती चेत्यनुसन्धेयम्। अत्रोद्दापनरूपकारणे सति द्रवत्वनिवृत्तिरूपकार्य्यानुत्पत्तेस्तद्विरुद्ध द्रवत्वप्रतिपादनमुखेनाभिधानाद्विशेषोक्तिरलङ्कारः। तस्यामप्या मनुत्पत्तिविशेषोक्तिर्निगद्यत इति लक्षणात्॥ ६८॥

सीमन्तमिति। निजमात्मीयं सीमन्तं मूर्द्धजमध्यपद्धतिं। सीमन्तमस्त्रियां स्त्रीणां केशमध्ये तु पद्धतिरिति वैजयन्ती। कराभ्यामनुबध्नती रचयन्ती विभजन्तीत्यर्थः। अतएव या समन्तात् लक्ष्याविभाव्याः स्तनतटे बाहुमूले च तेषां भागाः प्रदेशायस्याः सा अन्या स्त्री अभिलष्यताभिलषता। वा भ्राशेत्यादिना वैकल्पिकः श्यन्प्रत्ययः। भर्त्रा मुहुर्निदध्ये ध्याता तां निरीक्षितेत्यर्थः। निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणमित्यमरः। अहो आश्चर्यं कौतुक मभिलाषः प्रीणन्तीति प्रियाः विषयाः। इगुपधज्ञाप्रीकिरः इति कः। तेभ्यो न विरमति उपभोगेऽपि न निवर्त्तते इति आश्चर्यम्। न जातु कामः कामानामुपभोगेन शाम्यतीति भावः। जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति पञ्चमी आरूपरिभ्योरम इति पर स्मैपदम्। अर्थान्तरन्यासः॥ ६९॥

स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम् ।
वासश्च प्रतनु विविक्तमस्त्वितीया-
नाकल्पो यदि कुसुमेषुणा न शून्यः ॥ ७० ॥

इति धौतपुरन्ध्रिमत्सरान्सरसि मज्जनेन
श्रियमाप्तवतोऽतिशायिनीमपमलाङ्गभासः ।
अवलोक्य तदैव यादवानपरवारिराशेः
शिशिरेतररोचिषाप्यपान्ततिषु मङ्क्षुमीषे ॥ ७१ ॥

स्वच्छेति । स्वच्छेनाम्भसा स्नपनेनाभिषेकेण विधौतं विमलितमङ्गं वपुस्ताम्बूलद्युत्या ताम्बूलरागेण विशद उज्ज्वल ओष्ठोऽधरः प्रतनु सूक्ष्मं विविक्तं विमलं वासश्च अथवा विविक्तमेकान्तस्थानञ्च । विविक्तौ पूतविजनौ इत्यमरः । इत्येवंरूपद्वयमेतावानेव विलासिनीनामाकल्पो नेपथ्यमस्तु किमन्यैरित्यर्थः । कुसुमेषुणा कामेन शून्यो यदि न स्यात् । अन्यथा उद्विजितानामिव कनकभूषणमपि भारायत एवेति भावः । एतेन विच्छित्त्याख्य आलम्बनचेष्टारूप उद्दीपनविभाव उक्तः । स्तोकभूषणयोगेऽपि विच्छित्तिरिति गद्यत इति लक्षणात् । अत्र स्नानताम्बूलादिपदार्थान्वितविशेषणगत्या अङ्गौष्ठादीनामाकल्पत्वप्रतिपादनार्थहेतुकाव्यलिङ्गमलङ्कारः ॥ ७० ॥

अथोत्तरसर्गे सूर्यास्तमयादिवर्णनं प्रस्तौति । इतीति । इतीत्थं सरसि मज्जनेन स्नानेन धौतपुरन्ध्रिमत्सरान् क्षालितमानिनीमानान् अभीक्ष्णमतिशेते अतिशायिनीं । आभीक्ष्ण्ये णिनिः ।

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
जलविहारवर्णनं नामाष्टमः सर्गः ॥ ८ ॥

श्रियमाप्तवतः अपमलाङ्गभासो विमलाङ्गकान्तीन् यादवानवलोक्य तदैव शिशिरेतररोचिषा उष्णांशुनाप्यपरवारिराशेः पश्चिमाब्धेरपाम्पतिषु पूरेषु मङ्क्तुं प्रवेष्टुमीषे इष्टम्। भावे लिट्। परश्रेष्ठा साक्षात्कारो विषयिणां तादृग्विषयाभिलाषमन्तराधत्त इति भावः। अत्र भानोः कालप्राप्तमज्जनस्य यादवमज्जनावलोकनहेतुकत्वमुत्प्रेक्ष्यते। अतिशायिनी वृत्तम्। सभजाभगौ ऽतिशायिनी भवति गौ। दिगश्वैरिति छन्दोलक्षणात् ॥ ७१ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्वङ्कषाख्येऽष्टमः सर्गः ॥ ८ ॥

अभितापसम्पदमथोष्णरुचि-
र्निजतेजसामसहमान इव ।
पयसि प्रपित्सुरपराम्बुनिधे-
रधिरोढुमस्तगिरिमभ्यपतत् ॥ १ ॥

गतया पुरः प्रतिगवाक्षमुखं
दधती रतेन भृशमुत्सुकताम् ।
मुहुरन्तरालभुवमस्तगिरेः
सवितुश्च योषिदमिमीत दृशा ॥ २ ॥

अथ सूर्य्यास्तमयं वर्णयति । अभितापेति । अथ मिमङ्क्षानन्तरमुष्णरुचिः सूर्य्यो निजतेजसामभितापसम्पदं सन्तापातिरेकमसहमान इवापराम्बुनिधेः पश्चिमाब्धेः पयसि प्रपित्सुः पतितुमिच्छुः । पततेः सन्नन्तादुप्रत्ययः सनि मीमेत्यादिना इसादेशः लोपोऽभ्यासस्येत्यभ्यासलोपः । अस्तगिरिमस्ताद्रिम् । अस्तस्तु चरमक्ष्माभृदित्यमरः । अधिरोढुमभ्यपतत् अभ्यधावत् । असहमान इवेति कालप्राप्तस्य पयसि प्रपातस्य निजतेजोऽसहनहेतुकत्वमुत्प्रेक्ष्यते । अस्मिन्सर्गे प्रमिताक्षरा वृत्तम् । प्रमिताक्षरा सजससैरुदितेति लक्षणात् ॥ १ ॥

गतयेति । रतेन रत्यर्थे । प्रसितोत्सुकाभ्यां तृतीया चेति सप्तम्यर्थे तृतीया । भृशमुत्सुकतां कालाक्षमत्वलक्षणमौत्सुक्यन्दधती योषित् पुरोऽग्रे गवाक्षमुखङ्गवाक्षद्वारम्प्रति गतया अपसृतया दृशा अस्तगिरेः सवितुश्चान्तरालभुवं मध्याकाशदेशं मुहुरमिमीत मातिस्म । हस्तमात्रमवशिष्टमरत्निमात्रमवशिष्टमित्यादिमानकरणेना

विरलातपच्छविरनुष्णवपुः
परितोविपाण्डु दधदभ्रशिरः।
अभवद्गतः परिणतिं शिथिलः
परिमन्दसूर्य्यनयनोदिवसः ॥ ३ ॥
अपराह्णशीतलतरेण शनै
रनिलेन लोलितलताङ्गुलये।
निलयाय शाखिनइवाह्वयते
ददुराकुलाः खगकुलानि गिरः ॥ ४ ॥

स्तमयं प्रतीक्षितवतीत्यर्थः। माङोलुङि सनाविति द्विर्भावः म्टजामि दित्याभ्यासस्येलम्। एतयास्तमयप्रतीक्षणभ्रमादौत्सुक्यानुभवा न्तरोपलक्षणं अनौत्सुक्यभाववचनात् प्रेयोलङ्कारः ॥ २ ॥

विरलेति। परिणतिं परिवृत्तिं अन्यत्र जरावस्थाञ्च गतः अतएव विरला अल्पा आतपस्य छविर्यस्य सः अन्यत्र चीणप्रभः अनुष्णवपुः अन्यत्र सेभादयादीषदुष्णदेहः। अलवणा यवागूरिति वत् अल्पार्थे नञ्प्रयोगः। परितोविपाण्डु एकत्र शुभ्राभ्रपटल च्छन्नत्वादपरत्र पलितैश्च पाण्डुरमभ्रमाकाशमेव शिरोदधद्दधत् परिमन्दं प्रशान्तं अर्थग्रहणासमर्थञ्च सूर्य्यएव नयनं यस्य स दिवसः शिथिलः शिथिलवृत्तिः शिथिलाङ्गश्चाभवत्। अत्राभ्रशिर इत्याद्यवयवरूपणाद्दिवसएव स्थविर इत्यवयविरूपकमिद्धेस्तद्रूपणा देकदेशवृत्तिरूपकं सेषानुप्राणितम् ॥ ३ ॥

अपराह्णेति। अपरोऽपरभागोऽह्नोऽपराह्णो दिनान्तः। पूर्व्वा पराधरोत्तरमेकदेशिनैकाधिकरणे इत्येकदेशिसमासः राजाहः

उपसन्ध्यमास्त तनु सानुमतः
शिखरेषु तत्क्षणमशीतरुचः ।
करजालमस्तसमयेऽपि सता
मुचितं खलूच्चतरमेव पदम् ॥ ५ ॥

प्रतिकूलतामुपगते हि विधौ
विफलत्वमेति बहुसाधनता ।
अवलम्बनाय दिनभर्तुरभू
न्न पतिष्यतः करसहस्रमपि ॥ ६ ॥

सखिभ्यष्टच् अङ्गोऽङ्गुलनेभ्यश्चत्यङ्गादेशः अङ्गोऽदन्तादिति णत्वम् । तस्मिन्नपराह्णे शीतलतरेणानिलेन शनैर्लोलिताश्चालिता लता एवाङ्गुलयो यस्य तस्मै अतएव निलयाय निवासायाकृष्यते अङ्गुलिसंज्ञया आह्वानं कुर्वाणाय इव स्थितायेत्युत्प्रेक्षा । शाखिने वृक्षाय खगकुलानि पक्षिसङ्घा आकुलास्तुमुलाः गिरः इदमागम्यत इति प्रत्युत्तराणि ददुरिवेत्यनुषङ्गादुत्प्रेक्षा ॥ ४ ॥

उपसन्ध्यमिति । उपसन्ध्यं सन्ध्यायाः समीपे । समीपार्थेऽव्ययीभावे नपुंसकत्वाद्ध्रस्वत्वम् । अशीतरुचउष्णांशोः तनु करजालमल्पं तस्मिन् क्षणे तत्कालेऽपीत्यर्थः । अत्यन्तसंयोगे द्वितीया । सानुमतोऽद्रेः शिखरेष्वास्तातिष्ठत् । आसेः कर्त्तरि लङ् । सतामस्तसमये नाशसमयेऽप्युच्चतरमेव पदमुन्नतस्थानमेवोचितं खलु । अर्थान्तरन्यासः ॥ ५ ॥

प्रतिकूलतामिति । विधौ दैवे प्रतिकूलतामुपगते सति बहुसाधनता अनेकसाधनवत्त्वं विफलत्वमेति सत्यपि साधनसम्पत्ति

नवकुङ्कुमारुणपयोधरया
स्वकरावसक्तरुचिराम्बरया ।
अतिसक्तिमेत्य वरुणस्य दिशा
भृशमन्वरज्यदतुषारकरः ॥ ७ ॥

निष्फलैवेत्यर्थः । तथा हि पतिष्यतश्चासन्नपातस्य दिनभर्त्तुः करा अशेषा हस्ताश्च । बलिहस्तांशवः करा इत्यमरः । तेषां सहस्रमपि अवलम्बनायावष्टम्भनाय नाभूत् अतो दैवमेव प्रबलमिति भावः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६ ॥

नवेति । अतुषारकर उष्णांशुः नवकुङ्कुमवदरुणपयोधरया नवसन्ध्यारुणमेघया अन्यत्र नवकुङ्कुमारुणकुचया स्वकरावसक्तरुचिराम्बरया स्वकिरणाक्रान्तरुचिराकाशया अन्यत्र स्वहस्तलग्नचारुवस्त्रया वरुणस्य दिशा पश्चिमदिशा सहेत्यर्थः । वरुणसम्बन्धात्पराङ्गनात्वं च गम्यते । वृद्धो यूनेति सूत्रादौ सहार्थप्रयोगात्सहार्थानामप्रयोगेऽपि सहयुक्तेऽप्रधाने इति सहार्थे तृतीया । अतिसक्तिमति सन्निकर्षमत्यासक्तिञ्च एत्य प्राप्य भृशमन्वरज्यत् लोहितो रक्तश्चाभवत् । रञ्जेर्दैवादिकात्कर्त्तरि लङ् । कुषिरञ्जोःप्राचां श्यन् परस्मैपदञ्चेति कर्मकर्त्तरि वा । अत्र वारुणीदिनकरादिविशेषणमहिम्नैव तयोर्जारभावप्रतीतेः समासोक्तिरलङ्कारः ॥ ७ ॥

गतवतीति । अपाकुसुमस्तवकद्युतौ लोहितवर्णे दिनकरेऽवनतिमस्ताङ्गनवति सति लम्बमाने सतीत्यर्थः । दिग्वलयं दिङ्मण्डलं कङ्कणञ्च ध्वन्यते । बहलानुरागैः सान्द्ररागैः कुरुविन्ददलैः पद्मरागशकलैः प्रतिबद्धः प्रत्युप्तमध्यो यस्य तद्दिवाराजत

गतवत्यराजत जपाकुसुम
स्तवकद्युतौ दिनकरेऽवनतिम् ।
बहलानुरागकुरुविन्ददल
प्रतिबद्धमध्यमिव दिग्वलयम् ॥ ८ ॥

द्रुतशातकुम्भनिभमंशुमतो
वपुरर्द्धमग्नवपुषः पयसि ।
रुरुचे विरिञ्चिनखभिन्नबृह
ज्जगदण्डकैकतरखण्डमिव ॥ ९ ॥

इत्युत्प्रेक्षा । कुरुविन्दस्तु मुस्तायां कुल्माषव्रीहिभेदयोः इङ्गुदे पद्मरागे च मुकुलेऽपि समीरित इति विश्वः ॥ ८ ॥

द्रुतेति । द्रुतन्तप्तं यत् शातकुम्भन्तपनीयम् । तपनीयं शातकुम्भमिति सुवर्णपर्यायेष्वमरः । तेन सदृशन्तन्निभमिति नित्यसमासः । पयसि समुद्रोदके अर्द्धं यथा तथा मग्नं वपुर्यस्य तस्यांशुमतोऽर्कस्य मण्डलं विरिञ्चेर्ब्रह्मणो नखेन विभिन्नस्य द्वेधा विदलितस्य बृहतो महतो जगदण्डकस्य जगदाश्रयकोषस्य ब्रह्माण्डकस्यैकतरखण्डमन्यतरदलमिव रुरुचे रराज । अत्रोपमानस्य पुराणप्रसिद्धत्वादुपमालङ्कारः ॥ ९ ॥

अनुरागवन्तमिति । अपरदिक् पश्चिमा सैव गणिका वेश्या अनुरागो लौहित्यमभिलाषश्च तद्वन्तमपि लोचनयोः सुखयतीति सुखं सुखकरं शान्तत्वादाभिरूप्याच्च दर्शनीयं वपुर्दधतमपीति अतापकरमनौष्ण्यादशठत्वाच्चासन्तापकारिणं सुखस्पर्शं वा तथाप्येतवसुमीरश्मिं निर्धनञ्च । देवभेदे नले रश्मौ वसुरत्ने धने

अनुरागवन्तमपि लोचनयो
र्दधतं वपुः सुखमतापकरम्।
निरकाशयद्रविमपेतवसुं
वियदालयादपरदिग्गणिका ॥ १० ॥
अभितिग्मरश्मि चिरमाविरमा
दवधानखिन्नमनिमेषतया।
विगलन्मधुव्रतकुलाश्रुजलं
न्यमिमीलदब्जनयनं नलिनी ॥ ११ ॥

वस्वित्यमरः। रविः सूर्य्यो विटश्च गम्यते तं वियदाकाशमेवालयो गृहन्तस्मान्निरकाशयत् निष्काशितवती। धनपरा हि वेश्या निर्गुण मपि धनिकमासर्व्वस्वहरणादत्यनुरक्तवदनुवर्त्तते गुणवन्तमपि हृतसर्व्वस्वं निर्व्वासयन्ति सद्य एवेति भावः। अस्तङ्गतोऽर्क इति श्लोकार्थः। अत्र वियदालयादपरदिग्गणिकेत्येकदेशरूपणा द्रवेर्विटत्वरूपणावगमादेकदेशवर्त्ति रूपकं श्लेषोऽपि तदुत्थापितत्वा दनुराग एवानुरागो वसव एव च वसूनीति रूपकपर्य्यवसित एवेत्युक्तम् ॥ १० ॥

अभीति। नलिनी अभितिग्मरश्मि सूर्य्याभिमुखं चिरमाविरमा दस्तमयादनिमेषतया अपक्ष्मपाततया दलसङ्कोच एवात्र निमेषः। अवधानेनाभिमुखावस्थाननिर्ब्बन्धेन खिन्नमलसं अत एव विगलद्भिः सरन्मधुव्रतकुलमेवाश्रुजलं यस्य तदब्जमेव नयनं न्यमिमीलत्। मीलयति स्म। भ्राजभासेत्यादिना विकल्पादुपधाह्रस्वः अत एव नाभ्यासदीर्घः। अनुरक्ता हि कान्ता कान्तमनिमेषं पश्यन्ती

अविभाव्यतारकमदृष्टहिम
द्युतिबिम्बमस्तमितभानु नभः ।
अवसन्नतापमतमिस्रमभा
दपदोषतैव विगुणस्य गुणः ॥ १२ ॥

तदपाये सति निमीलिताक्षी स्यादिति भावः। अत्राप्यञ्जनयनमित्या द्युत्रयनरूपणादवयविनोर्नलिनीतिग्मरश्म्योर्नायिकानायकत्वरूपक मिद्धेरेकदेशविवर्त्ति रूपकम् ॥ ११ ॥

अविभाव्येति । अविभाव्यतारकमलक्ष्यनक्षत्रं अदृष्टं हिमद्युते रिन्दोर्बिम्बं यस्मिन तत् अद्याप्यनुदितचन्द्रतारकमित्यर्थः । अस्त मित्यदर्शनेऽव्ययम्। अस्तमितोऽस्तङ्गतोभानुर्यस्मिन् तत् एतावता निर्गुणत्वमुक्तम् । अथ निर्दोषत्वमाह । अवसन्नतापं अक्रान्त मयात्प्रशान्तसन्तापं अतमिस्रमनुदितान्धकारं नभोऽन्तरीक्षमभात् भाति स्म । भातेर्लङ् । ननु निर्गुणस्य का शोभेति न वाच्यं निर्दोषताया अपि गुणत्वादित्यर्थान्तरन्यासेनाह । विगुणस्य गुण हीनस्यापदोषता निर्दोषत्वमेव गुणः अतोगुणवत्त्वाच्छोभा युक्तेति कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ १२ ॥

रुचीति । रुचिधाम्नि तेजोनिधौ सूर्य्ये भर्त्तरि पत्यौ परलोकं देशान्तरमभ्युपगते मृते च सति विमलाः शुद्धाः स्त्रियोऽनलं विविशुः। अग्निं वावादित्यः सायम्प्रविशतीति श्रुतेरिति भावः। अन्यच मृते या म्रियते पत्यौ सा स्त्री ज्ञेया पतिव्रतेति स्मरणादिति भावः। अग्निप्रवेशफलमाह। इतरथा ज्वलनाप्रवेशे अन्यजन्मनि जन्मान्तरे स एव स सूर्य्यएव पतिः अन्यच तु योऽस्मिन् जन्मनि

रुचिधाम्नि भर्त्तरि भृशं विमलाः
परलोकमभ्युपगते विविशुः ।
ज्वलनं त्विषः कथमिवेतरथा
सुलभोऽन्यजन्मनि स एव पतिः ॥ १३ ॥

विहिताञ्जलिर्जनतया दधती
विकसत्कुसुम्भकुसुमारुणताम् ।
चिरमुज्झितापि तनुरौज्झदसौ
न पितृप्रसूः प्रकृतिमात्मभुवः ॥ १४ ॥

पतिः स एव कथं सुलभो न कथञ्चिदित्यर्थः । उद्यन्तं वावादित्यमग्निरनुसमारोहतीति श्रुतेः । तेनैव सह मोदत इति स्मरणादिति भावः । अतोऽग्निप्रवेशो युक्त इति समर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ १३ ॥

अथ सन्ध्याप्रादुर्भावमाह । विहितेति । जनतया जनसमूहेन । ग्रामजनेत्यादिना समूहार्थे तल्प्रत्ययः । विहिताञ्जलिः कृतप्रणामेत्यर्थः विकसत्कुसुम्भकुसुमवदरुणतान्दधती राजसत्वादिति भावः । तदुक्तं सर्गाय रक्तं रजसोपबृंहितमिति । प्रसूतइति प्रसूर्माता । जनयित्री प्रसूर्मातेत्यमरः । पितॄणां प्रसूः पितृप्रसूः असाविरं सन्ध्यारूपिणी आत्मभुवो ब्रह्मणस्तनुर्मूर्त्तिश्चिरमुज्झितात्यक्तापि प्रकृतिं स्वभावञ्जगदन्धत्वादि निजधर्ममित्यर्थः नौज्झत् न विससर्ज । उज्झ विसर्गे लङ् आडजादीनामित्याडागमः आटश्चेति वृद्धिः । भूतपूर्वोऽपि महाजनपरिग्रहः फलतीति भावः । पितामहः पितॄन् सृष्ट्वा मूर्त्तिन्तामुत्ससर्जह । सा प्रातः सायमागत्य

अथ सान्द्रसान्ध्यकिरणारुणितं
हरिहेतिहूति मिथुनं पततोः ।
पृथगुत्पपात विरहार्त्तिदल
द्धृदयस्रुतासृगनुलिप्तमिव ॥ १५ ॥

सन्ध्यारूपेण पूज्यत इत्यादि भविष्यपुराणमत्र प्रमाणम् । अत्र तनुत्यागरूपकारणसद्भावेऽपि प्रकृतित्यागरूपकार्य्यानुदयाद्विशेषोक्तिरलङ्कारः । तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यत इति लक्षणात् ॥ १४ ॥

अथेति । अथ सन्ध्योदयानन्तरं सान्द्रायै सान्ध्याः सन्ध्याया भवाः । सन्धिवेलाद्यृतुनक्षत्रेभ्योऽणित्यण्प्रत्ययः । तैः किरणैररुणितमरुणीकृतमतएव विरहार्त्त्या विरहवेदनया दलतो दीर्य्यमाणात् हृदयात् स्रुतेन क्षरितेनासृजा रुधिरेणानुलिप्तमिव स्थितमित्युत्प्रेक्षा । हरेर्विष्णोर्हेतिरायुधञ्चक्रमित्यर्थः । हेतिः शस्त्रे तु न्टस्त्रियोरिति केशवः । हरिहेतेर्हूतिरिव हूतिराह्वा यस्य तद्धरिहेतिहूति चक्राह्वमित्यर्थः । पततोः पक्षिणोः । पतत्रिपक्षिपतगपतत्पत्त्ररथाण्डजा इत्यमरः । मिथुनं चक्रवाकद्वन्द्वमित्यर्थः । पृथक् भेदेनोत्पपात उदडीयत ॥ १५ ॥

निलय इति । यदेव जले जन्म यस्य तज्जलजन्म जलजमेतदेव सततं श्रियो निलय आलय इति प्रथितं प्रसिद्धम् । निकाय्यनिलयालया इत्यमरः । तदपि नित्यवासभूतमपीत्यर्थः । तया श्रिया दिवसात्यये सायङ्काले मुक्तं अहो देवानामपि कृतघ्नत्वं यदापदि महोपकारिणस्त्याग इत्याश्चर्य्यम् । अथ वा चपला चापलवती स्त्री

निलयः श्रियः सततमेतदिति
प्रथितं यदेव जलजन्म तया ।
दिवसात्ययात्तदपि मुक्तमहो
चपलाजनं प्रति न चोद्यमदः ॥ १६ ॥

दिवसोऽनुमित्रमगमद्विलयं
किमिहास्यते बत मयाऽबलया ।
रुचिभर्त्तुरस्य विरहाधिगमा
दिति सन्ध्ययापि सपदि व्यगमि ॥ १७ ॥

कमला च । चपला कमलाविद्युत्पुंश्चलीपिप्पलीषु चेति विश्वः । सैव जनश्चपलाजनः । जातेश्चेति सञ्ज्ञापूरण्योश्चेति चोभयत्रापि पुंवद्भावप्रतिषेधः । तम्प्रति तस्मिन्नित्यर्थः । अदइदं कृतघ्नत्वं चोद्यं चोदनीयं कथमित्याक्षेप्यं न चपलत्वान्नाश्चर्य्यमेतदिति भावः । श्लेषमूलातिशयोक्त्यनुप्राणितोऽयमर्थान्तरन्यासः ॥ १६ ॥

दिवसइति । दिवसोवासरः पुमानिति भावः । मित्रं सूर्य्यं सुहृदञ्चानु मित्रेण सहेत्यर्थः । तृतीयार्थे इत्यनोः कर्म्मप्रवचनीयत्वाद्द्वितीया । मित्रं सुहृदि मित्रोऽर्के इति विश्वः । विलयं नाशमगमद्गतः । गमेर्लुङि पुषादित्वात् च्लेरङादेशः । अबलया स्त्रिया मया रुचिभर्त्तुस्तेजोनिधेः प्रेमास्पदपतेश्चास्य सूर्य्यस्य विरहाधिगमात् । ल्यब्लोपे पञ्चमी । विरहञ्ज्ञानं प्राप्येत्यर्थः । इहास्मिँल्लोके किमास्यते किमर्थं स्थीयते । आसेर्भावे लिट् । बतेति खेदे इतीत्यमालोच्येवेत्यर्थः । अतएव उत्प्रेक्षा । सन्ध्यापि सपदि

पतिते पतङ्गमृगराजि निज-
प्रतिबिम्बरोषित इवाम्बुनिधौ ।
अथ नागयूथमलिनानि जग-
त्परितस्तमांसि परितस्तरिरे ॥ १८ ॥

अगमि व्यपागामीत्यर्थः । गमेः स्वार्थण्यन्ताद्भावे लुङ् मित्वाद्ध्रस्वः । अण्यन्तादुपधावृद्धिर्नायं स्याद्धेतुमण्णिचि । तस्मात्स्वार्थे णिजुत्पाद्यो मितां ह्रस्वो यतो भवेत् । विगमशब्दात्तत्करोतीति ण्यन्ताल्लुङिति केचित् ॥ १७ ॥

अथान्धकारं वर्णयति । पतित इति । पतङ्गोऽर्क एव मृगराट् सिंह इति रूपकसमासः । तस्मिन्निजेन प्रतिबिम्बेन रोषिते कोपित इवेत्युत्प्रेक्षा । स्वप्रतिबिम्बे प्रतिसिंहभ्रमादिति भावः । अत एवाम्बुनिधौ पतिते सति तज्जिघांसयेति भावः । भावलक्षणसप्तमी । अथास्य पतनानन्तरं नागयूथानि करिकुलानीव मलिनानि श्यामानि । उपमानानि सामान्यवचनैरिति समासः । तमांसि जगल्लोकं परितः परितस्तरिरे आच्छादयामासुः । स्तृणातेः कर्त्तरि लिट् । ऋतश्च संयोगादेर्गुणः । अत्र यद्यपि नागयूथमलिनानीत्युक्त्यानुशासनसिद्धोपमानुसारात् पतङ्गमृगराजीत्यत्राप्युपमितसमासाश्रयणेनोपमैवोचिता तथापि तदुत्प्रेक्षायाः पतङ्गेऽसम्भवात् सिंहे सम्भवाच्च रूपकमेव युक्तम् । तथा च रूपकानुप्राणितोत्प्रेक्षेयमुपमेति च सङ्करः । तच्चोत्प्रेक्षया भ्रान्तिमदुपमया रूपकश्च व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिरिति सङ्क्षेपः ॥ १८ ॥

व्यसरन्नु भूधरगुहान्तरतः
पटलं बहिर्बहलपङ्करुचि ।
दिवसावसानपटुनस्तमसो
बहिरेत्य चाधिकमभक्त गुहाः ॥ १९ ॥
किमलम्बताम्बरविलग्नमधः
किमवर्द्धतोर्द्ध्वमवनीतलतः ।
विससार तिर्य्यगथ दिग्भ्य इति
प्रचुरीभवन्न निरधारि तमः ॥ २० ॥
॥ युग्मम् ॥

व्यसरदिति । बहलपङ्करुचि सान्द्रकर्दमच्छवि दिवसावसाने दिनान्ते पटुनः समर्थस्य तमसः पटलम्भूधरगुहानामन्तरतोऽभ्यन्तरादेत्यागत्य बहिर्गवाक्षप्रदेशे व्यसरन्नु विसृतं वा बहिर्बाह्यदेशादेत्य गुहा अधिकम्भृशमभक्त च भजते स्म किमाविष्टं वेत्यर्थः । भजतेर्लुङि तङ् झरो झरीति सकारलोपः । अत्र व्यापकत्वसादृश्यात्तमसोऽन्तर्बहिरपादानकत्वसन्देहात्सन्देहालङ्कारः ॥ १९ ॥

किमिति । प्रचुरीभवद्बहुलीभवत्तमः कर्त्तृ किमम्बरविलग्नमाकाशस्थं सत् अधो भूतलम्प्रति अलम्बतालंबत किमिव अवनीतलतो भूतलादूर्द्ध्वमुपरिष्टादवर्द्धत किं अथ दिग्भ्यस्तिर्य्यग्विससार विसृतमिति न निरधारि अधोलम्बनादीनामन्यतमत्त्वावधारितमित्यर्थः । धारयतेः कर्म्मणि लुङ् । अत्रापि पूर्ववत्सन्देहालङ्कारः ॥ २० ॥

स्थगिताम्बरक्षितितले परित
स्तिमिरे जनस्य दृशमन्धयति ।
दधिरे रसाञ्जनमपूर्व्वमतः
प्रियवेश्मवर्त्म सुदृशो ददृशुः ॥ २१ ॥
अवधार्य्य कार्य्यगुरुतामभव
न्न भयाय सान्द्रतमसन्तमसम् ।
सुतनोः स्तनौ च दयितोपगमे
तनुरोमराजिपथवेपथवे ॥ २२ ॥

स्थगितेति । स्थगिते तिरोहिते अम्बरक्षितितले येन तस्मिन् तिमिरे परितो जनस्य दृशमन्धयति अन्धाङ्कुर्वति सति सुदृशः स्त्रियोऽपूर्व्वं नूतनं रसाञ्जनं रसं रागमेवाञ्जनं सिद्धाञ्जनञ्च दधिरे दधुः अतोहेतोः प्रियवेश्मवर्त्म ददृशुः । अत्र रसाञ्जन वाक्यार्थेन प्रियवेश्मदर्शनसमर्थनाद्वाक्यार्थहेतुकं काव्यलिङ्ग मलङ्कारः । तेन रसः सिद्धाञ्जनमिवेत्युपमाध्वननादलङ्कारेणा लङ्कारध्वनिः ॥ २१ ॥

अवधार्य्येति । सान्द्रतमं यत्सन्तमसं व्यापकन्तमः । विष्वक्स न्तमसमित्यमरः । अवसमन्धेभ्यस्तमस इति समासान्तोऽच् प्रत्ययः । तत्कर्त्तृ सुतनोः शुभाङ्ग्यादयितोपगमे प्रियाभिसरणे कार्य्य गुरुतां सम्भोगकार्य्यस्यावश्यकत्वमवधार्य्य निश्चित्य भयाय नाभवत् । स्तनौ कुचौ च तनुः कृशा यो रोमराजेः पन्थाः रोमराजिपथो मध्य भागस्तस्य वेपथवे कम्पाय । ट्वितोऽथुजित्यथुच् प्रत्ययः । नाभवता मिति विपरिणामेनानुषङ्गः कार्य्यासक्तस्य तत्रापि कामुकस्य कुतो

दद्दृशेऽपि भास्कररुचाऽह्नि न यः
स तमीं तमोभिरभिगम्य ततम् ।
द्युतिमग्रहीद्ग्रहगणो लघवः
प्रकटीभवन्ति मलिनाश्रयतः ॥ २३ ॥

अनुलेपनानि कुसुमान्यबलाः
कृतमन्यवः पतिषु दीपशिखाः ।
समयेन तेन चिरसुप्तमनो-
भवबोधनं सममबोधिषत ॥ २४ ॥

भयं क्लेशगणना चेति भावः । अत्र सन्तमसकुचयोः कामनिमित्ते भयकम्पानुदये कार्य्यगौरवावधारणहेतुकत्वोत्प्रेक्षेयमनेन व्यज्यते ॥ २२ ॥

दद्दृश इति । योग्रहगणोऽहनि सवितुस्त्विषा न दद्दृशे नेक्षितः । स ग्रहगणस्तमोभिस्ततां व्याप्तान्ताम्यन्त्यस्यामिति तमीं रात्रिम् । रजनी यामिनी तमीत्यमरः । अधिगम्य प्राप्य द्युतिमग्रहीत् । ग्रहेर्लुङि ग्रहोऽलिटीति दीर्घः । तथा हि लघवोऽल्पाः । चिल्लिष्टेऽल्पे लघुरित्यमरः । मलिनाश्रयतो निकृष्टाश्रयणात्प्रकटीभवन्ति । अर्थान्तरन्यासः ॥ २३ ॥

अनुलेपनानीति । तेन समयेन प्रदोषकालेन कर्त्रा अनुलेपनानि कुङ्कुमचन्दनादीनि कुसुमानि माल्यादीनि । तथा पतिषु कृतमन्यवः कृतकोपाः अबलाः स्त्रियः तथा दीपशिखादीपज्वालाश्चेत्येतानि सर्वाणि चिरं सुप्तस्य पूर्व्वं स्तब्धस्य मनोभवस्य कामस्य बोधन मुद्दीपनं यस्मिन् कर्म्मणि तद्यथा तथा तत्पूर्व्वकमित्यर्थः । इतरथा

वसुधान्तनिःसृतमिवाहिपतेः
पटलं फणामणिसहस्ररुचाम् ।
स्फुरदंशुजालमथ शीतरुचः
ककुभं समस्कुरुत माघवनीम् ॥ २५ ॥

अनुलेपनादिबोधकस्य वैफल्यासम्भवाच्चेति भावः । समं सद्यैवावबोधिषत बोधितानि । बुध्यतेर्ण्यन्तात्कर्मणि लुङ् । अत्र गन्धमाल्यसम्पादनस्य मनःप्रसाददीपशिखोत्पादनानामबोधिषतेत्येकेन श्लिष्टशब्देनाभिधानात् श्लेषमूलाभेदाध्यवसायरूपातिशयोक्तिरेका । तथा सुप्तमनोभवबोधनमिति क्रियाविशेषणसामर्थ्यात्सममिति यौगपद्याभिधानाच्च मनोभवबोधनयोः कार्य्यकारणभूतयोस्तद्विपर्य्ययरूपाऽपरा तदुभयापेक्षया गन्धमाल्यादीनां प्रस्तुतानामवबोधनरूपैकधर्म्मसम्बन्धात्तुल्ययोगिताभेदश्चेति सङ्करः ॥ २४ ॥

अथ चन्द्रोदयवर्णनं प्रारभते । वसुधेति । अथ मनःप्रसादानन्तरं वसुधान्तेन भूप्रान्तेन निःसृतं बहिर्निर्गतमहिपतेः शेषस्य फणामणिसहस्राणां रुचाम्भासाम्पटलं स्तोमइवेत्युत्प्रेक्षा । शीतरुचश्चन्द्रस्य सम्बन्धि स्फुरदुच्चरदंशुजालं मघोनइमां माघवनीं माहेन्द्रीम् । मघवाबहुलमिति विकल्पात्त्रादेशः । ककुभन्दिशं समस्कुरुत अभूषयत प्राच्यान्दिशि चन्द्रकिरणजालमलक्ष्यतेत्यर्थः । सम्पर्य्युपेभ्यः करोतौ भूषणइति सम्पूर्वस्य सुडागमः अडभ्यासव्यवायेऽपीति नियमात् ॥ २५ ॥

विशदेति । विशदप्रभापरिगतं शुभ्रकान्तिव्याप्तम् । उदयइति अचलः । उदयः पूर्व्वपर्वतइत्यमरः । तेन व्यवहितमिन्दुवपु

विशदप्रभापरिगतं विबभा
वुदयाचलव्यवहितेन्दुवपुः।
मुखमप्रकाशदशनं शनकैः
सविलासहासमिव शक्रदिशः ॥ २६ ॥

कलया तुषारकिरणस्य पुरः
परिमन्दभिन्नतिमिरौघजटम्।
क्षणमभ्यपद्यत जनैर्न मृषा
गगनं गणाधिपतिमूर्त्तिरिति ॥ २७ ॥

रिन्दुमण्डलं यस्मिन् तच्छक्रदिशः प्राच्याः मुखमग्रभागः वक्त्रञ्च प्रतीयते तदभेदेनोत्प्रेक्ष्यते अप्रकाशदशनमलक्ष्यदन्तं सविलासहासं सविलासस्मितमिव शनकैर्मन्दं विबभौ ॥ २६ ॥

कलयेति । पुरः प्राच्यामग्रभागे च तुषारकिरणस्येन्दोः कलया किरणेन अन्यत्रोपलक्षितं परिमन्दमल्पभिन्नाविदलितास्तिमिरौघाएव जटा यस्य तत् गगनं न मृषा सत्यङ्गणाधिपतेः प्रमथपतेरीश्वरस्य । गणाः प्रमथसङ्घौघादइति वैजयन्ती । मूर्त्तिरिति जनैः क्षणमभ्यपद्यत गगनमष्टानां शिवमूर्त्तीनामन्यतममिति यत् तत्सत्यमभिपन्नमित्यर्थः । कलामात्रोदितश्चन्द्रइति फलितार्थः । रूपकालङ्कारः ॥ २७ ॥

नवेति । नवचन्द्रिकाभिरेव कुसुमैः कीर्णं तमएव कवरी केशपाशः । जानपदेत्यादिना ङीप् । तां बिभर्त्तीति तद्भृतः हरेः शक्रस्य हरितो दिशो मुखेऽग्रभागएव मुखं वक्त्रमिति श्लिष्टरूपकस्यैव ललाटतटवद्धारि मनोहरं हिमरश्मिरश्मिखण्डं मलय

नवचन्द्रिकाकुसुमकीर्णतमः
कवरीभृतोमलयजार्द्रमिव ।
ददृशे ललाटतटहारि हरे-
र्हरितोमुखे तुहिनरश्मिदलम् ॥ २८ ॥

प्रथमं कलाऽभवदथार्द्धमथो
हिमदीधितिर्महदभूदुदितः ।
दधति ध्रुवं क्रमश एव न तु
द्युतिशालिनोऽपि सहसोपचयम् ॥ २९ ॥

जेन चन्दनेनार्द्रमिव ददृशे धावल्यादिति भावः । अत्र नवचन्द्रिका कुसुमेत्याद्येकदेशविवर्त्तिरूपकमहिम्ना हरिवधूत्वप्रतीतौ तत्सहकृत सेवागतत्वाभेदाध्यवसितमुखसम्बन्धप्रसादासादितललाटतटोप मोज्जीवनेनेन्दुदलस्यानुपात्तनिजधावल्यगुणनिमित्तमलयजार्द्रत्व गुणस्वरूपोत्प्रेक्षेति सङ्करः ॥ २८ ॥

प्रथममिति । हिमदीधितिश्चन्द्रः प्रथममेकला कलामात्रम भवत् । कला तु षोडशोभागइत्यमरः । अथार्द्धमात्रमभवत् अथो अनन्तरम् । अथो अथेत्यमरः । उदितः साकल्यादुत्थितः सन् अनहान्महान्सम्पद्यमानोऽभून्महदभूत् । अभूततद्भावे च्विः हलन्तत्वान्न कार्य्यान्तरप्राप्तिः । तथा हि द्युतिशालिनः तेजिष्ठा अपि क्रमशः क्रमेणैव उपचयं वृद्धिन्दधति सहसा झटिति तु न दधति ध्रुवं । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥२९॥

उदमज्जीति । अपनिद्रपाण्डुरसरोजरुचा विकसितसितपुण्डरीक श्रिया तुहिनद्युतिना चन्द्रेण प्रथमं हरेः पूर्व्वमेव प्रबुद्धायाः

उदमज्जि कैटभजितः शयना
दपनिद्रपाण्डुरसरोजरुचा ।
प्रथमप्रबुद्धनदराजसुता
वदनेन्दुनेव तुहिनद्युतिना ॥ ३० ॥

अथ लक्ष्मणाऽनुगतकान्तवपु
र्जलधिं विलङ्घ्य शशिदाशरथिः ।
परिवारितः परितऋक्षगणै
स्तिमिरौघराक्षसकुलं बिभिदे ॥ ३१ ॥

अन्यथा तन्मुखं न दृश्येतेति भावः नदराजसुतायाः सिन्धुकन्यायाः श्रियोवदनेन्दुनेवेत्युत्प्रेक्षा । कैटभजितोहरेः शयनात्समुद्रादि त्यर्थः । उक्तोत्प्रेक्षासम्भावनार्थमित्थं निर्देशः । उदमज्जि उन्मग्नं उत्थितमित्यर्थः ॥ ३० ॥

अथेति । अथोदयानन्तरं लक्ष्मणा साङ्केन लक्ष्मणेन सौमित्रिणा चानुगतमनुसृतं कान्तं वपुर्यस्य सः लक्ष्मणानुगतकान्त वपुरिति शब्दश्लेषः वस्तुतः शब्दभेदेनार्थद्वयाभावेपि जतुकाष्ठवदेक शब्दप्रतीतेः । परितः समन्तात् ऋक्षगणैः नक्षत्रगणैः जाम्बवदादि भल्लूकसमूहैश्च इत्यर्थश्लेषः एकनालावलम्बिफलद्वयवदखण्डैक शब्दादर्थद्वयप्रतीतेः । नक्षत्रमृक्षं भन्तारा इति । ऋक्षाच्छभल्लभल्लूका इति चामरः । परिवारितः शशीव दाशरथिर्दशरथपुत्रो रामः । असाङ्ग् । जलधिं विलङ्घ्य तिमिरौघएव राक्षसकुलन्तत् बिभिदे बिभेदयामास । भिदेः कर्मणि लिट् । श्लेषसङ्कीर्णसमस्तवस्तु वर्त्तिसावयवरूपकालङ्कारः ॥ ३१ ॥

उपजीवति स्म सततं दधतः
परिमुग्धतां वणिगिवोडुपतेः ।
घनवीथिवीथिमवतीर्णवतो
निधिरम्भसामुपचयाय कलाः ॥ ३२ ॥
रजनीमवाप्य रुचमाप शशी
सपदि व्यभूषयदसावपि ताम् ।
अविलम्बितक्रममहो महता
मितरेतरोपकृतिमच्चरितम् ॥ ३३ ॥

उपजीवतीति । अम्भसां निधिः समुद्रोवणिगिव सततं परिमुग्धतां सौन्दर्यं अन्यत्र मौग्ध्यं व्यवहारानभिज्ञतामिति यावत् । मुग्धः सुन्दरमूढयोरिति विश्वः । दधतोदधानस्य घनानां वीथि घनवीथिरन्तरिक्षं सा वीथिः पण्यवीथिरिवेत्युपमितसमासः ता मवतीर्णवतः प्रविष्टवतः उडुपतेर्नक्षत्रनाथस्य कस्यचिद्धनिकवणिजस्य कलाः षोडशांशान् मूलधनवृद्धीश्च । कला स्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके । षोडशांशेऽपि चन्द्रस्येति विश्वः । उपचयाय स्वाम्बुवृद्धये स्वद्रव्यवृद्धये चोपजीवति स्म सेवते स्म अन्यत्र लभते स्मेत्यर्थः । यथा क्रियादिकुशलोऽकुशलान्महान्तं लाभमाप्नोति तद्वदिति भावः । श्लेषसङ्कीर्णेयमुपमा उपमासङ्कीर्णः श्लेषइत्यन्ये ॥ ३२ ॥

रजनीमिति । शशी रजनीमवाप्य रुचिं शोभामाप असौ शशयपि तां रजनीं सपदि व्यभूषयत् महतां सतां चरितमविलम्बितक्रमं यथा तथा इतरेतरोपकृतिमत् अन्योऽन्योपकारवत् अहो इत्य

दिवसं भृशोष्णरुचिपादहतां
रुदतीमिवानवरतालिरुतैः ।
मुकुराम्भृशन् मृगधरोऽग्रकरै
रुदशिश्वसत् कुमुदिनीवनिताम् ॥ ३४ ॥

चिन्त्यमानाच्चर्य । अत्र रजनीशशिनोर्मिथः शोभाकरत्वादन्योऽन्यालङ्कारः । तदन्योऽन्यं मिथोयत्रोत्पाद्योत्पादकता भवेदिति लक्षणात् । तत्समर्थकस्याथसर्यान्तरन्यासस्यत्यङ्गाङ्गिभावेन सङ्करः ॥ ३३ ॥

दिवसमिति । मृगधरश्चन्द्रो दिवसन्दिवसमस्त्यर्थः । कालाध्वनोरत्यन्तसंयोगे द्वितीया । भृशं उष्णा रुचेः उष्णांशोः पादेन करेणाङ्घ्रिणा च । पादारश्म्यङ्घ्रितुर्यांशादत्यमरः । हताम्ताडितां अतएवानवरतैरविच्छिन्नैरलिरुतैः रुदतीं क्रन्दतीमिव स्थितां कुमुदिन्येव वनिता तां । अग्राणि च ते करास्त्र इत्यभेदेन समास इति वामनः । तैरग्रकरैरग्रांशुभिरग्रहस्तैर्मुकुराम्भृशन् स्पृशन् उदशिश्वसत् उच्छासयति स्म । परावमृष्टानां पतिभिराश्वासनीयत्वादिति भावः । श्वसधातोर्णौ चङ्युपधाया ह्रस्वः । अत्र पादएव पादस्तेन हतामिति हननसाधिनश्लिष्टरूपकोत्थापितेयमलिरुतैरिति व्यधिकरणपरिणामगर्भा रोदनोत्प्रेक्षेति विजातीयसङ्करः । तथा करैरेव करैः कुमुदिनीवनितेति श्लिष्टाश्लिष्टरूपणान्मृगधरे वल्लभत्वप्रतीतेरेकदेशवर्त्तिरूपकं तत्सापेक्षेयमुदशिश्वसदिति गम्योत्प्रेक्षेत्यपरो विजातीयसङ्करः । रोदनोत्प्रेक्षासापेक्षेयमुच्छासनोत्प्रेक्षेति सजातीयसङ्करोऽपि ॥ ३४ ॥

प्रतिकामिनीति ददृशुश्चकिताः
स्मरजन्मघर्म्मपयसोपचिताम्।
सुदृशोऽभिभर्तृ शशिरश्मिगल
ज्जलविन्दुमिन्दुमणिदारुवधूम्॥ ३५ ॥

अमृतद्रवैर्विदधदब्जदृशा
मपमार्ग्गमोषधिपतिः स्म करैः।
परितोविसर्पि परितापि भृशं
वपुषोऽवतारयति मानविषम्॥ ३६ ॥

प्रतीति। सुदृशोऽङ्गनाः अभिभर्तृ भर्त्तारमभि। लक्षणेन अभि प्रती आभिमुख्ये इत्यव्ययीभावः। शशिरश्मिभिर्गलन्तः स्रवन्तो जलविन्दवो यस्यास्तामिन्दुमणिश्चन्द्रकान्तशिला सैव दारुवधू स्तन्मयी वधूः स्त्रीप्रतिमा तां स्मराज्जन्म यस्य तेन स्मरजन्मना घर्म्मपयसा स्वेदाम्बुना उपचितां व्याप्तां स्विन्नगात्रामित्यर्थः प्रति प्रतिकूला कामिनी सपत्नीति भ्रान्त्येति शेषः चकिताभीताददृशुः। अत्र चन्द्रशिलापुत्रिकायां सादृश्यनिवन्धनया प्रतिकामिनीभ्रान्त्या भ्रान्तिमदलङ्कारः॥ ३५ ॥

अमृतेति। ओषधिपतिश्चन्द्र एवौषधिपतिर्वैद्य इति श्लिष्टरूपकं अमृतमेवामृतमौषधविशेषः। तेन द्रवैरार्द्रैः करैः किरणैरेव करैः हस्तैरब्जदृशामपमार्ग्गमङ्गपरिमार्ज्जनं विदधत् कुर्व्वन् परितोविसर्पि सर्व्वव्यापि भृशं परितापि सन्तापकारि मानः कोप एव विषन्तत् वपुषः शरीरादवतारयति स्म अवारोपितवान् अत्र भावद्रवरूपकेणौषधलिप्तजाङ्गुलिकहस्तसंस्पर्शादिव विषमिव निशा

अमलात्मसु प्रतिफलन्नभित
स्तरुणीकपोलफलकेषु मुहुः ।
विससार सान्द्रतरमिन्दुरुचा
मधिकाऽवभासितदिशां निकरः ॥३७॥
उपगूढवेलमलघूर्म्मिभुजैः
सरितामचुक्षुभदधीशमपि ।
रजनीकरः किमिव चित्रमदो
यदुरागिणाङ्गणमनङ्गलघुम् ॥ ३८ ॥

करकरस्पर्शादेवाङ्गनानां वपुषि रोषेण स्पृष्टइत्युपमा व्यज्यते ॥ ३६ ॥

अमलेति । अधिकमवभासिताः प्रकाशिताः दिशो याभिस्तासामिन्दुरुचां निकरोऽमलात्मसु निर्मलमूर्त्तिषु तरुणीनां ये कपोलाः फलकानीव तेष्वभितो मुहुः प्रतिफलन् सङ्क्रामन् सान्द्रतरं प्रचुरतरं विससार दर्पणसङ्क्रमणादिवेति भावः । अत्रेन्दुरुचां कपोलासङ्क्रमेऽपि सङ्क्रमोक्तेरसम्बन्धे सम्बन्धोक्तिरूपातिशयोक्तिः ॥ ३ ॥

उपगूढेति । रजनीकरः चन्द्रः अलघुभिरूर्मिभिरेव भुजैरुपगूढा वेला येन तं सावष्टम्भमिति भावः । सरितामधीशं समुद्रमपि स्वभावादक्षोभ्यमपीति भावः । अचुक्षुभत्क्षोभयति स्म । क्षुभ्यतेर्ण्यन्ताल्लुङि चङ्युपधाह्रस्वः । अनङ्गेन लघुं कृतसारं यदवएव रागिणस्तेषाङ्गणमचुक्षुभत् इत्यदः किमिव चित्रं न किञ्चिदित्यर्थः । अत्राक्षोभ्यमब्धिं क्षोभयतश्चन्द्रस्य दण्डापूपिकन्यायादन्यक्षोभकत्वोक्तेरर्थापत्तिरलङ्कारः ॥ ३८ ॥

भवनोदरेषु परिमन्दतया
शयितोऽलसः स्फटिकयष्टिरुचः ।
अवलम्ब्य जालकमुखोपगता
नुदतिष्ठदिन्दुकिरणान्मदनः ॥ ३९ ॥
अविभावितेषुविषयः प्रथमं
मदनोऽपि नूनमभवत्तमसा ।
उदिते दिशः प्रकटयत्यमुना
यदघर्म्मधाम्नि धनुराचकृषे ॥ ४० ॥

भवनेति । परिमन्दतया एकाकित्वादक्षमर्थतया भवनोदरेषु गृहाभ्यन्तरेषु शयितः सुप्तोऽतएवालसोमदनोजालकमुखोपगतान् गवाक्षविवरप्रविष्टान् अतएव स्फटिकयष्टीनां रुगिव रुक् शोभा येषान्तान् स्फटिकदण्डसन्निभान् इन्दुकिरणानवलम्ब्यावष्टभ्योदतिष्ठत् उत्थितः । अत्रोद्देशोत्थानयोरभेदविवक्षया उदोऽनूर्ध्वकर्म्मणीति परस्मैपदसिद्धिः । एतत्पदे चाभेदाध्यवसायमूलातिशयोक्त्या स्फटिकयष्टिरुचइत्युपमया च अवलम्ब्येत्यावलम्ब्येवोत्थानस्यावलम्बनहेतुकत्वोत्प्रेक्षा प्रत्याय्यतइत्येतासां सङ्करः ॥ ३९ ॥

अविभावितेष्विति । मदनोऽपि प्रथमञ्चन्द्रोदयात्प्राक् तमसा अविभावितोऽलक्षितः इषुविषयोबाणलक्ष्यं येन सोऽभवत् नूनमित्युत्प्रेक्षा । यद्यस्मादघर्म्मधाम्नि शीतकरे उदिते दिशः प्रकटयति सति अमुना मदनेन धनुराचकृषे आकृष्टं चन्द्रएव महानदीपको मदनस्याभूदिति भावः ॥ ४० ॥

युगपद्विकाशमुदयाद्गमिते
शशिनः शिलीमुखगणोऽलभत ।
द्रुतमेत्य पुष्पधनुषो धनुषः
कुमुदेऽङ्गनामनसि चावसरम् ॥ ४१ ॥
ककुभां मुखानि सहसोज्ज्वलयन्
दधदाकुलत्वमधिकं रतये ।
अदिदीपदिन्दुरपरो दहनः
कुसुमेषुमत्त्रिनयनप्रभवः ॥ ४२ ॥

युगपदिति । पुष्पधनुः पुष्पधन्वा । वा संज्ञायामिति विकल्पादनङादेशः । तस्य धनुः पुष्पचापं पुष्पान्तरं च तस्मा त्स्खलितो निःसृतः शिली शल्यं मुखं येषान्ते शिलीमुखाः बाणा अलयश्च । अलिबाणौ शिलीमुखावित्यमरः । तेषाङ्गणः शशिन उदयाद्विकाशमौत्सुक्यमुन्मीलनञ्च युगपदेकदा गमिते प्रापिते अङ्गनानां सुदृशां मनसि हृदये कुमुदे चावसरमवकाशमाश्वाश मलभत उभयत्र प्रवेशं लब्धवानित्यर्थः । अत्र चन्द्रोदये कुमुद कामिनीहृदययोर्द्वयोरपि प्रकृतयोः शिलीमुखप्रवेशलक्षणैकधर्म्म योगादौपम्यात्तुल्ययोगिता एकधर्म्मत्वं चात्र शिलीमुखेति श्लिष्टप दोपात्तयोरलिशरयोरेकत्वाध्यवसायमूलातिशयोक्तिप्रसादादिति सङ्करः ॥ ४१ ॥

ककुभामिति । ककुभां दिशां मुखानि सहसा झटित्युज्ज्वलयन् उद्भासयन् रतये सुरताय अधिकमाकुलत्वमौत्सुक्यं दधत् यूनामिति शेषः । अन्यच्च रतये कामदेव्यै आकुलत्वं भय

इति निश्चितप्रियतमागतयः
सितदीधितावुदयवत्यबलाः ।
प्रतिकर्म्म कर्त्तुमुपचक्रमिरे
समये हि सर्व्वमुपकारि कृतम् ॥ ४३ ॥

विक्लवत्वं दधत् । अत्रेरत्रिमुनेर्नयनप्रभवः अत्रिनेत्रसमुद्भव इति पुराणात् त्रिनयनप्रभवो न भवतीत्यत्रिनयनप्रभवः अपरस्त्रिनयनप्रभवादन्योदहनोऽग्निरिन्दुः कुसुमेषुं काममदिदीपत् दीपयति स्म । दीप्यतेर्णौ चङि भ्राजेत्यादिना विकल्पान्नोपधाह्रस्वः । अत्र प्रकृते कुसुमेषोर्दीपनं नाम प्रवर्द्धनन्तस्य तत्र प्रतीयमानेन प्रज्वलनेनाभेदाध्यवसायात्तन्निमित्तमिन्दोर्दिङ्मुखोद्भासनादिधर्म्मसम्बन्धादपरोऽयन्दहन इत्यपरशब्दप्रयोगसामर्थ्याद्दहनत्वोत्प्रेक्षा न रूपकमिति रहस्यम् । चन्द्रोदयात्कामो ववृधे इति तात्पर्य्यम् ॥ ४२ ॥

एवञ्चन्द्रोदयाख्यं उद्दीपनविभावमुक्त्वा तत्फलमाह । इतीति । इत्येवं सितदीधितावुदयवति अबलाः स्त्रियो निश्चिता प्रियतमानामागतिरागमनं याभिस्ताः सत्यः प्रतिकर्म्म प्रसाधनं कर्त्तुं उपचक्रमिरे । प्रतिकर्म्म प्रसाधनमित्यमरः । चन्द्रोदयात्प्रियागमनं निश्चित्य अलङ्कर्त्तुं प्रक्रान्ता इत्यर्थः । तथा हि समये कार्य्यकाले कृतमनुष्ठितं सर्व्वङ्कर्म्म उपकार्य्युपकारकम्भवति अन्यथा विफलमेवेति भावः । अतो निश्चित्य प्रवृत्तिरासां युक्तेत्यर्थान्तरन्यासः ॥ ४३ ॥

अथ प्रसाधनमेव प्रपञ्चयति । सममिति । सुतनोः स्त्रियाः उरोजतटौ उह स्वाध्यमेकमेव हारमेव भूषणं समवैषम्येण

सममेकमेव दधतुः सुतनो
रुरु हारभूषणमुरोजतटौ ।
घटते हि संहततया जनिता
मिदमेव निर्विवरतां दधतोः ॥ ४४ ॥

कदलीप्रकाण्डरुचिरोरुतरा
जघनस्थलीपरिसरे महति ।
रशनाकलापकगुणेन बधू
र्मकरध्वजद्विरदमाकलयत् ॥ ४५ ॥

दधतुः संहततया संश्लिष्टतया ऐकमत्येन च जनितां निर्विवरतां निरन्तरालतां मीरन्ध्रत्वञ्च दधतोरिदं समभागित्वमेव घटते। अन्तर्भेदान्तरायाहि विषयिणां विषयोपभोगास्तदभावात्समशोभार्थं हारधारणं युक्तमिति भावः ॥ ४४ ॥

कदलीति । बधूः कदलीप्रकाण्डरुचिरः रम्भास्तम्भसुन्दर ऊरुरेव तरुर्बन्धनवृक्षोयस्मिन् अत्र कदलीकाण्डस्य सौन्दर्य्यमात्रो पमानत्वात् बन्धनयोग्यवृक्षत्वाविना तरुशब्देन पुनरुक्तिः । महति जघनस्थल्येव परिसरः प्रदेशस्तस्मिन् रशनाकलापक एव गुणस्तेन मकरध्वजोमदनः सएव द्विरदस्तमाकलयद्बध्नात् । रशनाबन्धेन जघनमतीव मदनोद्दीपकमासीदित्यर्थः । समस्त वस्तुवर्त्ति सावयवरूपकम् ॥ ४५ ॥

अधरेष्विति । सुदृशामधरेष्वोष्ठेषु अलक्तकरसोलाक्षाद्रवः तथा कपोलभुवि गण्डस्थले विशदं शुभ्रं लोध्ररजः तथा नयन पङ्कजयोर्नवमञ्जनञ्च अञ्जनिषिक्तात्पयसः क्षीरात् न बिभिदे भिन्नं

अधरेष्वलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः ।
नवमञ्जनं नयनपङ्कजयो
र्विभिदे न शङ्खनिहितात्पयसः ॥ ४६ ॥

स्फुरदुज्ज्वलाधरदलैर्विलस
द्दशनांशुकेशरभरैः परितः ।
धृतमुग्धगण्डफलकैर्विबभु
र्विकसद्भिरास्यकमलैः प्रमदाः ॥ ४७ ॥

नाभूत् । कर्मकर्तरि लिट् । अधरादिनिहितं लाक्षारागादिकं शङ्खनिहितक्षीरवत्सावर्ण्यादाश्रयतोऽभेदेन दुर्ग्रहमभूदित्यर्थः । अत्र यदधरालक्तकरसादिकं तच्छङ्खनिहितं क्षीरमित्येकवाक्यतया वाक्यार्थे वाक्यार्थसमारोपादसम्भवद्वस्तुसम्बन्धो वाक्यार्थनिदर्शनालङ्कारः तेनाधरालक्तकादीनां गुणतः एकत्वरूपः सामान्यालङ्कारो गम्यते सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् ॥ ४६ ॥

स्फुरदिति । प्रमदाः स्त्रियः स्फुरन्तः स्खलन्तः उज्ज्वला आश्मला अधरा ओष्ठा एव दलानि पत्राणि येषान्तैः परितो विलसन्तो दशनांशवो दन्तकान्तय एव केशरभराः किञ्जल्कपुञ्जा येषान्तैः । धृतानि मुग्धानि गण्डा एव फलकानि कर्णिका येषान्तैर्विकसद्भिरास्यकमलैर्विबभुः अत्रास्यकमलैरिति रूपणात्प्रमदा एव सरस्य इति सिद्धेरेकदेशविवर्त्ति सावयवरूपकम् । आस्यकुमुदैरिति पाठे कुमुदस्य मुखोपमानकत्वं कविसमयविरुद्धं ज्ञेयत् ॥ ४७ ॥

भजते विदेशमधिकेन जित-
स्तदनुप्रवेशमथ वा कुशलः ।
मुखमिन्दुरुज्ज्वलकपोलमतः
प्रतिमाच्छलेन सुदृशामविशत् ॥४८॥

ध्रुवमागताः प्रतिहतिं कठिने
मदनेषवः कुचतटे महति ।
इतराङ्गवन्न यदिदं गरिम
ग्लपितावलग्नमगमत्तनुताम् ॥ ४९ ॥

भजतइति । अधिकेन प्रबलेन जितो विदेशन्देशान्तरम्भजते अथवा कुशलः कार्य्यचतुरः तदनुप्रवेशं भजते तमेव शरणतया प्रविश्य जीवतीत्यर्थः । अतो हेतोरिन्दुरुज्ज्वलौ कपोलौ यस्य तदिति मुखस्य विम्बग्रहणयोग्यतोक्तिः पदार्थहेतुकङ्काव्यलिङ्गम् । सुदृशां मुखं प्रतिमाच्छलेन प्रतिविम्बव्याजेन अविशत् प्रविष्टः । साक्षाच्चन्द्र एवायं न प्रतिमाचन्द्रइति छलशब्दात्प्रतीतेः छल शब्देनासत्यत्व प्रतिपादनरूपोऽपह्नवालङ्कारः । पूर्वोक्तकाव्य लिङ्गसापेक्षइति सङ्करः तेन कपोलयोर्लोकोत्तरं लावण्यं दर्पणोपम्यञ्च व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिः ॥ ४८ ॥

ध्रुवमिति । मदनेषवः कामशराः महति कठिने कुचतटे प्रतिहतिम्प्रतिघातमागताः प्राप्ता ध्रुवम् । यद्यस्माद्गरिम्णा निज भारेण ग्लपितङ्कर्शितं अवलग्नं मध्यं येन तदिदं कुचतटम् इतराङ्गेन तुल्यमितराङ्गवत् । तेन तुल्यमिति वतिप्रत्ययः । तनुतां कार्श्यन्नागमत् नाभजत । पृषादित्वेन ग्लेरकादेशः ।

न मनोरमास्वपि विशेषविदां
निरचेष्ट योग्यमिदमेतदिति।
गृहमेष्यति प्रियतमे सुदृशां
वसनाङ्गरागसुमनःसु मनः ॥ ५० ॥

वपुरन्वलिप्त परिरम्भसुख
व्यवधानभीरुकतया न वधूः।
क्षममस्य बाढमिदमेव हि यत्
प्रियसङ्गमेष्वनवलेपमदः ॥ ५१ ॥

तदा मदनेषुपातात्कुचातिरिक्तमङ्गनानामङ्गं क्षाममासीदित्यर्थः ॥ ४९ ॥

नमनोरमास्विति। प्रियतमे गृहमेष्यति आगमिष्यति सति विशेषविदामपि सुदृशां सम्यग्दर्शनीयानां स्त्रीणां मनः कर्तृ मनोरमास्वपि वसनाङ्गरागसुमनःसु वस्त्रगन्धमाल्येषु इदमेतदिति इदं पुरोवर्त्ति वस्त्रेतदिति वसनमिति अनुलेपनमिति सुमनस इति विशेषाकारेण तथा योग्यमस्माकन्धारणार्हमिति च न निरचेष्ट न निरधारयत् प्रियागमनहर्षातिरेकादितिकर्त्तव्यतामूढमभूदित्यर्थः। चिनोतेर्लुङि तङि च्लेः सिच् सार्वधातुकार्धधातुकयोरिति गुणः। हर्षोऽत्र सञ्चारिभावः निश्चयसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः सुमनःसुमन इति यमकविशेषस्येति संसृष्टिः ॥ ५० ॥

वपुरिति। वधूः स्त्री परिरम्भसुखव्यवधानभीरुकतया आलिङ्गनसुखविच्छेदभीरुत्वेन। कुकनपि वक्तव्य इति कुकन् प्रत्ययः।

निजपाणिपल्लवतलस्खलना-
दभिनासिकाविवरमुत्पतितैः ।
अपरा परीक्ष्य शनकैर्मुमुदे
मुखवासमास्यकमलश्वसनैः ॥ ५२ ॥
विधृते दिवा सवयसा च पुरः
परिपूर्णमण्डलविकाशमृति ।
हिमधाम्नि दर्पणतले च मुहुः
स्वमुखश्रियं मृगदृशोऽददृशुः ॥ ५३ ॥

वपुर्नान्वलिप्त नानुलिप्तवती अङ्गरागमात्रव्यवधानमपि न सेहे इत्यर्थः । लिम्पतेः कर्त्तरि लुङि तङ् । तथा हि अदोवपुः प्रियसङ्गमेषु अनवलेपमचन्दनमगर्व्वञ्चेति यत् । अवलेपस्तु गर्व्वे स्यात्लेपने भूषणेऽपि चेति विश्वः । इदमनवलेपनत्वमेवास्य वपुषोऽवाढं भृशं चमं युक्तम् । श्लेषानुप्राणितोऽयमर्थान्तरन्यासः ॥ ५१ ॥

निजेति । अपरा स्त्री निजपाणिपल्लवतलस्य स्खलनादभिघातादभिनासिकाविवरं नासारन्ध्रमभि उत्पतितैरास्यकमलस्य श्वसनैर्मुखमारुतैर्मुखवासं मुखवासनां शनकैः परीक्ष्य मुमुदे । इयं वासकसज्जिका नायिका ॥ ५२ ॥

विधृतइति । दिवा आकाशेन सवयसा वयस्यया च पुरोऽग्रे विधृते विधारिते परिपूर्णमण्डलविकाशं बिम्बशोभां बिभर्त्तीति तद्भृत् तस्मिन्हिमधाम्नि चन्द्रे दर्पणतले च मृगदृशः स्त्रियः स्वमुखश्रियं पूर्व्वत्रोपमानभूतामुत्तरत्रोपमेयभूताञ्चेत्यर्थः । मुहुरदृशुः औपम्यपरीक्षार्थमिति भावः । अत्रान्यश्रियोऽन्यत्रा

अधिजानु बाहुमुपधाय नम
त्करपल्लवाऽर्पितकपोलतलम् ।
उदकण्ठि कण्ठपरिवर्त्तिकल
स्वरशून्यगानपरयापरया ॥ ५४ ॥

सम्भवाच्चन्द्रे तत्सदृशीमिति साहृश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्शना । तथा चन्द्रदर्पणयोर्द्वयसवयसोश्च यथासङ्ख्यमन्वयाद्यथासङ्ख्यालङ्कारस्य । तदुभयापेक्षया चन्द्रदर्शनयोर्मुखश्रीदर्शनस्थानत्वेन प्रस्तुतयोरेवौपम्यस्य गम्यत्वात्तुल्ययोगितेति सङ्करः ॥ ५३ ॥

अधिजान्विति । नमति कपोलार्पणाय प्रह्वीभवति करपल्लवे अर्पितं निहितङ्कपोलतलङ्गण्डस्थलं यस्य तम्बाहुं अधिजानु जानुनि । विभक्त्यर्थेऽव्ययीभावः । उपधाय निधाय कूर्परेण जानुमवष्टभ्येत्यर्थः । कण्ठे परिवर्त्तत इति कण्ठपरिवर्त्ति न तु मुखोच्चारितमित्यर्थः । कलमव्यक्तमधुरं स्वरशून्यन्तारध्वनिहीनं षड्जादिस्वराभिव्यक्तिहीनं वा यद्गानन्तत्परया तदासक्तया मन्दं कण्ठेनैव गायन्त्येत्यर्थः । कालक्षेपार्थमिति भावः अयमुत्कण्ठानुभावः । अपरया स्त्रिया उदकण्ठि उत्कण्ठितं प्रियसङ्गमायोत्सुकया स्थितमित्यर्थः । भावे लुङि चिणो लुक् । अत्र कालक्षेपासहिष्णुत्वलक्षणमौत्सुक्यं सञ्चारि तन्निबन्धनात्प्रेयोऽलङ्कारः । परयापरयेति यमकविशेषसंसृष्टिः । नायिका विरहोत्कण्ठिता । चिरं पत्युरनालोके विरहोत्कण्ठितोन्मना इति लक्षणात् ॥ ५४ ॥

प्रणयेति । अथ प्रसाधनानन्तरं मुग्धतरोऽत्यन्तकामनोचित तरुणीजनः प्रणयप्रकाशनविदोऽनुरागव्यञ्जनचतुरा इत्यर्थः ।

प्रणयप्रकाशनविदोमधुराः -
सुतरामभीष्टजनचित्तहृतः ।
प्रजिघाय कान्तमनु मुग्धतर
स्तरुणीजनोदूतइवाथ सखीः ॥ ५५ ॥

न च मेऽवगच्छति यथा लघुतां
करुणां यथा च कुरुते स मयि ।
निपुणन्तथैनमुपगम्य वदे
रभिदूति काचिदिति सन्दिदिशे ॥ ५६ ॥

मधुराः मधुरभाषिणीः अन्यत्र रम्याकृतीः सुतरामभीष्टजनस्य चित्तहृतोमनोहारिणीः सखीः दूतइव कान्तमनु प्रियेजनं प्रति प्रजिघाय प्रेषितवान् । हिनोतेर्लिट् इवेन सह समास वचनात् दूतइवेति उपमासमासः। तथा सखीनामासत्यन्तरङ्गत्व कार्य्यदर्शित्वादिव्यञ्जनादलङ्कारेण वस्तुध्वनिः ॥ ५५ ॥

तथा काचिन्नायिका दूतीं वाचिकमनुशास्ति। न चेति । स मे दयितोयथा मयि करुणां कुरुते यथा लघुतामल्पताञ्च नाव गच्छति न मन्यते । एनन्दयितमुपगम्य प्राप्य तथा तेन प्रकारेण निपुणं वदेः। विध्यर्थे प्रार्थने वा लिङ् । इतीत्थं काचिन्नायिका अभिदूति । अभिलक्षणेऽव्ययीभावे नपुंसकह्रस्वत्वम्। सन्दिदिशे सन्दिष्टवती । कर्त्तरि लिट् स्वरितेत्वादात्मनेपदम्। नायिका तु कलहान्तरिता । कोपात्कान्तं पराणुद्य पश्चात्तापसमन्वितेति लक्षणात् ॥ ५६ ॥

दयिताय मानपरयापरया
त्वरितं ययावगदितापि सखी ।
किमु चोदिताः प्रियहितार्थकृतः
कृतिनोभवन्ति सुहृदः सुहृदाम् ॥ ५७ ॥
प्रतिभिद्य कान्तमपराधकृतं
यदि तावदस्य पुनरेव मया ।
क्रियतेऽनुवृत्तिरुचितैव ततः
कलयेदमानमनसं सखि माम् ॥ ५८ ॥

दयितायेति । मानपरया अभिमानवत्या । अत एवापरया नायिकया अगदिता दयितमानयेत्यनुक्ता सखी दयिताय दयितमानेतुम् । क्रियार्थोपपदस्य च कर्मणि स्थानिन इति चतुर्थी । त्वरितं शीघ्रं ययौ अन्यथा मरणमस्त्विति भावः । तथा हि सुष्ठु शोभनं हृदयं येषान्ते सुहृदो मित्राणि । सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः । चोदिताः प्रेरिताः सन्तः सुहृदां प्रियो हृद्यः हितः श्रेयस्करश्च योऽर्थस्तं कुर्वन्तीति प्रियहितार्थकृतः कृतमेषामस्तीति कृतिनः कृतकृत्याभवन्ति किम् किन्तु चोदनां विनैवेति भावः । अर्थान्तरन्यासः । नायिका चपूर्ववत् ॥ ५७ ॥

अथ काचित्कलहान्तरिता कान्तम्प्रति त्रिभिर्दूतीं सन्दिशति । प्रतिभिद्येत्यादि । अपराधकृतमागस्कारिणं कान्तम्प्रतिभिद्य निराकृत्य पुनर्मयैवास्यानुवृत्तिरनुसरणं क्रियते यदि तावदुचितैव पतिव्रतानां प्राणेश्वरचित्तानुवृत्तेर्धर्मत्वादिति भावः । किन्तु हे सखि ततोऽनुवृत्तेर्मामसमानमनसमभिमानहीनचित्ता कलयेत् मन्येत ॥ ५८ ॥

अवधीर्य्य धैर्य्यकलिता दयितं
विदधे विरोधमथ तेन सह ।
तव गोप्यते किमिव कर्त्तुमिदं
न सहास्मि साहसमसाहसिकी ॥ ५९ ॥
तदुपेत्य मास्म तमुपालभथाः
किल दोषमस्य न हि विद्म वयम् ।
इति सम्प्रधार्य्य रमणाय वधू
र्विहितागसेऽपि विससर्ज्ज सखीम् ॥ ६० ॥

तर्हिलाघवाय विहस्तैव स्थीयतामत्राह । अवधीर्य्येति । धैर्य्य कलिता कलितधैर्य्या सती । वाहिताग्न्यादिष्विति निष्ठायाः परनिपातः । दयितमवधीर्य्य निरस्कृत्य तेन सह विरोधं विदधे करोमीति चेत् । दधातेः कर्त्तरि लट् । हे सखि तव किमिव गोप्यते निगूह्यते न किञ्चिदित्यर्थः किन्तु कथ्यत एवेति कथयति सहसा बलेन वर्त्तत इति साहसिकी । ओजः सहोम्भसा वर्त्तत इति ठक् । सा न भवतीत्यसाहसिकी अहमिति शेषः । इदं साहसं विरोधं विरोधाचरणरूपं साहसकृत्यङ्कर्त्तुं । शकधृषेत्यादिना तुमुन् । सहत इति सहा समर्था । पचाद्यच् । नास्मि । अत्रा साहसिकत्वस्य विशेषणगत्या साहसासहनहेतुत्वोक्तेः पदार्थहेतुक काव्यलिङ्गमलङ्कारः ॥ ५९ ॥

तर्हि किमत्र कार्य्यमत्राह । तदिति । तत्तस्मात्तं वल्लभमुपेत्य मास्मोपालभथाः नोपालभस्व तद्दोषं न गणयेरित्यर्थः । स्मोत्तरे लुङ् चेति उपाङ् पूर्व्वात् लुङ् न माङ्योगे इत्यट्प्रतिषेधः । ननु

ननु सन्दिशेति सुदृशोदितया
त्रपया न किञ्चन किलाभिदधे ।
निजमैक्षि मन्दमनिशं निश्वसितैः
कृशितं शरीरमशरीरशरैः ॥ ६१ ॥

सापराधः कथं नोपालभ्यस्तत्राह । वयमस्य दोषमपराधं न विद्मः किल अजानाना इव तिष्ठाम इत्यर्थः । कार्य्यार्थिनः कुतो गर्व्व इति भावः । विदो लटो वेति णलादेशः । इति सम्प्रधार्य्य निश्चित्य वधूः नायिका विहितागसे कृतापराधायापि रमणाय प्रेयसे । क्रिया ग्रहणाच्चतुर्थी । सखीं विससर्ज प्रजिघाय विरहासहिष्णुतयेति भावः । एषा कलहान्तरिता प्रौढा च ॥ ६० ॥

नन्विति । ननु सन्दिश सन्देशं ब्रूहि इत्युदितया दूत्या कथितया सुदृशया नायिकया कर्त्र्या त्रपया हेतुना किञ्चन नाभिदधे किल नाभिहितं खलु । किन्तु निश्वसितैरशरीरशरैरनङ्गबाणै रनिशं कृशितं कृशीकृतम् । कृशशब्दात्तत्करोतीति ण्यन्तात्कर्म्मणि क्तः णाविष्ठवद्भावे र ऋतो हलादेर्लघोरित्यृकारस्य रेफादेशः । निजं शरीरं मन्दमैक्षि ईक्षितम् । एषापि कलहान्तरिता मध्यमा च । त्रपया निजहृदयानभिधानान्निजशरीरनिरीक्षणेन स्वावस्थानिवेदनाच्च तुल्यलज्जास्मरत्वावगमादिति । इयञ्च प्रथमी कार्श्याख्या कामावस्था । इष्टमनः सङ्गसङ्कल्पाजागरः कृशता रतिः ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश ॥ ६१ ॥

इत्थं नायिकाभिरुपदिष्टा दूत्यः किमकुर्वन्नित्यत आह । ब्रुवत इति । प्रगल्भाः धृष्टाः मतिगर्भाः प्रतिभाधाराश्च गिरो याभ्यस्ता दूत्यः

ब्रुवत स्म दूत्यउपहत्य नरा
न्नरवत्प्रगल्भगतिगर्भगिरः ।
सुहृदर्थमीहितमजिह्मधियां
प्रकृतेर्विराजति विरुद्धमपि ॥ ६२ ॥

मम रूपकीर्त्तिमहरद्भुवि य
स्तदनुप्रसक्तहृदयेयमिति ।
त्वयि मत्सरादिव निरस्तदयः
सुतरां क्षिणोति खलु तां मदनः ॥ ६३ ॥

नरान् पुरुषानुपहत्य नरवत् नरैः पुम्भिस्तुल्यम् । तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः । ब्रुवते स्म न चैतावता वैयात्यं दूषणमित्यर्थान्तरन्यासेनाह । सुहृदर्थमिति । तथा हि अजिह्मधियामकुटिलबुद्धीनां सम्बन्धि सुहृदे सुहृदर्थम् । अर्थेन सह नित्यसमासः सर्व्वलिङ्गता चेति वक्तव्या । ईहितं चेष्टितं प्रकृते र्विरुद्धमपि स्वभावविपरीतमपि विराजति शोभते । तस्मान्न धार्ष्ट्यं दोष इत्यर्थः ॥ ६२ ॥

अथ काचिद्दूती कञ्चित्प्रियम्प्रति सप्तभिः प्रार्थयते । ममे त्यादि । यो भुवि मम रूपकीर्त्तिं सौन्दर्य्यप्रथममहरत् इयं मत्प्रिया तदनुप्रविष्टहृदया तस्मिन्नासक्तचित्तेति अतोहेतोस्त्वयि मत्सरादिव मदनो निरस्तदयो निष्कृपः सन् तां त्वत्प्रियां सुतरां क्षिणोति क्षपयति खलु । एतेन कार्श्यावस्थोक्ता । अत्र साक्षात्प्रति पक्षभूतनायकपीडासमर्थस्य मदनस्य तदीयनायिकापीडनोक्त्या प्रत्यनीकालङ्कारः । स च त्वयि मत्सरादिवेति हेतूत्प्रेक्षोत्थापित

तव सा कथासु परिघट्टयति
श्रवणं यदङ्गुलिमुखेन मुहुः ।
घनतां ध्रुवं नयति तेन भव
द्गुणपूगपूरितमलम्पतया ॥ ६४ ॥
उपताप्यमानमलघूष्मभिः
श्वसितैः सितेतरसरोजदृशः ।
द्रवतां न नेतुमधरं क्षमते
नवनागवल्लिदलरागरसः ॥ ६५ ॥

इति सङ्करः । बलिनः प्रतिपक्षस्य प्रतीकारे सुदुष्करे । यस्तदीयतिरस्कारः प्रत्यनीकं तदुच्यते इति लक्षणात् ॥ ६३ ॥

तवेति । सा त्वत्प्रिया तव कथासु गुणकीर्त्तनेषु मुहुरङ्गुलिमुखेनाङ्गुल्यग्रेण श्रवणं श्रोत्रविवरं परिघट्टयति स्फालयतीति यत् यद्घट्टयतीति शेषः तेन परिघट्टनेन भवद्गुणपूगपूरितं श्रवणं अलम्पतया तावद्गुणग्रहणेनासन्तुष्टतया घनतां नयति । सङ्कटमुलुलमानार्थमस्थादिवद्भूयोगुणप्रवेशाय क्षेपयतीत्यर्थः । ध्रुवमित्युत्प्रेक्षायां अत्र कण्डूविनोदनार्थे श्रोत्रघट्टने घनतानयनमुत्प्रेक्ष्यते ॥ ६४ ॥

उपेति । अलघुरन्तःसन्तापोपाधिकः ऊष्मा उष्णत्वं येषां तैः श्वसितैर्निश्वासैरुपताप्यमानं सितेतरसरोजदृशो नीलोत्पलाक्ष्याः अधरं नवनागवल्लिदलानां ताम्बूलदलानां रागरसो रञ्जकद्रवो द्रवतां मार्द्रतां नेतुं न क्षमते न शक्नोति । एतेन ज्वरावस्थोक्ता । अत्र द्रवत्वसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ ६५ ॥

दधति स्फुटं रतिपतेरिषवः
शिततां यदुत्पलपलाशदृशः ।
हृदयं निरन्तरबृहत्कठिन-
स्तनमण्डलावरणमप्यभिदन् ॥ ६६ ॥

कुसुमादपि स्मितदृशः सुतरां
सुकुमारमङ्गमिति नापरथा ।
अनिशं निजैरकरुणः करुणं
कुसुमेषुरुत्तपति यद्विशिखैः ॥ ६७ ॥

दधतीति । रतिपतेरिषवः शिततां नैशित्यं दधति स्फुटमित्युत्प्रेक्षायां । यद्यस्मान्निरन्तरं नीरन्ध्रं बृहत्कठिनञ्च यत् स्तनमण्डलं तदेवावरणं वर्म यस्य तत्तदपि उत्पलपलाशदृश उत्पलदलाक्ष्याः हृदयमभिदन् भिन्दन्ति स्म । भिदेर्लङि इरितो वेति च्लेरङादेशः । सावरणमपि भिन्नमिति विरोधोत्थापितेयं स्मरशरनैशित्योत्प्रेक्षा । तया च रन्ध्रान्वेषिणा कामेन निपीड्यमानायास्तस्यास्तच्छिरोजीवितसंशयमापादयतीति वस्तु द्योत्यते ॥ ६६ ॥

कुसुमादिति । स्मितदृशः स्मेराक्ष्याः अङ्गं कुसुमादपि सुतरां सुकुमारं कोमलमितीदमपरथा अन्यथा न किन्तु सत्यमेवेत्यर्थः । यद्यस्मात्कुसुमेषुरकरुणो निष्कृपः सन् निजैर्विशिखैर्बाणैः । पृषत्कबाणविशिखा इत्यमरः । कुसुमैरेवेत्यर्थः । करुणं दीनं यथा तथा अनिशं नित्यमुत्तपति तापयतीत्यर्थः । तपतिरयमौणादिकः सकर्मकः । कुसुमाधिकसौकुमार्याभावे कुसुमैः पीड्यत इति

विषतां निषेवितमपक्रियया
समुपैति सर्व्वमिति सत्यमदः ।
अमृतस्रुतोऽपि विरहाद्भवतो
यदमूं दहन्ति हिमरश्मिरुचः ॥ ६८ ॥
उदितं प्रियां प्रति सहार्द्दमिति
श्रद्धीयत प्रियतमेन वचः ।
विदितेङ्गिते हि पुर एव जने
सपदीरिताः खलु लगन्ति गिरः ॥ ६९ ॥

॥ कुलकम् ॥

कुसुमाधिकसौकुमार्य्यगुणोत्प्रेक्षा नापरथेतिव्यञ्जकप्रयोगाद्वाच्या ॥ ६७ ॥

विषतामिति । अपक्रियया विपरीतप्रयोगेण निषेवितमुपयुक्तं सर्वं अमृतमपीति भावः । विषतां विषवदहितत्वं समुपैति इत्यदः इदं विषत्वं सत्यं ध्रुवं यद्यस्मात् अमृतस्रुतोऽपि । स्रवतेः क्विपि तुक् । हिमरश्मिरुचश्चन्द्रपादाः भवतो विरहाद्धेतोस्त्वया विना सेवनादित्यर्थः । अमूं त्वत्प्रियां दहन्ति याः पूर्वं त्वया सह सेवनादाह्लादयन्निति भावः । एतेन विषयद्वेषरूपा अरत्यवस्थोक्ता । अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६८ ॥

उदितमिति । प्रियाम्प्रति प्रियामुद्दिश्य हृदयस्येदं हार्द्दं प्रेम । प्रेमा ना प्रियता हार्द्दं प्रेम स्नेह इत्यमरः । तस्येदमित्यण् प्रत्ययः । हृदयस्य हृल्लेखयदण्लासेष्विति हृदयस्य हृदादेशः । सहार्द्दं सस्नेहं इत्युदितम् । वदेः कर्म्मणि क्तः वचिस्वपीत्यादिना

दयिताहृतस्य युवभिर्मनसः
परिमूढतामिव गतैः प्रथमम् ।
उदिते ततः सपदि लब्धपदैः
रजनीकरेऽनुपदिभिः प्रययै ॥ ७० ॥

मन्मथारणम् । वचो दूतीवाक्यं प्रियतमेन श्रद्धीयत विश्वसितम् । दधातेः कर्मणि लङ् श्रदन्तरोरुपसर्गवचनाच्छब्दस्य प्राक् प्रयोगः । हि यस्मात् परः पूर्वमेव विदितेङ्गिते विदितपराभिप्राये जने । इङ्गितं हृद्गतोभावः । सज्जने समुदीरिताः गिरः सपदि लगन्ति सज्जन्ति खलु स्वयं प्रिया हृदयवेदित्वात् । स्वबुद्धेः संवादेन दूतीकथितं प्रियाविरहदुःखं विश्वस्यासेत्यर्थः । अर्थान्तरन्यासः । एषा कलहान्तरिता अतएव मानाख्योविप्रलम्भः शृङ्गारः पूर्वानुरागमाख्याय प्रवासकरुणात्मना विप्रलम्भश्चतुर्थोऽयमित्युक्तम् ॥ ६८ ॥

दयितेति । प्रथमञ्चन्द्रोदयात्प्राक् परिमूढतां निजमनोपहर्तृमार्गानभिज्ञतां गतैः ततः पश्चाद्रजनीकरे चन्द्रे उदिते सति सपदि लब्धपदैः दृष्टचोरपदचिह्नैः दयिताभिर्हृतस्य हृष्टस्यापहृतस्य च मनसोऽनुपदिभिरन्वेष्टृभिरन्विष्यद्भिरित्यर्थः । अतएव गम्योत्प्रेक्षा प्रागवलम्बितधैर्यत्यागनिमित्ता । अनुपदन्वेष्टेति निपातः । अन्वेष्टानुपदी प्रोक्तइति वैजयन्ती । युवभिः प्रययै प्रयातम् । यातेर्भावे लिट् । अयोक्तपदान्वयोत्प्रेक्षया चूर्णचोरत्वादिरूपकं गम्यतइत्यलङ्कारेणालङ्कारध्वनिः ॥ ७० ॥

निपपात सम्भ्रमभृतः श्रवणा
दसितभ्रुवः प्रणदितालिकुलम् ।
दयितावलोकविकसन्नयन
प्रसरप्रणुन्नमिव वारिरुहम् ॥ ७१ ॥

उपनेतुमुन्नतिमतेव दिवं
कुचयोर्युगेन तरसा कलिताम् ।
रभसोत्थितामुपगतः सहसा
परिरभ्य कश्चन वधूमरुधत् ॥ ७२ ॥

अथ यमां दृष्टप्राप्त्यनन्तरं वृत्तान्तं वर्णयति । निपपातेति । सम्भ्रमभृतः प्रत्युत्थानसंभ्रमिण्याः असितभ्रुवोऽङ्गनायाः प्रणदितालिकुलं कूजदलिपुञ्जम् । उपसर्गादसमासेऽपि णोपदेशस्येति णत्वम् । वारिरुहं श्रवणोत्पलं दयितावलोकेन विकसतो विस्तारं गच्छतो नयनस्य प्रसरेण प्रसारेण प्रणुन्नमिव । पूर्ववण्णत्वम् । निपपात तथा सम्भ्रान्तमित्यर्थः । अत्र सम्भ्रमहेतुकस्य कर्णोत्पलपातस्य नयनप्रसारहेतुकत्वमुत्प्रेक्ष्यते । एषा च दृष्टा ॥७१॥

उपनेतुमिति । सहसोपगतः हठादागतः कश्चन युवा अत एव रभसेनोत्थितां अत एवोन्नतिमता कुचयोर्युगेन करणेन दिवमाकाशमुपनेतुमिवोर्ध्वमुत्क्षेप्तुमिवेति फलोत्प्रेक्षा उत्थाननिमित्तोन्नत्यगुणनिमित्ता । तरसा बलेनाकलितां व्याप्तिसामर्थ्यया परिरभ्यालिङ्ग्यारुधत् रुद्धवान् उपवेशितवान् ऊर्ध्वोत्क्षेपान्निवारितवान् इति भावः । रुधेर्लुङि इरितो वेति विकल्पात् च्लेरङादेशः । एषा च दृष्टा ॥ ७२ ॥

अनुदेहमागतवतः प्रतिमां
परिणायकस्य गुरुमुद्वहता ।
मुकुरेण वेपथुभृतोऽतिभरात्
कथमप्यपाति न वधूकरतः ॥ ७३ ॥

अवनम्य वक्षसि निमग्नकुच
द्वितयेन गाढमुपगूढवता ।
दयितेन तत्क्षणचलद्रशना
कलकिङ्किणीरवमुदासि वधूः ॥ ७४ ॥

अनुदेहमिति । अनुदेहं देहस्य पश्चात् । अव्ययं विभक्तीत्यादिना पश्चादर्थेऽव्ययीभावः । आगतवतः परिणायकस्य परिणेतुः वोढुरित्यर्थः । नयतेर्ण्वुल् प्रत्ययः । उपसर्गादसमासेऽपीति णत्वम् । गुरुम्मूर्च्छाभारवतीञ्च प्रतिमाम्प्रतिबिम्बमुद्वहता पश्चात् स्थितस्यापि तदाभिमुख्यादिति भावः । मुकुरेण दर्पणेन कर्त्रा । दर्पणे मुकुरादर्शावित्यमरः । वेपथुभृतो नवोढतया भयहर्षाभ्यां कम्पमानात् अति अतिमात्रो भरो यस्य तस्मादतिभरात् प्रतिबिम्बगुरुमुकुरवत्त्वादिति भावः । वध्वा नवोढायाः करतः पाणितलात् । पञ्चम्यास्तसिल् । कथमपि नापाति न पतितं महता प्रयत्नेन धारितमित्यर्थः । भावे लुङ् । एषा च मुग्धा । अत्र वधूकरस्य भारासम्बन्धेऽपि सम्बन्धोक्तेरतिशयोक्तिः गुरुमिति श्लेषोत्थापितेति सङ्करः ॥ ७३ ॥

अवनम्येति । अवनम्य गाढमुपगूढवता आश्लिष्टवता अतएव वक्षसि निमग्नकुचद्वितयेन दयितेन तत्क्षणे चलन् उद्गच्छन्

कररुद्धनीवि दयितोपगतौ
गलितं त्वराविरहितासनया ।
क्षणदृष्टहाटकशिलासदृश
स्फुरदूरुभित्ति वसनं ववसे ॥ ७५ ॥
पिदधानमन्वगुपगम्य दृशौ
ब्रुवते जनाय वद कोऽयमिति ।
अभिधातुमध्यवससौ न गिरा
पुलकैः प्रियं नववधूर्न्यगदत् ॥ ७६ ॥

रशनायाः कलकिङ्किणीरवो यस्मिन् कर्मणि तद्यथा तथा वधूरङ्गना उदासि उत्क्षिप्ता । अस्यतेः कर्मणि लुङ् । एषा च हृष्टा रोमाञ्चाद्यनुभाववती च । स्वभावालङ्कारः ॥ ७४ ॥

कररुद्धेति । दयितोपगतौ प्रियागमने सति अतएव त्वरया विरहितमत्यक्तमासनं यया तया उत्थितयेत्यर्थः कयाचिदिति शेषः अतएव गलितं स्रस्तं अतएव कररुद्धनीवि करगृहीतबन्धं वसनं क्षणं दृष्टा हाटकशिलासदृशौ हेमशिलाप्रतिमौ स्फुरन्तौ ऊरुभित्तिरुद्धदेशो यस्मिन् कर्मणि तद्यथा तथा । हिरण्यं हेम हाटकमित्यमरः । ववसे आच्छादितम् । वस्तेराच्छादनार्थात्कर्मणि लिट् । ऊरुभित्तिरिवेत्युपमितसमासः । अत्रोपमयोः संसृष्टिः ॥ ७५ ॥

पिदधानमिति । नववधूर्नवोढा अन्वक् पश्चादुपगम्य दृशौ पिदधानं छादयन्तं प्रियं दृष्टिच्छादकः कः वद इति ब्रुवते पृच्छते जनाय गिरा वाचा अभिधातुमनध्यवसा नोत्सेहे लज्जयेति

उदितोरुसादमतिवेपथुमत्
सुदृशोऽभिभर्तृ विधुरं त्रपया।
वपुरादरातिशयशंसि पुनः
प्रतिपत्तिमूढमपि बाढमभूत् ॥ ७७ ॥

परिमन्थराभिरलघूरुभरा-
दधिवेश्म पत्युरुपचारविधौ।
स्खलिताभिरप्यनुपदं प्रमदाः
प्रणयातिभूमिमगमन् गतिभिः ॥ ७८ ॥

भावः । अभ्यवपूर्वात् स्यतेः कर्त्तरि लिट् । किन्तु पुलकैर्न्यगदत।
अत्र प्रियकामनस्यार्थस्य लज्जया असंलक्षितस्य पुलकैः प्रकाशनात्
सूक्ष्मालङ्कारः । असंलक्षितसूक्ष्मार्थप्रकाशः सूक्ष्म उच्यत इति
लक्षणात् ॥ ७६ ॥

उदितेति । अभिभर्तृ भर्त्तृसमक्षं । लक्षणेनाभिप्रती आभि
मुख्ये इत्यव्ययीभावः । उदित उत्पन्न ऊरुसादः ऊर्व्वोर्निश्चेष्टता
यस्य तत् अतिवेपथुमत् अतिकम्पवत् । एतेन विशेषणद्वयेन
प्रत्युत्थानालिङ्गनविरोधेन स्तम्भवेपथू सात्त्विकावुक्तौ । त्रपया
विधुरं विलक्ष । एतेन लज्जासञ्चारिणा प्रियवाक्पश्चलमुक्तम्।
एवं प्रतिपत्तिमूढमपि इतिकर्त्तव्यतामूढमपि सुदृशो वपुर्बाढ
भृशं आदरातिशयशंसि मुखरागादिलिङ्गैरादरविशेषव्यञ्जकमभूत्
सत्यादरे किमुपचारैरिति भावः ॥ ७७ ॥

परीति । प्रमदा अधिवेश्म निजवेश्मनि पत्युरुपचार
विधौ प्रत्युत्थानादिकर्म्मणि अलघोर्महत ऊरुभरात् परिमन्थराभि

मधुरोन्नतभ्रु ललितञ्च दृशोः
सकरप्रयोगचतुरञ्च वचः।
प्रकृतिस्थमेव निपुणागमितं
स्फुटनृत्यलीलमभवत्सुतनोः ॥ ७९ ॥
तदयुक्तमङ्ग तव विश्वसृजा
न कृतं यदीक्षणसहस्रतयम्।
प्रकटीकृता जगति येन खलु
स्फुटमिन्द्रताद्य मयि गोत्रभिदा ॥ ८० ॥

रलसाभिः अनुपदम्पदेपदे स्खलिताभिरपि गतिभिः प्रणयाति भूमिं प्रेमप्रकर्षमगमन्। परं प्रेमास्पदीभूता इत्यर्थः। प्रत्युत्थानादपि स्खलितगमनमेव पत्युः प्रीतिकरमभूदिति भावः। स्त्रीणां स्खलनं पत्युः प्रीतिकरमिति विरोधाभासोऽलङ्कारः ॥ ७८ ॥

मधुरेति। मधुरं मनोहरं यथा तथोन्नते उच्छ्रिते भ्रुवौ यस्मिन् तन्मधुरोन्नतभ्रु। गोस्त्रियोरुपसर्ज्जनस्येति ह्रस्वत्वम्। दृशोर्ललितं नयनचेष्टा च सकरप्रयोगं हस्ताभिनयसहितं चतुरञ्च तद्वचश्च सुतनोः स्त्रियाः प्रकृतिस्थमेव स्वभावसिद्धमेव सदपि निपुणेन निपुणाचार्य्येणागमितमभ्यासितम्। अतएव स्फुटं प्रथितं नृत्यलास्य लीलेव लीला यस्य तत्तथोक्तमभवदिति निदर्शनालङ्कारः। तथा नर्त्तक्युपमा गम्यते ॥ ७९ ॥

अथ कस्याश्चित्सपत्नीनामग्रहणाकुलितायाः कान्तोपालम्भं विवक्ष केनाह। तदित्यादि। अङ्गेत्यामन्त्रणे। विश्वसृजा विधात्रा तव

न विभावयत्यनिशमक्षिगता
मपि मां भवानतिसमीपतया।
हृदयस्थितामपि पुनः परितः
कथमीक्षते बहिरभीष्टतमाम् ॥ ८१ ॥

ईक्षणसहस्रतयं नेत्रसहस्रसमूहः। सङ्ख्याया अवयवे तयप्। न कृतं न दृष्टमिति यत् तदयुक्तं कुतः येन कारणेन मयि विषये स्फुटं प्रत्यक्षमेव गोत्रभिदा नामभेदिना च। गोत्रं नाम्नि कुलेऽप्य द्राविति यादवः। त्वयेति शेषः। अद्य इन्द्रता जगति प्रकटीकृता खलु। अत्र गोत्रभिदिति श्लेषानुप्राणितं सहस्राक्षत्वमुत्प्रेक्ष्यते ॥ ८० ॥

नेति। अनिशमक्षिगतामक्षुःसन्निकृष्टामपि द्वेष्यामिति च गम्यते। द्वेष्ये त्वक्षिगत इत्यमरः। मामतिसमीपतया भवान्न विभावयति। शेषे प्रथम इति प्रथमपुरुषः। इन्द्रियसन्निकृष्टमपि न लक्ष्यत इति विरोधाभासमात्रेऽर्थोऽपिशब्दः। परमार्थस्तु द्वेष्यत्वा दतिसामीप्याच्च अविभावनं न चित्रमिति भावः। अभीष्टतमां पुनर्हृदयस्थितां हृदयानपेतां अन्तर्हितामिति च गम्यते। अतएव विरोधाभासकोऽपिशब्दः। बहिः पुरतः कथम्भवान् ईक्षते इदन्तु चित्रं अतिसामीप्यव्यवधानस्यापि दर्शनप्रति बन्धकत्वादिति भावः। प्रेमास्पदं वस्तु परोक्षमप्यपरोक्षमीक्षते इतरदपरोक्षमपि परोक्षमेवेति तात्पर्यार्थः। विरोधाभासयोः सङ्करः ॥ ८१ ॥

इति गन्तुमिच्छुमभिधाय पुरः
क्षणदृष्टिपातविकसद्वदनाम् ।
स्वकरावलम्बनविमुक्तगल
त्कलकाञ्चि काञ्चिदरुणत्तरुणः ॥ ८२ ॥
अपयाति सरोषया निरस्ते
कृतकं कामिनि चुक्षुवे मृगाक्ष्या ।
कलयन्नपि सव्यथोऽवतस्थे
ऽशकुनेन स्खलितः किलेतरोऽपि ॥ ८३ ॥

इतीति । इत्यभिधाय पुरोगन्तुमिच्छुं क्षणं दृश्योः पातेन विकसद्वदनां परस्परदृष्टिपातमात्रगतकोपामित्यर्थः । काञ्चिन्नायिका तरुणो युवा स्वकरावलम्बनं प्रियकरेण ग्रहणं तेन विमुक्ता मुक्तबन्धना अतएव गलन्ती भ्रंशमाना कला मधुरा काञ्ची यस्मिन् कर्मणि तद्यथा तथा अरुणत् रुद्धवान् । रुधादिभ्यः श्नम् । एषा च कलहान्तरिता ॥ ८२ ॥

अपयातीति । सरोषया मृगाक्ष्या निरस्ते कामिनि भर्तरि अपयाति निर्याते सति कृतकं कृत्रिमं यथा तथा चुक्षुवे तन्निर्गमनप्रतिबन्धार्थं क्षुतं कृतमित्यर्थः । क्षु शब्दे भावे लिट् । इतरोऽपि नायकोऽपि कलयन्नपि कृतकोपमिति जानन्नपि अशकुनेन स्खलितः किल निरुद्ध इव सव्यथः सनिर्वेद इवावतस्थे स्थितः न गत इत्यर्थः उभावपि समानानुरागाविति भावः । एषा च कलहान्तरिता ॥ ८३ ॥

आलोक्य प्रियतममंशुके विनीवौ
यत्तस्थे नमितमुखेन्दु मानवत्या।
तन्नूनं पदमवलोकयाम्बभूवे
मानस्य द्रुतमपयानमास्थितस्य ॥ ८४ ॥
सुदृशः सरसव्यलीकतप्त
स्तरसाश्लिष्टवतः सयौवनोष्मा।
कथमप्यभवत् स्मरानलोष्णः
स्तनभारोन नखम्पचः प्रियस्य ॥ ८५ ॥

आलोक्येति। मानवत्या कोपवत्या स्त्रिया। स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये। प्रियतममालोक्य। स्थित्या समान कर्तृकत्वात् क्त्वानिर्देशः। अंशुके विनीवौ प्रियावलोकनाद्विगलित बन्धे सति। भाषितपुंस्कत्वात्पुंवद्भावः। स्त्रीकटीवस्त्रबन्धेऽपि नीविः परिपणेऽपि चेत्यमरः। नमितमुखेन्दु यथा तथा तस्थे स्थित मिति यत् तत्तस्मात्तत्समुखावस्थानात् द्रुतं शीघ्रं प्रियावलोकनक्षण एवेत्यर्थः। अपयानमास्थितस्य प्रयाणभूतस्य मानस्य कोपस्य पदम्पदचिह्नमवलोकयाम्बभूवे अन्वेषितमित्यर्थः। लज्जानिमि त्तायामुखनतेः अन्वेषणार्थत्वमुत्प्रेक्ष्यते नूनमिति मानगन्धोऽप्य स्तमितइति भावः॥ ८४ ॥

सुदृशइति। सरसमार्द्रं नूतनमिति यावत्। तेन व्यलीकेन प्रिय कृतेनापराधेन तप्तः तथा यौवनोष्मणा सह वर्त्ततइति सयौवनोष्मा। किञ्च स्मरानलोष्णः कामाग्निसन्तप्तः एवं त्रिविधाग्नितप्तोऽपि सुदृश स्तनभारस्तरसा वेगेनातिदाहहरणायामेवेत्यर्थः। आश्लिष्टवतः

दधत्युरोजद्वयमुर्वशीतलं
भुवोगतेव स्वयमुर्वशी तलम् ।
बभौ मुखेनाप्रतिमेन काचन
श्रियाधिका साम्प्रति मेनका च न ॥ ८६ ॥

आलिङ्गितवतः प्रियस्य कथमपि कथं वा कुतो हेतोरित्यर्थः । नखम्पचति क्वाथयतीति नखम्पचः । पचिरत्र तापवाची । मितनखे चेति खश्प्रत्ययः अरुर्द्विषदजन्तस्य मुमिति मुमागमः । नाभवत् तयोरण्वीषदुष्णोऽपि नाभूदित्यर्थः । प्रियाङ्गप्रतीकाराः खलु कामिनां सन्तापा इति भावः । तादृग्गात्रसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिः ॥ ८५ ॥

दधतीति । उरु महच्छीतलं स्पर्शयौवनोष्मभ्यामुष्णमुरोजद्वयं कुचद्वयं दधती भुवस्तलङ्गता स्वयं साक्षादुर्वशीव स्थितेत्युत्प्रेक्षा । काचन स्त्री अप्रतिमेन मुखेन बभौ साम्प्रति मेनका मेनकाख्याप्सरसश्च श्रिया सौन्दर्येणाधिका नेत्यतिशयोक्तिः । तयोर्यमकेन संसृष्टिः । वंशस्थं वृत्तम् ॥ ८६ ॥

इत्थमिति । इत्थमनेन प्रकारेण । इदमस्थमुरिति थमु प्रत्ययः । सपदि शान्ताः शमितो मानः कोप एवान्तरायो याभिस्ताः । वा दान्तेत्यादिना शमेर्ण्यन्तात् शान्तेति निपातः । प्रालेयांशोश्चन्द्रस्य रुचयो नारीः कामिभिर्घटयितुं । मितां ह्रस्वः पर्याप्तिवचनेष्वलमर्थेष्विति तुमुन्प्रत्ययः । कामं प्रकामं समर्थाः आसन् दूत्य इवेति भावः विलसन्तो मन्मथश्रीविलासा मणितशीत्कारादिमदनातिरेकविकारा याभिस्ताः ह्रीरेव प्रत्यूहो विघ्नस्तस्य प्रशमे निवारणे

इत्थन्नारीर्घटयितुमलङ्कामिभिः काममासन्
प्रालेयांशोः सपदि रुचयः शान्तमानान्तरायाः ।
आचार्य्यत्वं रतिषु विलसन्मन्मथश्रीविलासा
ह्रीप्रत्यूहप्रशमकुशलाः शीधवश्चक्रुरासाम् ॥८७॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये
प्रदोषवर्णनन्नाम नवमः सर्गः ॥ ९ ॥

कुशलाः शेरते आभिरिति शीधवो मदिराः । शीङो धुगित्यौणादिको धुक्प्रत्ययः । आसां रतिषु आचार्य्यत्वमुपदेशकत्वं । नर्म्मसख्य इवेति भावः । अत्र प्रथमार्द्धे प्रस्तुतचन्द्रभासां मानशमनकामिघटनपाटवविशेषणसाम्यादप्रस्तुतदूतीत्वप्रतीतेः समासोक्तिर्द्वितीयार्द्धे तु शीधुष्वारोपितस्याचार्य्यत्वस्य प्रकृतोपयोगात्परिणामः । तयोः सापेक्षत्वात्सङ्करः तेन च दूतीनर्म्मसख्युपमाध्वनिः । उत्तरसर्गे मधुपानरतोत्सववर्णनायास्त्वयमेव प्रस्तावः। मन्दाक्रान्ता वृत्तम् । मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ तोगुरू चेदिति लक्षणात् ॥ ८७ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्याख्याने सर्व्वङ्कषाख्ये नवमः सर्गः ॥ ९ ॥

सज्जितानि सुरभीण्यथ यूनां
मुक्तसन्नयनवारिरुहाणि ।
आययुः सुघटितानि सुरायाः
पात्रतां प्रियतमावदनानि ॥ १ ॥

आचार्यकं रतिगुरोर्धवत्युक्तं तत्प्रपञ्चयन्नादावस्मिन्सर्गे मधुपानं तावद्दर्शयति । सज्जितानीति । अथ पानगोष्ठीप्रस्तावानन्तरं सज्जितानि यावकचन्दनादिना संस्कृतानि सुरभीणि यथायोगं स्वभावसंस्काराभ्यां सुगन्धीनि नयनानि वारिरुहाणीव अन्यत्र नयनानीव वारिरुहाणि वासनार्थं क्षिप्तानि तान्युपसन्नानि येषु तानि तथोक्तानि सुघटितानि सुष्ठु सुवर्णैर्घटितानि अन्यत्र संस्थानवत्तया निर्मितानि वा प्रियतमावदनानि यूनां कामिनां सुरायाः पात्रतां पानभाजनतां ययुः प्रियामुखसम्पर्कजनितरसास्वादलोभात्ताभिः मुखसुरामेव पपुरिति भावः । अत्र वदनेष्वारोप्यमाणायाः पात्रतायास्तादात्म्येन तेषां पानसाधनतापादनेन कृतवदनोपयोगात्परिणामालङ्कारः । आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात् । तेन श्लेषसङ्कीर्णोपमा व्यज्यते । अस्मिन्सर्गे स्वागता वृत्तम् । स्वागतेति रनभागुरुयुग्मम् ॥ १ ॥

सोपचारमिति । अथ पात्रीकरणानन्तरं ते युवानः सोपचारं सप्रार्थनं उपशान्तविचारं निवृत्तशङ्कं विवादेति पाठे साक्षमव धूयेति पुनरुक्तिः वारंवारमित्यनुप्रासकमभङ्गस्य स्यात् । सानुतर्षं सतृष्णञ्च यथा तथा अनुतर्षत्यनेनेत्यनुतर्षो मद्यं । मद्येऽनुतर्षं मद्यपाने पात्रे तृष्णाभिलाषयोरित्युभयत्रापि विश्वः । तस्य पदैव

सोपचारमुपशान्तविचारं
सानुतर्षमनुतर्षपदेन ।
ते मुहूर्तमथ मूर्तमपीप्यन्
प्रेम मानमवधूय वधूः स्वाः ॥ २ ॥
क्रान्तकान्तवदनप्रतिबिम्बे
मग्नबालसहकारसुगन्धौ ।
स्वादुनि प्रणदितालिनि शीते
निर्ववार मधुनीन्द्रियवर्गः ॥ ३ ॥

क्रमेण मूर्तं मूर्तिमत् स्वाः स्वीया वधूर्मुहूर्तं क्षणमात्रं कोप मवधूयापीप्यन् पाययन्ति स्म । पिबतेर्णौ चङि लोपः पिबतेरीच्चा भ्यासस्येति धात्वाकारलोपः ईकारोभ्यासस्य । न पादमीत्या दिना निगरणार्थत्वमिति परस्मैपदनिषेधेऽपि णिचश्चेत्यात्मने पदविकल्पात्पाक्षिकं परस्मैपदम् । गतिबुद्धीत्यादिना वधूरित्यणि कर्तुः कर्मत्वम् । अनुतर्षपदेनेत्यनुतर्षापह्नवेन मूर्तप्रेमत्वोत्प्रेक्षणात् व्यञ्जकाप्रयोगाच्च प्रतीयमाना सापह्नवोत्प्रेक्षा ॥ २ ॥

क्रान्तेति । क्रान्तं सङ्क्रान्तं कान्तवदनप्रतिबिम्बं यस्मिंस्तस्मिन्नेव निर्वृतिकर इत्यर्थः । मग्नाः क्षिप्ताः बालसहकाराश्चूतविशेषपल्लवाः । आम्रश्चूतो रसालस्य सहकारोऽतिसौरभ इत्यमरः । तैः सुगन्धौ सुरभिणि घ्राणतर्पण इत्यर्थः । तृतीयादिषु भाषितपुंस्कं पुंव द्गालवस्येति पुंवद्भावः । स्वादुनि मधुरे रसनाकर्षिणीत्यर्थः । प्रणदि तालिनि गुञ्जन्मधुकरे श्रुतिसुख इत्यर्थः । शीते स्पर्शसुखे इत्यर्थः । एवम्पञ्चविषयसमष्टौ मधुनि मद्ये इन्द्रियवर्गश्चक्षुरादिपञ्चकं

कापिशायनसुगन्धि विघूर्ण
न्नुन्मदोऽधिशयितुं समशेत ।
फुल्लदृष्टि वदनं प्रमदाना
मन्यचारु चषकञ्च षडङ्घ्रिः ॥ ४ ॥
बिम्बितं स्रुतपरिस्रुति जानन्
भाजने जलजमित्यबलायाः ।
घ्रातुमक्षि पतति भ्रमरः स्म
भ्रान्तिभाजि भवति क्व विवेकः ॥ ५ ॥

निर्व्वार निर्वृतमभूत् । अत्र रूपरसादिपदार्थानां मधुविशेषण भावेन निर्वृतिहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् ॥ ३ ॥

कापिशायनेति । उन्मद उद्रिक्तमदः अतएव विघूर्णन् भ्रमन् षडङ्घ्रिः षट्पदः कापिशायनेन सुगन्धि सुरभि । कश्यं कल्यन्तथा मद्यं मैरेयं कापिशायनमिति वैजयन्ती । फुल्लदृष्टि विकसितनेत्रं प्रमदानां वनितानां वदनं अधिवासनार्थेन अन्येन चारु चषकञ्च पानपात्रञ्च । चषकोऽस्त्री पानपात्रमित्यमरः । अधिशयितुमधिष्ठातुं समशेत इदमस्यामोदस्याऽमि वेत्युभयलोभाद्दोलायमानमानस आसीदित्यर्थः । अत्र प्रकृतयोरेव वदनचषकयोः षट्पदाभिलाषास्पदत्वरूपैकधर्मयोगादौपम्यस्य गम्यतायां तुल्ययोगिताभेदः ॥ ४ ॥

बिम्बितमिति । स्रुता परिस्रुद्वारुणी यस्मिंस्तस्मिन् । परिस्रुद्वारुणात्मजेत्यमरः । भाजने पानपात्रे बिम्बितं प्रतिबिम्बितम् । अबलायाः अक्षि जलजमिति जानन् मत्वा भ्रान्त्या भ्राम्यन्नित्यर्थः ।

दत्तमिष्टतमया मधु पत्यु-
र्बाढमाप पिबतो रसवत्ताम्।
यत्सुवर्णमुकुटांशुभिरासी-
च्चेतनाविरहितैरपि पीतम्॥ ६॥

स्वादनेन सुतनोरविचारा-
दोष्ठतः समचरिष्ट रसोऽत्र।
अन्यमन्यदिव यन्मधु यूनः
स्वादमिष्टमतनिष्ट तदेव॥ ७॥

भ्रमरः घ्रातुं पतति स्म। तथा हि भ्रान्तिर्भ्रमणं विपरीतज्ञानञ्च तद्भाजि विवेको विचारः क भवति न क्वापीत्यर्थः। अत्र भ्रमरस्याब्जभ्रान्तेर्भ्रान्तिमदलङ्कारः तत्समर्थकत्वात् श्लेषमूलातिशयोक्त्युत्थापितोऽर्थान्तरन्यासः। तेन सहाङ्गाङ्गिभावेन सङ्करः॥५॥

दत्तमिति। इष्टतमया दत्तं मधु मद्यं कर्तृ पिबतः पत्युः रसवत्तां प्रेयसीकरस्पर्शादतिस्वादुतामाप। अतिशायने मतुप्। बाढं ध्रुवमित्युत्प्रेक्षा कुतः यद्यस्माच्चेतनाविरहितैरचेतनैः सुवर्णमुकुटांशुभिरपि मधुनि प्रसृतैरिति भावः। पीतं पीतवर्णमापीतञ्चासीत्। अत्र पीतमिति श्लेषमूलातिशयोक्त्या पीतिरूपक्रियाभेदाध्यवसायेनाचेतनांशुकर्तृकपानक्रियानिमित्ता प्रेयसीस्वहस्तदानाहितरसवत्तोत्प्रेक्षा। तथा च यदचेतनानामपि पेयमचेतनानां किं वक्तव्यमित्यर्थापत्तिध्वननादलङ्कारेणालङ्कारध्वनिः॥ ६॥

स्वादनेनेति। सुतनोः कव्याः स्वादनेनास्वादनेन ओष्ठतः ओष्ठात् रसः स्वादोऽत्र मधुनि अविचारादसंशयात्समचरिष्ट सङ्क्रान्तः।

बिभ्रतौ मधुरतामतिमात्रं
रागिभिर्युगपदेव पपाते ।
आननैर्मधुरसो विकसद्भि-
र्नासिकाभिरसितोत्पलगन्धः ॥ ८ ॥

सम्पूर्व्वाच्चरतेर्लुङ् । समस्तृतीयायुक्तादित्यात्मनेपदम् । कुतः यद्यस्मात्तदेव पूर्व्वभुक्तमेव मधु अन्यदिवापूर्व्वमिवान्यदपूर्व्वमिष्टं प्रियं स्वादं रसं यूनोऽतनिष्ट । तनोतेर्लुङि तङ् । आस्वादानन्तरमेव रसान्तरप्रादुर्भावादनन्तरन्यायात्तद्रसवद्गुणोत्प्रेक्षा सा चाविचारादिति व्यञ्जकप्रयोगाद्वाच्या ॥ ७ ॥

बिभ्रताविति । रागिभिः कामिभिरतिमात्रं मधुरतां स्वादुतां प्रियत्वं वा बिभ्रतौ । मधुरं रसवत् स्वादुप्रियेषु मधुरोऽन्यवदिति विश्वः । तस्य भावस्तां विकसद्भिर्विकसन्तीभिश्च विकसद्भिः तृष्णया विजृम्भमाणैः । नपुंसकमनपुंसकेनैकवच्चान्यतरस्यामिति नपुंसकैकशेषः । आननैः मधुरसो मद्यरसः नासिकाभिर्घ्राणैरसितोत्पलगन्धश्च युगपदेव पपाते पीतौ । भिन्नेन्द्रियग्राह्यावपि गन्धरसौ युगपत् स्वेन्द्रियसम्बन्धात् युगपद्गृहीतावित्यर्थः । अत्र मनसश्चाण्डसत्त्वात् यौगपद्याभिमानः । शतपत्रव्यतिभेदवदित्यणुपरिमाणवादिनः । वास्तवमेव यौगपद्यमिति मध्यमपरिमाणवादिनः । सार्व्वपथीनास्तु कवयस्त्वसमतिपन्नत्वेन । अत्र रसगन्धयोः प्रकृतयोरेकपानक्रियासम्बन्धात्तुल्ययोगिताभेदः ॥ ८ ॥

पीतवतीति । विदग्धैर्विदग्धुमिच्छौ उपदंशेच्छावतीत्यर्थः । दंशेः सन्नन्तादुप्रत्ययः । अभिनवे वल्लभे मधुना तुल्य

पीतवत्यभिमते मधुतुल्य
स्वादमोष्ठरुचकं विदशन्त्या ।
लभ्यते स्म परिरक्ततयात्मा
यावकेन वियतापि युवत्याः ॥ ९ ॥

कस्यचित्समदनं मदनीय
प्रेयसीवदनपानपरस्य ।
स्वादितः सकृदिवासव एव
प्रत्युत क्षणविदंशपदेऽभूत् ॥ १० ॥

स्वादं तुल्यरसमतुल्यत्वञ्च स्वादुतामात्रेण नान्यथा विलक्षणरसस्य अनुपदंशत्वात् ओष्ठो रुचकमाभरणमिवेत्युपमितसमासः । रुचना यान्तु रुचकमस्त्राभरणमाल्ययोरिति विश्वः । तमोष्ठरुचकं ओष्ठश्रेष्ठं पीतवति सति वियता अपगच्छतापि । इणो लटः शत्रादेशे इणो यणिति यणादेशः । युवत्याः युवतेः । ङिति ह्रस्वश्चेति वा नदीत्वादाडागमः । यावकेनालक्तकेन परिरक्ततया दन्तनिष्पीडनकृतेन रागेण हेतुना आत्मा स्वरूपं लभ्यते स्म लब्धः पुनरुद्भूतमित्यर्थः । अत्राधरपानादपगतस्यापि यावकस्य रागप्रादुर्भावनिमित्ता विरोधगर्भा पुनरुद्भवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या च ॥ ९ ॥

कस्यचिदिति । समदनं यथा तथा मदयतीति मदनीयं मदकारि । कृत्यल्युटो बहुलमिति कर्त्तर्यनीयर्प्रत्ययः । तस्य प्रेयसीवदनस्य पानं परं प्रधानं यस्य तस्य कामुकत्वात् प्रिया मुखपानासक्तस्य, कस्यचित्कामिनः सकृदिव स्वादितः अवाङ्मुखेन

पीतशीधुमधुरैर्मिथुनाना-
माननैः परिहृतं चषकान्तः ।
व्रीडया रुददिवालिविरावै-
र्नीलनीरजमगच्छदधस्तात् ॥ ११ ॥

पीतः । इवशब्दो वाक्यालङ्कारे । आसव एव प्रत्युत वैपरीत्ये इति गणव्याख्याने । क्षणं विदंशपदे उपदंशस्थानेऽभूत् । अन्येषां मधुपानलोलुपानामधरस्वाद उपदंशः अस्य त्वधरपानैकपरस्य मध्वेवोपदंश इत्यर्थः । अधरपानस्योपदंशत्वसम्बन्धेऽप्यसम्बन्धः आसवस्य तदसम्बन्धेऽपि सम्बन्ध इत्यतिशयोक्त्योरर्थापेक्षत्वात्संसृष्टिः ॥ १० ॥

पीतेति । पीतशीधूनि पीतमद्यानि । अतएव मधुराणि मनोज्ञानि तैर्मिथुनानां स्त्रीपुंसानामाननैः चषकान्तः पानपात्राभ्यन्तरे । चषकोऽस्त्री पानपात्रमित्यमरः । परिहृतं त्यक्तं नीलनीरजं वासनार्थं निःक्षिप्तं नीलोत्पलं व्रीडया परिहारलज्जया अलिविरावैः रुददिवाधस्तादगच्छत् । अत्र मद्यापगमनिमित्तस्य नीलनीरजाधोगमनस्य रोदनविशिष्टलज्जाहेतुकत्वोत्प्रेक्षा । सा चालिविरावैरिति व्यधिकरणकारिपरिणामोज्जीवितेति सङ्करः ॥ ११ ॥

अथ मदानुभावान्वर्णयति । प्रातिभमित्यादि । चषाणां सरकाणां समाहारस्त्रिसरकं त्रिवारमधुपानं । सरकं शीधुपात्रे स्याच्छीधुपाने च शीधुनीति विश्वः । तद्धितार्थेत्यादिना समाहारे द्विगुः पात्रादित्वान्नपुंसकत्वम् । तेन त्रिसरकेण त्रिपानं महाति भूमिरिति पानप्रसिद्धिः प्रतिभैव प्रातिभम्प्रतिभाविशेषः ।

प्रातिभं त्रिसरकेण गतानां
वक्रवाक्यरचनारमणीयः ।
गूढसूचितरहस्यसहासः
सुभ्रुवां प्रववृते परिहासः ॥ १२ ॥
हावहारि हसितं वचनानां
कौशलं दृशि विकारविशेषाः ।
चक्रिरे भृशमृजोरपि वध्वाः
कामिनेव तरुणेन मदेन ॥ १३ ॥

प्रज्ञादित्वात्स्वार्थेऽण् प्रत्ययः । यद्वा ज्ञानबीजभूतः संस्कारविशेषः प्रतिभा इति काव्यप्रकाशकारः । तत्र भवं प्रातिभं ज्ञानप्रभावविशेष एव । भवार्थेऽण्प्रत्ययः । तत्प्रातिभङ्गतानां त्रिवारमधुपानोत्कटमदोद्बुद्धसंस्कारप्रभावितप्रगल्भमतीनामित्यर्थः । सुभ्रुवां स्त्रीणां वक्रवाक्यरचनारमणीयः प्रतिकूलवाक्यप्रयोगरम्यः। गूढानि पूर्व्वं लज्जया संवृतानि सूचितानि सम्प्रति मदेन प्रकाशितानि रहस्यानि ग्राम्यावयवचेष्टाप्रलपितानि यस्मिन् स गूढसूचितरहस्यः सचासौ सहासश्चेति विशेषणसमासः वैवक्षिकविशेषणविशेष्यभावात् । हासोहास्यमित्यमरः। परिहासोनर्म्मकेलिरुपहासमक्रीडेति यावत् । द्रवकेलिपरीहासाइत्यमरः । प्रववृते प्रवृत्तः इतः परमदसञ्चारो ॥ १२ ॥

हावेति। तरुणेनोत्कटेन यूना च मदेन कामिनेव ऋजोर्मुग्धाया अपि वध्वाः किमुत प्रौढानामिति भावः । हावहारि विलास मनोहरं हसितं हासः वचनानां कौशलं प्रागल्भ्यं दृशि विकार

अप्रसन्नमपराद्धरि पत्यौ
कोपदीप्तमुररीकृतधैर्य्यम् ।
क्षालितञ्च शमितञ्च वधूनां
द्रावितञ्च हृदयम्मधुवारैः ॥ १४ ॥

विशेषाः विलासविशेषाश्चक्रिरे कृतानि । पुंसेव सौगन्ध्यमयाऽजयित्वा प्रौढ्यं नीतेत्यर्थः । अत्र हर्षितकौशलविकाराणां यौगपद्यात्स्या समुच्चयः । गुणक्रियायौगपद्यं समुच्चयइति लक्षणम् । तस्यौपम्य योगेन सङ्करः तेन स्त्रजोरपि इत्यत्र किमुत प्रौढानामित्यर्थापत्ति र्व्यज्यते ॥ १३ ॥

अप्रसन्नमिति । अपराद्धरि आगस्कारिणि । राधेस्तृच् प्रत्ययः । पत्यौ विषये अप्रसन्नं कलुषं क्षुभितमित्यर्थः । कोपदीप्तं कोपेन ज्वलितं उररीकृतधैर्य्यं अङ्गीकृतकाठिन्यं । उरीकृतमुररी कृतमित्यमरः । ऊर्यादिच्विडाचयेति गतित्वात्कुगतिप्रादयइति समासः । वधूनां हृदयं मधुवारैः मद्यपर्यायैः । मधुवारा मधुक्रमाइत्यमरः । क्षालितं धौतं च । शमितं निर्वापितं च । द्रावितं द्रवीकृतं च । अन्यथा कथन्ताद्दृगप्रसन्नतादीप्तताकाठिनतानां हठान्निवृत्तिरिति भावः । अत्र क्षालितत्वादीनामेकत्वादिरोधा त्साद्दृश्याच्च न संशयालङ्कारः । सति साद्दृश्ये विरुद्धानेककोटि गोचरत्वात्तस्य किन्त्वप्रसन्नत्वादिनिरासनिमित्तकं क्षालितत्वाद्यु त्प्रेक्षात्रयं चशब्दानुवृत्तेः तथाप्रसन्नत्वाद्युद्देशिनां क्षालितत्वाद्यु द्देशिभिर्यथासङ्ख्येनान्वयमपेक्षतइति यथासङ्ख्यालङ्कारेण सङ्कीर्य्यते ॥ १४ ॥

सन्तमेव चिरमप्रकृतत्वा
दप्रकाशितमदिद्युतदङ्गे ।
विभ्रमम्मधुमदः प्रमदाना
न्धातुलीनमुपसर्ग इवार्थम् ॥ १५ ॥
सावशेषपदमुक्तमुपेक्षा
स्रस्तमाल्यवसनाभरणेषु ।
गन्तुमुत्थितमकारणतः स्म
द्योतयन्ति मदविभ्रममासाम् ॥ १६ ॥

सन्तमिति । मधुमदः प्रमदानामङ्गे वपुषि अन्यत्र धस्मात्प्रत्ययविधिरित्युक्तलक्षणे प्रकृत्याख्ये शब्दरूपे चिरं सर्वदा सन्तमेव एकत्र स्वभावात् अन्यत्र त्वनेकार्थत्वाद्धातूनामिति भावः । किन्त्वाप्रकृतत्वादप्रस्तुतत्वात् अप्रसक्तत्वादिति भावः । अप्रकाशितमव्यञ्जितं विभ्रमं विलासमन्यातौ भ्वादिके लीनं गूढं अर्थमभिधेयं उपसर्गः प्रादिरिवादिद्युतत् द्योतयति स्म । द्युतेर्णौ चङ्युपधाह्रस्वः । द्युतिस्वाप्योः सम्प्रसारणमिति अभ्यासस्य सम्प्रसारणमिकारः । उपसर्गस्य धातुलीनार्थद्योतकत्वमादानसन्दानादावनुसन्धेयम् । उपमालङ्कारः ॥ १५ ॥

सावशेषमिति । सावशेषाण्यर्द्धोक्तानि पदानि यस्मिन् तदुक्तमुक्तिर्वाक्यं स्रस्तेषु माल्यवसनाभरणेषु उपेक्षा अनादरः अकारणतोऽकस्मादेव गन्तुमुत्थितमुत्थानञ्च आसां स्त्रीणां मदविभ्रमं मदविकारं द्योतयन्ति स्म । एतैरनुभावैरासां मदसञ्चारो ज्ञात इत्यर्थः । अत्रार्द्धोक्तादीनां स्वलेकपोतिकया मदद्योतने प्रवृत्तत्वा

मद्यमन्दविगलत्त्रपमीष-
दुद्गुन्मिषितपक्ष्म दधत्या ।
वीक्ष्यते स्म शनकैर्नववध्वा
कामिनोमुखमधोमुखयैव ॥ १७ ॥
या कथञ्चन सखीवचनेन
प्रागभिप्रियतमम्प्रजगल्भे ।
व्रीडजाड्यमभजन्मधुपा सा
स्वाम्मदात्प्रकृतिमेति हि सर्व्वः ॥ १८ ॥

त्पराख्यो द्वितीयसमुच्चयः । खलेकपोतन्यायेन बहूनां कार्य्यसाधने । कारणानां समुद्योगः स द्वितीयः समुच्चय इति लक्षणात् ॥ १६ ॥

मद्येति । मद्येन मद्यपानेन मन्दमल्पं विगलन्ती त्रपा यस्य तत् । अतएवेषदुन्मिषितानि पक्ष्माणि लोमानि यस्य तच्चक्षु र्दधत्या नववध्वा नवोढया कामिनः प्रियस्य मुखमधोमुखयैव नमितवदनयैव । स्वाङ्गाच्चोपसर्ज्जनादिति विकल्पादनीकारः । शनकैरसम्भ्रमेण वीक्ष्यते स्म तिर्य्यगालोकितमित्यर्थः अत्रापि मद मानाभ्यां त्रपैव बलीयसीति मौग्ध्यातिशयोक्तिः । समुच्चयेऽवस्था मुग्धा लज्जाविजितमन्मथा ॥ १७ ॥

येति । या स्त्री कथञ्चन कृच्छ्रेण सखीवचनेन सखीप्रेरणया प्राग्मदात्पूर्व्वं अभिप्रियतमं प्रियतमसमक्षम् । आभिमुख्येऽव्ययी भावः । प्रजगल्भे प्रगल्भते स्म । सा स्त्री मधु पिबतीति मधुपा । आतोऽनुपसर्ग्गे कः । व्रीडं जाड्यं मौग्ध्यमभजत् विहायागन्तुकं धर्म्मं स्वभावमभजन्मदेनेत्यर्थः । तथा हि सर्व्वो जनो मदाद्धेतोः स्वां

छादितः कथमपि त्रपयाऽन्त
र्यः प्रियम्प्रति चिराय रमण्याः ।
वारुणीमदविशङ्कमथावि
श्चक्षुषोऽभवदसाविव रागः ॥ १९ ॥
आगताननगणितप्रतियाता
न्वल्लभानभिसिसारयिषूणाम् ।
प्रापि चेतसि स विप्रतिसारे
सुभ्रुवामवसरः सरकेण ॥ २० ॥

स्वकीयां प्रकृतिमेति स्वभावं गच्छति स्वाभाविकधर्म्मप्रकाशनं मदधर्म्मः । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ १८ ॥

छादितइति । रमण्या यः प्रियम्प्रति रागोविषयाभिलाषः चिराय त्रपया ब्रीडयान्तश्छादितः संवृतश्वावयमेव रागोऽथास्मि न्नवसर वारुणीमदविशङ्कं मद्यमदेन निश्शङ्कञ्चक्षुषोर्नेत्रादावि रभवद्दिवाविर्भूतः किं । अत्र रतिरागमदरागयोरभिलाषपाटलिम रूपयोः श्लेषप्रतिभोत्थापिताभेदाध्यवसायमूलातिशयोक्तिमहिम्ना योऽन्तर्गतोरागः सएव चिरनिरुद्धः सम्प्रति मदोद्घाटित त्रपाकपाट्या चक्षुर्द्वारा वहिरुद्भिन्नइत्युत्प्रेक्ष्यते । आविर्भूवोर्व्यवधानं कविसातत्र्यात् ॥ १९ ॥

आगतानिति । आगतान् स्वयमागतान् तथाप्यगणिताश्च ते प्रतियाताश्चेति । स्नातानुलिप्तइतिवत् पूर्व्वकाले समासः । ता न्वल्लभानभिसिसारयिषूणां सम्प्रति चन्द्रोदये स्वयमेवाभिसारयितु मभिगन्तुमिच्छूनाम् । अभिसारयतेः स्वार्थण्यन्तात्सन्नन्तादुप्रत्ययः ।

मा पुनस्तमभिसीसरमाग
स्कारिणम्मदविमोहितचित्ता ।
योषिदित्यभिललाष न हालां
न्दुस्त्यजः खलु सुखादपि मानः ॥ २१ ॥

सुभ्रुवां स्त्रीणां चेतसि सविप्रतिसारे कष्टमस्माभिरकार्य्यं कृतमिति पश्चात्तापयुक्ते सति । पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपी त्यमरः । सरकेण मधुना मधुपानेन वा । सरकं शीधुपाने स्या च्छीधुपाने च शीधुनीति विश्वः । अवसरः प्रापि प्राप्तः स्वयत्नमन सौकर्य्याय मधुपानमुक्तिरित्यर्थः । अत्राभिसारणस्य पश्चात्ताप करणकस्य मदयोगात्सौकर्य्योक्तेः समाध्यलङ्कारः । समाधिः सुकरं कार्य्यं कारणान्तरयोगत इति काव्यप्रकाशे ॥ २० ॥

मा पुनरिति । मदेन विमोहितचित्ता भ्रमितचित्ता सती अहमिति शेषः । आगस्कारिणमपराधकृतम् । अतः स्वकमीत्या दिना विसर्जनीयस्य सत्वम् । तं पुनर्भूयोमाभिसीसरं नाभिसार याणि । सरतेः स्वार्थे णौ चङ्युपधायाह्रस्वः दीर्घोलघोरित्यभ्या सस्य दीर्घः । इति इत्यालोच्येत्यर्थः । गम्यमानार्थत्वादप्रयोगः । अन्यथा पौनरुक्त्यमित्यलङ्कारिकाः । योषित्काचित् स्त्री हालां सुरां । सुरा हलिप्रिया हालेत्यमरः । नाभिललाष तथा हि सुखादपि मानोदुस्त्यजः खलु अतोऽल्पकारणादधिकार्यहानिरिति नाबक्ष्मीयमित्यर्थान्तरन्यासः ॥ २१ ॥

कृतेति । सप्रसादं मनःप्रसादपूर्व्वकं ममेदं श्रेयस्करमिति भावनापूर्व्वकमित्यर्थः । अन्यथा फलोदयएव न स्यात् । दैवज्ञे भेषजे

ह्रीविमोहमहरद्दयितानाम्
अन्तिकं रतिसुखाय निनाय ।
सप्रसादमिव सेवितमासीत्
सद्य एव फलदं मधु तासाम् ॥ २२ ॥
दत्तमात्तमदनं दयितेन
व्याप्तमातिशयिकेन रसेन ।
सस्वदे मुखसुरं प्रमदाभ्यो
नामरूढमपि च व्युदपादि ॥ २३ ॥

गुराविति वचनादिति भावः । सेवितमुपभुक्तमिति हेतोर्मधु तासां सद्य एव फलदमासीत् । कुतः ह्रीविमोहं व्रीडाजाड्यं अहरत् रतिसुखाय सुरतसुखाय दयितानामन्तिकं निनाय । अत्र ह्रीहरणान्तिकनयनवाक्याभ्यां फलदानवाक्यार्थसमर्थनादनेकवाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । २२ ॥

दत्तमिति । आत्तमदनमाहितमदनं यथा तथा दयितेन दत्तं अत एवातिशयिकेनातिशयप्रचुरेण । विनयादिभ्यष्ठक् । रसेन स्वादेन व्याप्तं स्वादुतरमित्यर्थः । मुखस्य सुरा मुखसुरं गण्डूषमद्यम । विभाषा सेनासुराच्छायाशालानिशानामिति नपुंसकत्वम् । प्रकृष्टो मदो यासां ताभ्यः प्रमदाभ्यः स्त्रीभ्यः । रुच्यर्थानां प्रीयमाण इति सम्प्रदानसंज्ञा । सस्वदे रुरुचे प्रीतिकरमभूदित्यर्थः । कर्त्तरि लिट् । अतएव तदेव तासां मदकरमासीदित्याह । नामेति । रूढं प्रागश्वकर्णादिवदव्युत्पन्नं नामापि प्रमदेति नामधेयञ्च व्युदपादि व्युत्पन्नं जातम् । यथा प्रकृष्टमद

लब्धसौरभगुणो मदिराणा-
मङ्गनास्यचषकस्य च गन्धः ।
मोदितालिरितरेतरयोगा-
दन्यतामभजतातिशयं नु ॥ २४ ॥
मानभङ्गपटुना सुरतेच्छां
तन्वता प्रथयता दृशि रागम् ।
लेभिरे सपदि भावयतान्त-
र्योषितः प्रणयिनेव मदेन ॥ २५ ॥

योगात्प्रमदेत्यन्वर्थनामत्वं भवेत् तथा तासेनामाद्यन्नित्यर्थः॰॰ । पद्यतेरण्यन्तात्कर्त्तरि लुङ् चिण् ते पदइति चिण्प्रत्यये चिणो लुक् । प्रमदाभिरिति पाठे मखदे खदयामक्रे इत्यर्थः । स्वादन मशनमश्वलणमाहारो भोजनं खदनमिति हलायुधे । खदिस्वाद्यो रेकार्थत्वाभिधानात्कर्म्मणि लिट् । अत्र पूर्ब्बवाक्यार्थस्योत्तर वाक्यार्थहेतुत्वात्काव्यलिङ्गम् ॥ २३ ॥

लब्धेति । लब्धसौरभगुणो मेलनात्प्राप्तसौरभोत्कर्षः अत एव मोदितालिः आनन्दितभृङ्गः मदिराणां मद्यानां अङ्गनास्य मेव चषकमस्य च गन्धो गन्धगुणः इतरेतरस्य योगान्मिश्रणा दन्यतामपूर्ब्बतामतिशयं नु तत्रैवोत्कर्षं वा अभजत । यच्चकर्दमादौ घृताक्तकुङ्कुमादौ चोभयथा दर्शनादयं संशयइति भावः । अतएव संशयालङ्कारः ॥ २४ ॥

मानेति । मानभङ्गपटुना कोपशमनसमर्थेन सुरतेच्छां कामन्वता मदनोद्दीपकेन दृशि रागमारुण्यमोतिशयं प्रथयता प्रकाशयता

पानधौतनवयावकरागं
सुभ्रुवो निभृतचुम्बनदक्षाः ।
प्रेयसामधररागरसेन
स्वं किलाधरमुपालि ररञ्जुः ॥ २६ ॥

अर्पितं रसितवत्यपि नाम
ग्राह्यमन्ययुवतेर्दयितेन ।
उज्झति स्म मदमप्यपिबन्ती
वीक्ष्य मद्यमितरा तु ममाद ॥ २७ ॥

अन्तरन्तःकरणम्भावयता रञ्जयता मदेन प्रणयिनेव योषितः स्त्रियो लेभिरे प्राप्ताः । रागमिति श्लेषमूलातिशयोक्तिसङ्कीर्णेय मुपमा ॥ २५ ॥

पानेति । उपालि आल्याः समीपे । समीपार्थेऽव्ययीभावः । आली सखी वयस्या चेत्यमरः । अतएव निभृतचुम्बनदक्षाः गूढचुम्बनचतुराः सुभ्रुवः पानधौतनवयावकरागं मधुपानक्षालितलाक्षारागं स्वमधरं प्रेयसामधरेषु यो रागरसस्ताम्बूलरागद्रवस्तेन ररञ्जुः किल । अन्यगुणस्यान्यत्राधानमिह रञ्जेरर्थः । किलेत्य परमार्थे तेन पानधौतरागेषु स्वाधरेषु प्रेयोऽधररागसङ्क्रमणनाटितकेन सखीसमक्षमेव प्रियांश्चुम्बनङ्कारयामासुरित्यर्थः । अत्रागन्तुना रञ्जनेन सहजचुम्बननिगूहनान्मीलनालङ्कारभेदः । मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनमिति लक्षणात् ॥ २६ ॥

अर्पितमिति । दयितेनान्ययुवतेः सपत्न्याः नामग्राहं नाम गृहीत्वा । नाम्न्यादिशिग्रहोरिति णमुल् प्रत्ययः । अर्पितन्दत्तं

अन्ययान्यवनितागतचित्तं
चित्तनाथमभिशङ्कितवत्या ।
पीतभूरिसुरयापि न मेदे
निर्वृतिर्हि मनसोमदहेतुः ॥ २८ ॥
कोपवत्यनुनयानगृहीत्वा
प्राग्यो मधुमदाहितमोहा ।
कोपितं विरहखेदितचित्ता
कान्तमेव कलयन्त्यनुनिन्ये ॥ २९ ॥

मद्यं रमितवती आस्वादितवत्यपि । रमतेरास्वादनार्थात् क्तवतो उगितश्चेति ङीप् । काचिदिति शेषः । मदमुज्झति स्म न ममादेत्यर्थः । इतरा तु सपत्नी तु मद्यमपिवन्त्यपि वीक्ष्य दृष्ट्वैव ममाद मत्ता । मनोनिर्वृतिरेव मदहेतुरिति भावः । अत्र पूर्वार्द्धे रमितवत्यपि न ममादेति विशेषोक्तिः उत्तरार्द्धे त्वपिवन्त्यपि ममादेति विभावना । कारणेन विना कार्य्यस्योत्पत्तिः स्याद्विभावना । तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते । तयोः सङ्करः ॥ २७ ॥

अन्ययेति । चित्तनाथभर्त्तारमन्यवनितागतचित्तं सपत्नीसङ्क्रान्तचेतसमभिशङ्कितवत्या तस्मिन्नविश्वस्तया अन्यया कयाचित् स्त्रिया पीतभूरिसुरयापि न मेदे न मत्तम् । माद्यतेर्भावे लिट् । तथा हि मनसोनिर्वृतिर्मदहेतुर्हि । सामान्येन विशेषसमर्थनादर्थान्तरन्यासः । एषा नवोढा भीरुश्च । अन्यथा चाशङ्कायाः पानाघटनादिति ॥ २८ ॥

कोपवतीति । प्राक् प्रथमं कोपवती सरोषा अतएवानुनयान् प्रियप्रार्थनान्यगृहीत्वा अनादृत्य । अथो सम्प्रति विरहखेदितचित्ता

कुर्व्वता मुकुलिताक्षियुगाना
मङ्गसादमवसादितवाचाम् ।
ईर्ष्ययेव हरता ह्रियमासां
तद्गुणः स्वयमकारि मदेन ॥ ३० ॥

गण्डभित्तिषु पुरा सदृशीषु
व्याञ्जि नाञ्चितदृशाम्प्रतिमेन्दुः ।
पानपाटलितकान्तिषु पश्चा
ल्लोध्रचूर्णतिलकाकृतिरासीत् ॥ ३१ ॥

पश्चात्तापतप्ता काचिन्मधुमदेनाहितमोहा कृतचित्तविभ्रमा सती कान्तमेव कोपितमात्मना रोषितं कलयन्ती जानती अनुनिन्ये । सापराधाहं क्षमस्वेति प्रार्थितवती मत्तेषु किन्न सम्भावितमिति भावः । एषा कलहान्तरिता ॥ २९ ॥

कुर्व्वतेति । मुकुलिताक्षियुगानां अवसादितवाचाङ्कुण्ठितगिरामासां स्त्रीणामङ्गसादमङ्गसादरूपशरीरनिश्चेष्टतां कुर्व्वता ह्रियं हरता मदेन ईर्ष्ययेवेत्युत्प्रेक्षा । तस्याः ह्रियोगुणस्तद्गुणः अक्षिनिमीलनवाक्सादाङ्गसादरूपः स्वयमकारि कृतः ह्रीमदयोस्तुल्यानुभावकत्वादिति भावः ॥ ३० ॥

गण्डेति । प्रतिमेन्दुः प्रतिविम्बचन्द्रः सदृशीषु स्वसमानवर्णासु अञ्चितदृशां सुदृशां गण्डभित्तिषु पुरा सुरापानात्पूर्व्वं न व्याञ्जि नाभेदि । तदेकतापत्त्या तद्विविक्ततया न गृहीत इत्यर्थः । अतएव सामान्यालङ्कारः । सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणात् । विपूर्व्वादञ्जेः कर्म्मणि लुङ् आडजादीनामित्याडागमः ।

उद्धतैरिव परस्परसङ्गा-
द्दीरितान्युभयतः कुचकुम्भैः ।
योषितामतिमदेन जुघूर्णु-
र्विभ्रमातिशयपुंषि वपूंषि ॥ २२ ॥

पश्चात्पानानन्तरम् पानेन पानमदेन पाटलिता पाटलीकृता कान्तिर्यामात्नास्तु गण्डभित्तिषु लोध्रचूर्णस्य लोध्रपरागस्य तिलकश्चित्रकम् । तमालपत्रतिलकचित्रकाणि विशेषकाः द्वितीयञ्च तुरीयञ्च न स्त्रियामित्यमरः । तस्याकृतिरिवाकृतिर्यस्य स आसीत् । वैवर्ण्यादिविकार एवासीदित्यर्थः । तिलकाकृतिरिति निदर्शना पूर्व्वाकाशमान्यसंसृष्टा ॥ २१ ॥

उद्धतैरिति । उद्धतैः दृप्तैरिव कुचकुम्भैः परस्परसङ्गादन्योऽन्यसङ्घर्षादुभयतदीरितान्याकृष्टानि तथा विभ्रमातिशयं विलासविशेषं पुष्णन्ति तानि । नपुंसकस्य झलचइति नुमागमः । योषितां वपूंषि । पूर्व्ववन्नुमागमः सान्तमहतः संयोगस्येति दीर्घः । अतिमदेन जुघूर्णुः भ्रेमुः दृप्तसंघर्षसाटसपीडाकरः यथा वृषभकलहाद्दत्तपादभङ्गइति भावः ॥ २२ ॥

चारुतेति । आसां योषितां वपुश्चारुता सौन्दर्य्यमभूषयत् । तां चारुतां अनूननवयौवनयोगः सम्पूर्णयौवनसम्पत्तिरभूषयत् । तं पुनर्नवयौवनयोगन्तु मकरकेतनलक्ष्मीर्मदमसम्पत्तिरभूषयत् । तां मकरकेतनलक्ष्मीन्दयितसङ्गम एव भूषा यस्य स मदोऽभूषयत् । तां मदः तस्य दयितसङ्गमइत्यर्थः प्रक्रमानुसारात्तां मदस्तमपि

चारुता वपुरभूषयदासा-
न्तामनूननवयौवनयोगः ।
तम्पुनर्मकरकेतनलक्ष्मी-
स्तां मदो दयितसङ्गमभूषः ॥ ३३ ॥
क्षीवतामुपगतास्वनुवेलं
तासु रोषपरितोषवतीषु ।
अग्रहीन्नु सशरन्धनुरुज्झा-
मास नूज्झितनिषङ्गमनङ्गः ॥ ३४ ॥

वल्लभसङ्ग इति प्रयोक्तव्ये विशेषणत्वेन प्रयोगो महाकवीनामनु-
सङ्गात् । यथा भारवेः प्रयोगः शुचि भूषयतीत्यादौ श्लोके
स नयाङ्कः स च सिद्धिभूषण इति वक्तव्ये सनयापादितसिद्धि-
भूषण इति । अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषकत्वादेकावली । यत्रो-
त्तरोत्तरेषां स्यात्पूर्वंपूर्वंप्रति क्रमात् । विशेषकत्वकथनमसा-
वेकावली मतेति लक्षणात् ॥ ३३ ॥

क्षीवतामिति । क्षीवतां मत्तताम् । मत्ते शौण्डोत्कटक्षीवा
इत्यमरः । क्षीव मदे इत्यस्माद्धातोरनुपसर्गात् फुल्लक्षीवकृशोल्लाघा
इति निष्ठान्तो निपातितः । उपगतासु प्राप्तासु । अत एवानुवेलं
अतिसततं रोषपरितोषवतीषु तासु स्त्रीषु विषये अनङ्गः
सशरन्धनुरग्रहीन्नु उज्झितनिषङ्गन्त्यक्ततूणीरं यथा तथा
उज्झामास नु तत्याज किं । उज्झतेर्लिट् इजादेश्च गुरुमतो
ऽनृच्छ इत्याम्प्रत्ययः । रुष्टासु धनुर्ग्रहणं परितुष्टासु
त्यागश्च रोषपरितोषाभ्यामुत्प्रेक्ष्यते । अन्यथा रोषानन्तरं
परितोषः परितोषानन्तरं रोषश्च न स्यादिति भावः ।

शङ्कयाऽन्ययुवतौ वनिताभिः
प्रत्यभेदि दयितः स्फुटमेव ।
न क्षमम्भवति तत्त्वविचारे
मत्सरेण हतसंवृति चेतः ॥ २५ ॥

आननैर्विचकसे हृषिताभि
र्वल्लभानभि तनूभिरभावि ।
आर्द्रतां हृदयमाप च रोषो
लोलति स्म वचनेषु वधूनाम् ॥ २६ ॥

रोषपरितोषयोर्धनुर्ग्रहणाग्रहणाभ्यां यथासङ्ख्येनान्वयाद्यथासङ्ख्यालङ्कारभेदः तेनोत्प्रेक्षयोरङ्गाङ्गिभावेन सङ्करः ॥ २४ ॥

शङ्कयेति । वनिताभिरन्ययुवतौ सपत्न्यां शङ्कया तत्सङ्गमशङ्कामात्रेण दयितः स्फुटमेव निश्चितवदेव प्रत्यभेदि विद्धवत्त्वोद्घाटितइत्यर्थः अनुचितोऽयमविमृश्य मिथ्याभियोगइति मत्वा परिहरति । नेति । मत्सरेण वैरेण हता संवृतिर्गोप्यगोपनं यस्य तच्चेतस्तत्त्वविचारे भूतार्थचिन्तायां क्षमं शक्तिमत् न भवति मत्सरग्रस्तचेतसामेष स्वभावइति भावः । सामान्येन विशेषसमर्थन रूपोऽर्थान्तरन्यासः ॥ २५ ॥

आननैरिति । वल्लभानभि वल्लभसमक्षमित्यर्थः । अभिरभाग इति लक्षणार्थकर्मप्रवचनीयत्वात् द्वितीया । वधूनामाननैर्विचकसे विकसितम् । भावे लिट् । तनूभिर्हृषिताभिः पुलकिताभिः । हृषेर्लोमस्वितीडागमः । अभावि भूतं । भावे लुङ् । हृदयमार्द्रतामाप काठिन्यञ्जहावित्यर्थः । वचनेषु रोषो लोलति

रूपमप्रतिविधानमनोज्ञं
प्रेम कार्य्यमनपेक्ष्य विकाशि ।
चाटु चाकृतकसम्भ्रममासां
कार्म्मणत्वमगमन्रमणेषु ॥ २७ ॥
लीलयैव सुतनोस्तुलयित्वा
गौरवाढ्यमपि लावणिकेन ।
मानवञ्चनविदा वदनेन
क्रीतमेव हृदयन्दयितस्य ॥ २८ ॥

चलति स्म वचनमतो रोषो वक्रतापि निवृत्तेत्यर्थः अत्र वधूव्यापन विकासाद्यनेकक्रियायौगपद्यात्समुच्चयालङ्कारः । गुणक्रियायौगपद्यं समुच्चयइति लक्षणात् ॥ २६ ॥

रूपमिति । अप्रतिविधानमप्रतियत्नमेव मनोज्ञं स्वभावसुन्दरमित्यर्थः रूपमाकृतिः कार्य्यम्प्रयोजनमनपेक्ष्य विकाशि वर्द्धमानं अनौपाधिकमित्यर्थः । प्रेम अकृतकसम्भ्रममकृत्रिमसंरम्भञ्चाटु प्रियवचनञ्चासां स्त्रीणां रमणेषु विषये कार्म्मणत्वं वशीकरणकर्म्मत्वम् । वशक्रिया संवदनं मूलकर्म्म तु कार्म्मणमित्यमरः । तद्युक्तात्कर्म्मणोऽण् । अगमन् प्रापानि । गमेर्लुङ् प्लेरङादेशः । अत्र रूपादिष्वारोप्यमाणस्य कार्म्मणत्वस्य प्रकृतोपयोगात्परिणामालङ्कारः ॥ २७ ॥

लीलयेति । लावण्यङ्कान्तिविशेषोऽस्यास्तीति लावणिकं लावण्यवत् । अतइनिठनाविति ठन्प्रत्यये ठस्येकः यस्येति चेत्यलोपे हलस्तद्धितस्येति यकारलोपः । अन्यत्र तु लवणं पण्यमस्यास्तीति

स्पर्शभाजि विशदच्छविचारे
कल्पिते मृगदृशां सुरताय ।
सम्मतिन्दधति पेतुरजस्रं
दृष्टयः प्रियतमे शयने च ॥ १९ ॥

लावणिको लवणव्यवहारी । लवणाट्ठञ् प्रत्ययः । तेन लावणिकेन मानवग्रहणविदा अहङ्कारहरणदक्षेण । अन्यत्र परिमाणप्रतारणपटुना । सुतनोः स्त्रियाः वदनेन कर्त्रा गौरवाढ्यं गाम्भीर्यसम्पन्नमपि । अन्यत्र गुरुत्वयुक्तमपि दयितस्य हृदयं लीलया विलासेनैव तुलयित्वा । अन्यत्रानायासेनैव उन्माय गुर्व्वपि लघुतया मीत्वेत्यर्थः । क्रीतं वशीकृतमेव । अन्यत्र दानेन स्वीकृतमेव । अत्र विशेषणमहिम्नैव वदने लावणिकत्वस्य हृदये पण्यत्वस्य च प्रतीतेः समासोक्तिरलङ्कारः । हृदयस्य प्रतीयमानपण्याभेदेन क्रीतत्वोक्तेरलौकिकहृदयावर्ज्जने लौकिकक्रयव्यवहारसमारोपः ॥ १८ ॥

एवं महानुभावं वर्णयित्वा सम्प्रति सुरतकेलिवर्णनं प्रस्तौति । तच्च सुरतं द्विविधं बाह्यमाभ्यन्तरञ्चेति । बाह्यञ्च प्रेक्षणभाषणाश्लेषचुम्बनाद्यनेकभेदभिन्नम् । तत्र दृष्टिविशेषणमाह । स्पर्शेति । स्पर्शभाजि सुखस्पर्शे विशदा विमला शुभ्रा च या छविः कान्तिस्तया चारौ रम्ये सुरताय कल्पिते रतिसुखदानाय सृष्टे विचारयोग्यतया सज्जीकृते च सम्मतिमानुकूल्यं सम्मतं साम्यञ्च दधति दधाने प्रियतमे शयने च मृगदृशां दृष्टयोऽजस्रमविच्छिन्नं पेतुः पतिताः युगपदुभयावलोकनादभिलाषं व्यञ्जयामासुरित्यर्थः । अत्र प्रियतमशयनयोः प्रकृतयोरेव धर्म्मसाम्यादौपम्यप्रतीतेः केवलप्रकृतगोचरा तुल्ययोगिता ॥ १९ ॥

यूनि रागतरलैरपि तिर्य्यक्
पातिभिः श्रुतिगुणेन युतस्य ।
दीर्घदर्शिभिरकारि वधूनां
लङ्घनन्न नयनैः श्रवणस्य ॥ ४० ॥
सङ्कथेच्छुरभिधातुमनीशा
सम्मुखी न च बभूव दिदृक्षुः ।
स्पर्शनेन दयितस्य नतभ्रू
रङ्गसङ्गचपलापि चकम्पे ॥ ४१ ॥

यूनीति । रागेण तरलैश्चपलैरपि दर्शनोत्सुकैरपीत्यर्थः । यूनि प्रिये तिर्य्यक्पातिभिस्तपथा साचि विप्रसारिभिः दीर्घदर्शिभि रायतान्तैः आलोकनव्यापारपरैरित्यर्थः । अन्यत्र रागद्वेषचपलैः अतएव तिर्य्यक्पातिभिः कुटिलवृत्तिभिरपि दीर्घदर्शिभिरागामि कार्य्यज्ञैरित्यर्थः वधूनां नयनैः श्रुतिगुणेन शब्दग्रहणपाटवेन युतस्य । श्रूयतेऽनेनेति श्रवणं श्रोत्रन्तस्य लङ्घनमतिक्रमोनाकारि न चक्रे । कर्णान्ते विश्रान्तमित्यर्थः अन्यत्र तु श्रुतिः श्रवणं अभ्यासइति यावत् । सैव गुणस्तेन युतस्य श्रूयतइति श्रवणं शास्त्रं तस्य लङ्घनं नाकारि रागद्वेषयस्तोऽपि शास्त्रज्ञः कदाचिच्छास्त्राति क्रमाद्बिभेतीति भावः । अयञ्च व्यवहारोनयनेषु रागतरलैरित्यादि श्लिष्टविशेषणमहिम्ना गम्यतइति समासोक्तिभेदः इयञ्च रागदृष्टि रौत्सुक्यानुभावः ॥ ४० ॥

सङ्कथेति । नतभ्रूः स्त्री सङ्कथायां सम्भाषणे इच्छुरिच्छा वत्यपि । विन्दुरिच्छुरित्युप्रत्ययान्तोनिपातः । अभिधातुं

उत्तरीयविनयात्त्रपमाणा
रुन्धती किल तदीक्षणमार्गम् ।
आवरिष्ट विकटेन विवोढु
र्वक्षसैव कुचमण्डलमन्या ॥ ४२ ॥

सम्भाषयितुमनीशा अक्षमा बभूव । अप्यर्थस्वशब्दः दिदृक्षुर्द्रष्टुमिच्छुरपि । दृशेः सन्नन्तादुप्रत्ययः । सम्मुखी अभिमुखी न बभूव । अङ्गसङ्गचपला गात्रस्पर्शचपलापि दयितस्य स्पर्शनेन चकम्पे कम्पितवती । एते कम्पादयो लज्जासाध्वसानुभावाः । लज्जाविजितमन्मथयं मुग्धा ॥ ४१ ॥

अथालिङ्गनं वर्णयति । उत्तरीयेति । अन्या स्त्री उत्तरीयविनयात्कुचांशुकाकर्षणात् । त्रपमाणा तदीक्षणमार्गं तस्य वोढुः दृष्टिपथं रुन्धती किल आवृण्वतीव न तु वस्तुत इति किलार्थः । विकटेन विशालेन । विसङ्कटं विशालं स्यात्करालं विकटं तथेति वैजयन्ती । सम्प्रोदश्च कटजिति चकारादेः कटच्प्रत्ययः । विवोढुः परिणेतुः वक्षसैव कुचमण्डलं आवरिष्ट आवृतवती कुचावरणव्याजेनालिङ्गितवती । वृञो लुङि तङ् इडागमः । अत्र कुचसंवरणेनालिङ्गनेच्छानिगूहनान्मीलनभेदः एषा लज्जामन्मथ मध्यस्था मध्यमा ॥ ४२ ॥

अंशुकमिति । अंशुकमुत्तरीयं हृतवता परिणेत्रा भर्त्रा तन्व्याः हस्तयोः बाह्वोः स्वस्तिकाबन्धविशेषः तेनापिहिते आच्छादिते मुग्धे सुन्दरे कुचाग्रे यस्याः सा तथोक्ता । अचिरोढा नवोढा भिन्नानि शङ्खस्य वलयानि यस्मिन् कर्मणि तद्यथा तथा रभसाद्वेगात्पर्यरम्भि

अंशुकं हृतवता तनुबाहु
स्वस्तिकापिहितमुग्धकुचाग्रा ।
भिन्नशङ्खवलयम्परिणेत्रा
पर्य्यरम्भि रभसादचिरोढा ॥ ४३ ॥

सञ्जहार सहसा परिरब्ध
प्रेयसीषु विरहय्य विरोधम् ।
संहितं रतिपतिः स्मितभिन्न
क्रोधमाशु तरुणेषु महेषुम् ॥ ४४ ॥

गाढमाश्लिष्टेत्यर्थः । रभेर्ण्यन्तात्कर्म्मणि लुङ् । रभेरशब्लिटोरिति नुमागमः । एषातिरोहितमुग्धा ॥ ४३ ॥

सञ्जहारेति । तरुणेषु युवसु विरोधं प्रणयकलहं विरहय्य विहाय । रहयतेः स्वार्थण्यन्तात् क्त्वा तस्य ल्यप् ल्यपि लघुपूर्व्वादित्ययादेशः । सहसा परिरब्धाः प्रेयास्योयैस्तेषु परिरब्धप्रेयसीषु आश्लिष्टवधूकेषु सत्सु । ईयसश्चेति कपोऽभावः ईयसोबहुव्रीहौ प्रतिषेधोवक्तव्यइत्युपसर्ज्जनस्य ह्रस्वनिषेधः । रतिपतिः कामः संहितमारोपितं महेषुं महास्त्रं शरं स्मितभिन्नक्रोधं स्वयत्नसाफल्यात् स्मितेनोज्भितपूर्व्वरोषं च यथा तथा आशु सञ्जहार । विहेऽर्थे साधनानवकाशादित्यर्थः परिरब्धास्तोयूनां विरहहति भावः ॥ ४४ ॥

संश्रमाणमिति । उपयन्तरि भर्त्तरि रसेन रागान्धतयेत्यर्थः । उपसपत्नि सपत्नीसमीपे । समीपार्थेऽव्ययीभावे नपुंसक ह्रस्वत्वम् । श्लिष्टवति आश्लिष्टवति सति संश्रमाणं स्पर्शसुखपारवश्या

स्रंसमानमुपयन्तरि बध्वाः
श्लिष्टवत्युपसपत्नि रसेन ।
आत्मनैव रुरुधे कृतिनेव
स्वेदसङ्गि वसनं जघनेन ॥ ४५ ॥
पीडिते पुरउरःप्रतिपेषं
भर्त्तरि स्तनयुगेन युवत्याः ।
स्पष्टमेव दलतः प्रतिनार्य्या
स्तन्मयत्वमभवद्धृदयस्य ॥ ४६ ॥

ह्रस्यमानं तथापि स्वेदसङ्गि स्वेदेन सात्त्विकेन सक्तम्बध्वा वसनं कृतिना कुशलेन स्वस्वेदं लाघवमिति जानतेवेत्यर्थः । जघनेन कर्त्रा आत्मनैव स्वयमेव रुरुधे रुद्धम् । सा तु न वेत्तीति भावः स्वेद हेतुकस्य वसनरोधस्य स्वलाघवज्ञानहेतुकत्वमुत्प्रेक्ष्यते ॥ ४५ ॥

पीडितइति । युवत्याः युवतेः स्तनयुगेन भर्त्तरि प्रतिनार्य्याः पुरोऽग्रे समक्षमेव उरः प्रतिपिष्य । उरःप्रतिपेषं । परि क्लिश्यमाने चेति णमुल् सप्तम्यन्तमित्यव्ययसंज्ञा । वक्षः प्रतिपीड्ये त्यर्थः पीडिते सति दलतः ईर्ष्यया दीर्य्यमाणस्य प्रतिनार्य्याः सपत्न्याः हृदयस्य तन्मयत्वं भर्त्तृतादात्म्यं स्पष्टमभवदेव । अन्यथा कथ मन्यपीडनादन्यदलनमिति भावः । अतएवेयमसङ्गत्यलङ्कारोपजी विनी तन्मयत्वोत्प्रेक्षेति सङ्करः कार्य्यकारणयोर्भिन्नदेशत्वे स्याद सङ्गतिः ॥ ४६ ॥

दीपितेति । वल्लभे दीपितस्मरं उद्दीपितकामं यथा तथा उरस्युपपीडं । उरस्युपपीड्य सप्तम्यां चोपपीडरुधकर्षइति णमुल् ।

दीपितस्मरमुरस्युपपीडं
वल्लभे घनमभिष्वजमाने ।
वक्रतां न ययतुः कुचकुम्भौ
सुभ्रुवः कठिनतातिशयेन ॥ ४७ ॥
सम्प्रवेष्टुमिव योषित ईषुः
श्लिष्यतां हृदयमिष्टतमानाम् ।
आत्मनः सततमेव तदन्त-
र्वर्तिनो न खलु नूनमजानन् ॥ ४८ ॥

मत्पुरुषे इति वल्लभमित्यलुक् । घनं गाढमभिष्वजमाने परिरभमाणे सति । परिरम्भः परिष्वङ्गः संश्लेष उपगूहनमित्यमरः । सुभ्रुवः कुचकुम्भौ कठिनतातिशयेन वक्रतां परिमण्डलतां न ययतुर्न प्राप्तौ । अत्र गाढालिङ्गनात्कुचकुम्भयोर्वक्रत्वसम्बन्धेऽप्यसम्बन्धोक्तेरतिशयोक्तिरलङ्कारः ॥ ४७ ॥

सम्प्रवेष्टुमिति । योषितः श्लिष्यतामालिङ्गतामिष्टतमानां हृदयं संप्रवेष्टुमीषुरिच्छन्ति स्मेव इति गाढालिङ्गननिमित्ता क्रियास्वरूपोत्प्रेक्षा गुणस्वरूपोत्प्रेक्षा वा विवक्षाभेदात् । अत एवात्मनः स्वान्सततमेव तदन्तर्वर्तिनस्तेषामिष्टतमानां अन्तर्हृदये एव स्थितान्नाजानन्नूनं अन्यथा कथं पुनः प्रवेशेच्छेति भावः इयमज्ञानोत्प्रेक्षा पूर्वोत्प्रेक्षासापेक्षेति सजातीयसङ्करः ॥ ४८ ॥

स्नेहेति । स्नेहनिर्भरम्प्रेमरसपूर्णं तैलादिकद्रवद्रव्यपूर्णं च । स्नेहोऽस्त्री द्रवसार्द्रयोरिति वैजयन्ती । अतएव वधूनां वपुरन्तरार्द्रतामवलमधत्त स्नेहद्रव्यसम्पूर्णमन्तरार्द्रं भवतीति भावः । अत्रांशयो

स्वेदनिर्भरमधत्त वधूना-
मार्द्रतां वपुरसंशयमन्तः ।
यूनि गाढपरिरम्भिणि वस्त्र-
क्नोपमम्बु ववृषे यदनेन ॥ ४९ ॥

न स्म माति वपुषः प्रमदाना-
मन्तरिष्टतमसङ्गमजन्मा ।
यद्बहुर्बहिरवाप्य विकाशं
व्यानशे तनुरुहाण्यपि हर्षः ॥ ५० ॥

संशयस्याभावः । अर्थाभावेऽव्ययीभावः । कुतो यद्यस्माद्यूनि पुंसि गाढम्परिरम्भत इति परिरम्भिणि गाढाश्लेषिणि सति अनेन वपुषा कर्त्रा वस्त्रं क्नोपयित्वा परिषिच्य वस्त्रक्नोपम् । क्नुयधातोर्ण्यन्तादर्त्तिह्रीत्यादिना पुगागमे चेले क्नोपेरिति णमुल् । अम्बु ववृषे । वृषेः कर्मणि लिट् । अन्तरार्द्रस्य निष्पीडनाद्बहिरम्बुस्रावसम्भवात् तन्निमित्तेयमन्तरार्द्रत्वोत्प्रेक्षा प्रियाङ्गसङ्गात्ताः स्विन्ना इति वालिको द्योक्तिः ॥ ४९ ॥

न स्मेति । प्रमदानामिष्टतमसङ्गमेन जन्म यस्य सः । जन्माद्युत्तरपदत्वाद्व्यधिकरणबहुव्रीहिरिति वामनः । बहुर्विपुलः । विपुलानेकयोर्बहुरिति वैजयन्ती । हर्षो वपुषोऽन्तर्न माति स्म अत्युद्रेकान्नान्तःसम्मित इत्युत्प्रेक्षा । कुतः यद्यस्माद्बहिर्वपुषो बहिर्विकाशं वृद्धिमवाप्य तनुरुहाणि रोमाण्यपि व्यानशे व्याप । कर्त्तरि लिट् । अश्नोतेश्चेति नुडागमः । अथ बहिर्विकाशस्य

यत् प्रियव्यतिकराद्वनितानां
मङ्गजेन पुलकेन बभूवे।
प्रापि तेन भृशमुच्छ्वसिताभि
र्नीविभिः सपदि बन्धनमोक्षः ॥ ५१ ॥
ह्रीभरादवनतम्परिरम्भे
रागवानवटुजेष्ववकृष्य।
अर्पितोष्ठदलमाननपद्मं
योषितो मुकुलिताक्षमधासीत् ॥ ५२ ॥

निमित्तकान्तरमानोत्प्रेक्षा आनन्दरोमाञ्चयोः श्लेषमूलाभेदाध्यवसायातिशयोक्त्यनुप्राणितेति सङ्करः ॥ ५० ॥

यदिति। वनितानां स्त्रीणां प्रियस्य भर्त्तुर्व्यतिकरात्सम्पर्कात्सङ्गमादङ्गजेनाङ्गभुवापिना पुत्रेण च पुलकेन बभूवे भूतमिति यत्। भावे लिट्। तेन पुलकोदयेन पुत्रोदयेन च भृशमुच्छ्वसिताभिरुच्छ्वसिताभिर्मोचाशया आश्वसिताभिश्च नीविभिः लक्षणया कटिवस्त्रैः अन्यथा बन्धनशब्देन पौनरुक्त्यात्। सपदि बन्धनमोक्षोग्रन्थिभेदो निगडमोचनं च प्रापि प्राप्तः। कर्म्मणि लुङ्। अभ्युदयेषु राजानो बद्धान् मोचयन्तीति भावः। अत्र प्रकृतपुलकनीविगताकुलत्वोच्छ्वसितत्वादिविशेषणसाम्याद्बन्धनमोचणसमन्वाच्च अप्रकृतपुत्रकारागतिप्रतीतेः समासोक्तिरलङ्कारः ॥ ५१ ॥

अथ चुम्बनक्रीडां वर्णयति। ह्रीति। परिरम्भे चालिङ्गने ह्रीरेव भरस्तस्मादवनतं भाराक्रान्तं नमतीति भावः। अर्पितं स्वमुखे निहितमोष्ठ एव दलं पत्रं यस्य तद्योषितश्चाननमेव पद्मं

पल्लवोपमितिसाम्यसपक्षं
दष्टवत्यधरबिम्बमभीष्टे ।
पर्य्यकूजि सरुजेव तरुण्या
स्तारलोलवलयेन करेण ॥ ५३ ॥

रागवान् रागी अवटुजेषु चरमशिरोरुहेषु । अवटुर्घाटा कृकाटिकेत्यमरः । अवकृष्य अवटुजाकर्षणेनोन्नमय्येत्यर्थः । मुकुलिताक्षं निमीलितनेत्रं यथा तथा । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षजिति षच् प्रत्ययः । अधासीत् पपौ । धेटो लुङ् आदेच इत्यात्त्वं अस्तिसिचोऽपृक्त इतीडागमः । अत्राननोष्ठस्य पद्मदलत्वरूपणात्तत्रानुरागिणो मधुपत्वं च गम्यते इत्येकदेशविवर्त्ति रूपकम् ॥ ५२ ॥

पल्लवेति । पल्लवेन उपमित्या सादृश्येन यत्साम्यन्तेन सपक्षं उभयोरपि पल्लवैकोपमानत्वसाधर्म्यात्तुल्यभूतं अधरो बिम्बमिव तदधरबिम्बं अभीष्टे प्रियतमे दष्टवति सति । रुज रुजा सरुक् । तेन सहेति बहुव्रीहिः सहस्य सः । तेन सरुजेव सव्यथेनेव । स्त्री रुग्रुजा चोपतापश्चेत्यमरः । तारा उच्चैः क्रोशन्ति कुतः लोलानि चलानि वलयानि कङ्कणानि यस्य तेन तरुण्याः करेण पर्य्यकूजि परिकूजितम् । भावे लुङ् । सुखदुःखाद्दुःखायन्ते सुरत इति भावः । अत्र कङ्कणदारकस्य करकूजनस्य विधूननहेतुकस्य सरुजेवेति रुग्हेतुकत्वमुत्प्रेक्ष्यते ॥ ५३ ॥

केनचिदिति । केनचिद्रागिणा मधुरं रसवन्तमुल्बणराग मतिरक्तं तथापि विरहेष्वधिकं वाम्येन विरहोष्मणा तप्तं सुभ्रुव

केनचिन्मधुरमुल्बणरागं
वाष्पतप्तमधिकं विरहेषु ।
ओष्ठपल्लवमपास्य मुहूर्त्तं
सुभ्रुवः सरसमक्षि चुचुम्बे ॥ ५४ ॥

रेचितम्परिजनेन महीयः
केवलाभिरतदम्पति धाम ।
साम्यमाप कमलासखविष्वक्-
सेनसेवितयुगान्तपयोधेः ॥ ५५ ॥

ओष्ठपल्लवमपास्य सरसं सान्द्रशीतं अक्षि चुचुम्बे चुम्बितं । अत्र तप्तत्वरसवत्त्वयोर्विशेषणगत्याधरत्यागाक्षिचुम्बनहेतुकत्वाव्यलिङ्गद्वयं सापेक्षत्वात्सङ्कीर्य्यते ॥ ५४ ॥

एवं वाह्यसुरतमुक्त्वाभ्यन्तरसुरतवर्णनमारभते । रेचितमित्यादि । परिजनेन रेचितं रिक्तीकृतम् । अतएव केवलावेकाकिनावभिरतौ दम्पती जायापती यस्मिन् तत् । दम्पती जम्पती जायापती भार्य्यापती समावित्यमरः । राजदन्तादिषु जाया शब्दस्य जम्भावो दम्भावश्च विकल्पान्निपातितः । महीयो महत्तरं धाम केलिगृहं कमलासखेन लक्ष्मीभर्त्रा विष्वक्सेनेन जनार्दनेन विष्णुना सेवितस्याधिष्ठितस्य युगान्तपयोधेः साम्यमापेत्युपमालङ्कारः । युगान्तविशेषणं विविक्तताद्योतनार्थं एतेनेच्छाविहारतोक्ता ॥ ५५ ॥

अथ विस्रम्भविहारानेवाह । आवृतानीति । उच्चैरुन्नतेनोरसिजद्वितयेन निरन्तरं नीरन्ध्रमावृतानि संवृतान्यपि योषितां

आवृतान्यपि निरन्तरमुच्चै
र्योषितामुरसिजद्वितयेन।
रागिणामितरेतरविमर्शाङ्गिः
पाणिभिर्जगृहिरे हृदयानि ॥ ५६ ॥

कामिनामसकलानि विभुग्नैः
स्वेदवारिमृदुभिः करजाग्रैः।
अक्रियन्त कठिनेषु कथञ्चि
त्कामिनीकुचतटेषु पदानि ॥ ५७ ॥

हृदयानि वक्षांसि चेतांसि च इतरेतरविमर्शाङ्गिरितरस्ततः परा मृशद्भिः रागिणाम्पाणिभिर्जगृहिरे गृहीतानि। निगूढं वस्तु हस्त परामर्शालभ्यतइति एकत्र भावः अन्यत्र हस्तलब्धः प्रियकर स्पर्शस्तासां हृदयग्राह्योऽभूदिति भावः। नैरन्तर्येण प्रतिबध्नतो रपि कुचयोः कथञ्चिदन्तरं सम्पाद्य हृदयानि स्पृष्टान्येवेति वाक्यार्थः। अत्र द्वितयानामपि हृदयानां प्रकृतत्वात्केवलप्रकृतश्लेषः ॥ ५६ ॥

कामिनामिति। स्वेदवारिणा सात्त्विकेनाङ्गुलीस्वेदेन मृदुभिः कोमलताङ्गतैरतएव विभुग्नैर्विनम्रैः कामिनां करजाग्रैः नखाग्रैः कठिनेषु कामिनीकुचतटेषु असकलान्यसमग्राणि पदानि क्षतानि कथञ्चिदक्रियन्त कृतानि। कठिनेषु मृदूनां पदलाभोदुःसम्पाद्य इति भावः। नखक्रिया प्रवृत्तेत्यर्थः। अत्र कुचानामीदृ क्काठिन्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः ॥ ५७ ॥

सोष्मणस्तनशिलाशिखराग्रा
दात्तघर्म्मसलिलैस्तरुणानाम्।
उच्छ्वसत्कमलचारुषु हस्तै
र्निम्ननाभिसरसीषु निपेते ॥ ५८ ॥
आमृशद्भिरभितोवलिवीची
र्लोलमानविततांगुलिहस्तैः।
सुभ्रुवामनुभवात् प्रतिपेदे
मुष्टिमेयमिति मध्यमभीष्टैः ॥ ५९ ॥

सोष्मणइति। सोष्मणो यौवनोष्मयुक्तात् स्तनावेव शिला शिखरे तयोरग्रादुपरिभागादात्तघर्म्मसलिलैरुष्णदेशविहारात् प्राप्तस्वेदैस्तरुणानां हस्तैरुच्छ्वसत्कमलवद्विकचकमलैश्च चारुषु निम्ननाभिष्वेव सरसीषु निपेते निपतितम्। ऊष्मखिन्नानां कुतश्चित् उन्नतात्पयसि पातो युक्तइति भावः। प्रथमं कुचौ स्पृष्ट्वा ततो नाभिदेशमस्पृशन्नित्यर्थः। अत्र कुचयोः शिलाशिखरत्वेन नाभीनां सरसीत्वेन च रूपणाद्धस्तानां आपातिपुरुषत्वरूपणङ्गम्यतइति एकदेशविवर्त्ति रूपकम्॥ ५८ ॥

आमृशद्भिरिति। वलयो नीचयइव वलिवीचीरभित आमृशद्भिः लोलमानाश्चलनशीलाः। ताच्छील्यवयोवचनशक्तिषु चानशिति चानश् प्रत्ययः न तु शानच् लोलतेः परस्मैपदित्वात्। अतएव लोलमाना इत्यस्यानश्इति वामनः। लोलमाना विततः प्रसारिताश्चाङ्गुलयो येषान्ते तथाविधा हस्ता येषान्तैरभीष्टैः प्रियतमैः सुभ्रुवां मध्यं मुष्टिमेयमिति मुष्ट्या मातुं शक्यमिति अनुभवात्प्रत्यक्षेण·

प्राप्य नाभिनदमज्जनमाशु
प्रस्थितं निवसनग्रहणाय ।
औपनीविकमरुन्ध किल स्त्री
वल्लभस्य करमात्मकराभ्याम् ॥ ६० ॥

कामिनः कृतरतोत्सवकाल-
क्षेपमाकुलवधूकरसङ्गि ।
मेखलागुणविलग्नमलघ्या-
न्दीर्घसूत्रमकरोत्परिधानम् ॥ ६१ ॥

मुख्या मानं कृत्वैव प्रतिपदे प्रतिबद्धुं न तु मध्यिक्लिमाचादिति भावः । अमुष्टिमेयस्य मुष्टिमेयत्वोक्तेरतिशयोक्तिभेदोऽलङ्कारः ॥ ५९ ॥

प्राप्येति । नाभिरेव नदो ह्रद इति रूपकम् तत्र मज्जनं प्राप्याशु निवसनग्रहणाय वस्त्राकर्षणायेत्यर्थः । स्नातस्य वस्त्रग्रहणं युक्तमिति भावः । प्रस्थितम्प्रवृत्तम् । उपनीवि नीविसमीपे प्रायेण तत्र भवमौपनीविकम् तच व्यापृतमित्यर्थः । उपजानूपकर्णोपनीवेष्ठक् । वल्लभस्य करं स्त्री आत्मकराभ्यां अरुन्ध किल रोधं नाटितवतीत्यर्थः ॥ ६० ॥

कामिन इति । आकुले प्रियकरनिवारणव्यग्रे वधूकरे सङ्गि सक्तं मेखलैव गुणस्तत्र विलग्नं दीर्घसूत्रं आततन्तुकं अत्यायतत्वात् बहुधा वेष्टितमित्यर्थः । चिरक्रियस्य । दीर्घसूत्रश्चिरक्रिय इत्यमरः । एवं कृतोरतस्योत्सवस्य कालक्षेपः कार्यविलम्बो येन तत्परिधानमधोंऽशुकं कामिनोऽलघ्यामकरोत् । इच्छाविघातादीर्ष्यामनया

अम्बरं विनयतः प्रियपाणे
र्योषितस्य करयोः कलहस्य ।
वारणामिव विधातुमभीक्ष्णं
कक्ष्यया च वलयैश्च शिशिञ्जे ॥ ६२ ॥
ग्रन्थिमुद्ग्रथयितुं हृदयेशे
वाससः स्पृशति मानधनायाः ।
भ्रूयुगेण सपदि प्रतिपेदे
रोमभिश्च सममेव विभेदः ॥ ६३ ॥

मामित्यर्थः। अत्र करसङ्गादिपदार्थानां विशेषणगत्या अरुच्या हेतुत्वादनेकपदार्थहेतुकङ्काव्यलिङ्गमलङ्कारः ॥ ६१ ॥

अम्बरमिति। अम्बरं विनयतोऽपसारयतः प्रियपाणेर्योषितः करयोश्च तस्मिन् रोधकयोरिति भावः। कलहस्य वारणां विधातुं निरावरणं कर्त्तुमिवेति फलोत्प्रेक्षा। कक्ष्यया काञ्च्या। कक्ष्या कक्षे वरत्रायां काञ्च्यां गेहप्रकोष्ठयोरिति विश्वः। कक्षयेति चान्त पाठे तु कक्षोपहणिकाकाञ्चीप्रकोष्ठगजरज्जुष्विति चान्तेषु विश्वः। वलयैः कङ्कणैश्च अभीक्ष्णं शिशिञ्जे चुकुशे। भावे लिट्। भूषणानां तु शिञ्जितमित्यमरः। द्वयोः कलहायमानयोः पार्श्वस्थाः साक्रोशं निवारयन्तीति भावः। शिञ्जतिरयन्तालव्यादिर्न दन्त्यादिः योषेव शिञ्जे इति श्रुतेः ॥ ६२ ॥

ग्रन्थिमिति। हृदयेशे प्रिये वाससो ग्रन्थिमुद्ग्रथयितुं विस्रंसयितुं। ग्रथयतेश्चौरादिकात्तुमुन्। स्पृशति सति मानधनाया मानवत्याः कामिन्याइति शेषः। भ्रूयुगेण रोमभिश्च।

आश्लिष्ट लङ्घितवतीष्टकराग्रे
नीविमर्द्धमुकुलीकृतदृष्ट्या ।
रक्तवैणिकहताधरतन्त्री
मण्डलक्वणितचारु चुकूजे ॥ ६४ ॥

कर्त्तरि तृतीयेति तृतीया । सपदि समं युगपदेव विभेदे भङ्गोहर्षश्च प्रतिपेदे प्राप्तः अत्र मानवत्त्वात्कामिनीविस्पर्शेषु युगपदमर्षहर्षयोरुदयात्तदनुभावयोरपि युगपदाविर्भाव इति भावः । अत्र भ्रूभङ्गरोमाञ्चक्रिययोः समुच्चयात् समुच्चयभेदः स च विभेद इति श्लेषप्रतिभोत्थापिताभेदाध्यवसायमूलातिशयोक्त्यनुप्राणित इति सङ्करः ॥ ६३ ॥

आश्लिष्टेति । इष्टस्य प्रियस्य कराग्रे नीविं वस्त्रग्रन्थिं आशु हठात् लङ्घितवति अतिक्रान्तवति ऊरुमूलङ्गते सतीत्यर्थः । अर्द्धमुकुलीकृतदृष्ट्या सुखपारवश्यादर्द्धनिमीलिताक्ष्या स्त्रिया रक्तोरक्तकण्ठः स्वयङ्गानकुशलः वीणाशिल्पमस्य वैणिकोवीणावाद्यनिपुणः । शिल्पमिति ठक् । रक्तेन वैणिकेन यन्त्रगानकुशलेन हतं वादितं यदधरतन्त्रीणां मण्डलं समूहः मकुतन्त्रीकस्वरमण्डलादिभेदः तस्य क्वणितमिव चारु यथा तथा चुकूजे कूजितम् । भावे लिट् । अधरग्रहणमन्यमाधुर्य्यातिशयात् । स्पर्शसुखातिरेकार्थमन्त्रीकण्ठस्वरव्यतिकरमनोहरः कोऽपि रसपर्वसम्भृतः कण्ठकूजितविशेषः कृत इत्यर्थः । अतएव रक्तवैणिकहतेति विशेषणं क्वणितपर्वेति उपमालङ्कारः ॥ ६४ ॥

आयताङ्गुलिरभूदतिरिक्तः
सुभ्रुवां कृशिमशालिनि मध्ये ।
श्रोणिषु प्रियकरः पृथुलासु
स्पर्शमाप सकलेन तलेन ॥ ६५ ॥

चक्रुरेव ललनोरुषु राजीः
स्पर्शलोभवशलोलकराणाम् ।
कामिनामनिभृतान्यपि रम्भा
स्तम्भकोमलतलेषु नखानि ॥ ६६ ॥

आयतेति । आयता अङ्गुलयो यस्य स प्रियकरः कृशस्य भावः कृशिमा कार्श्यम् । पृथ्वादिभ्य इमनिच् र ऋतो हलादेर्लघोरिति रेफादेशः । तेन शालते शोभते तस्मिन् सुभ्रुवां मध्येऽतिरिक्तोऽधिकोऽभूत् । मध्यस्यातिकार्श्यादस्यैकदेशोऽभूदित्यर्थः । पृथुलासु श्रोणिषु कटिषु । वहिश्रिश्रुयुद्रुग्लेति सूत्रेण श्रुधातोः निप्रत्ययः । सकलेन कृत्स्नेन तलेन स्पर्शमाप अन्तर्भागेन क्रमेण श्रोणिमस्पृशदित्यर्थः अत एव मध्यातिरेकोक्तेरतिशयोक्तिः ॥ ६५ ॥

चक्रुरेवेति । स्पर्शलोभवशेनोरुस्पर्शतृष्णापारतन्त्र्येण लोलकराणां चपलपाणीनां कामिनामनिभृतान्यसमर्पितान्यपि नखानि कररुहाः । पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियामित्यमरः । रम्भास्तम्भकोमलतलेषु कदलीप्रकाण्डपेलवस्वरूपेषु ललनानामूरुषु राजीः रेखाश्चक्रुरेव ऊरुपरामर्शनादरोपनखस्पर्शमात्रादेव रेखाजाताइत्यर्थः । अत्र कोमलतायाः विशेषणगत्या राजीकरणहेतुत्वात्काव्यलिङ्गभेदः ॥ ६६ ॥

ऊरुमूलचपलेक्षणमघ्न
न्यैर्वतंसकुसुमैः प्रियमेताः ।
चक्रिरे सपदि तानि यथार्थं
मन्मथस्य कुसुमायुधनाम ॥ ६७ ॥
धैर्य्यमुल्बणमनोभवभावा
वामताञ्च वपुरर्पितवत्यः ।
व्रीडितं ललितसौरतधार्ष्ट्या
स्तेनिरेऽभिरुचितेषु तरुण्यः ॥ ६८ ॥

ऊर्विति । एताः स्त्रियः ऊरुमूले चपलेक्षणं लोलचक्षुषं प्रियं वैर्वतंसकुसुमैः कर्णावतंसपुष्पैः । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरित्यकारलोपः । अघ्नन् अताडयन् । हन्तेर्लङ् । गमहनेत्यादिना उपधालोपः हो हन्तेरिति कुत्वम् । तानि वतंसकुसुमानि । मनो मथ्नातीति मन्मथः । पृषोदरादित्वात्साधुः । तस्य मन्मथस्य कुसुममायुधं यस्येति कुसुमायुध इति यन्नाम तद्यथार्थं चक्रिरे चक्रुः तदा तेषां तत्कार्य्यकारित्वादिति भावः । अत्र वतंसेष्वारोप्यमाणस्य मन्मथायुधत्वस्य प्रकृतोपयोगात्परिणामालङ्कारः ॥ ६७ ॥

धैर्य्यमिति । तरुण्यः रमण्यः उल्बण उद्रिक्तो मनोभवभावो रतिरागो यासां तास्तथाभूता अपि अभिरुचितेषु प्रियेषु धैर्य्यमौदासीन्यं तेनिरे । वपुः स्वाङ्गमर्पितवत्यो यथेष्टकरणाय दत्तवत्योऽपि वामतां वक्रताञ्च तेनिरे । ललितं मनोहरं सुरतं सुरतमपि धार्ष्ट्यमागल्भ्यं यासां तास्तथापि व्रीडितं व्रीडां तेनिरे इत्यु

पाणिरोधमविरोधितवाञ्छं
भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरू-
र्हारि शुष्करुदितञ्च सुखेऽपि ॥ ६९ ॥

स्त्रीणां रहसि रागाङ्कुरोद्गमेऽपि ह्रीधैर्यादिगुणाः स्वाभाविकतया सहज धैर्यवक्रताव्रीडितैः पुनः पुनः प्रतिबध्यन्त एवेति भावः । अत्र रागादीनां धैर्यादिभिः सह समावेशविरोधस्य सहजागन्तुकाभ्यामाभासीकरणाद्विरोधाभासोऽलङ्कारः धैर्यादिगुणसमुच्चयात्समुच्चयालङ्कारस्येति सङ्करः ॥ ६८ ॥

पाणीति । मणिबन्धादाकनिष्ठं करस्य करभो बहिरित्यमरः । करभ इव ऊरू यस्याः सा करभोरूः स्त्री । ऊरूत्तरपदादौपम्ये इत्यूङ्प्रत्ययः । अविरोधितवाञ्छमनिवारितप्रियमनोरथं यथा तथा कामिनः पाणिरोधं नीविमोचने व्यापृतस्य प्रियपाणेर्निवारणं कुरुते स्म । तथा मधुरं मनोहरं स्मितं गर्भे अन्तर्वर्त्ति यासु तामन्दहासमिश्राः भर्त्सनास्तर्जनाश्च कुरुते स्म । तथा सुखेऽपि अधरपीडनादौ सुखातिरेके सत्यपि हारि मनोहारि शुष्करुदितमनश्रुपातं रोदनाद्यं कृत्रिमरोदनञ्च कुरुते स्म । स्त्रीणामेष स्वभावो यदिष्टमप्यनिष्टतया निवारयन्त्य एव सुरतसुखमुपभुञ्जत इत्यर्थः । अत्र सुखेऽपि दुःखवदुपचारात्कुट्टमिताख्योऽनुभावो द्रष्टव्यः । केशाधरादिग्रहणे मोदमानेऽपि मानसे । दुःखितेव बहिः कुप्येच्च कुट्टमितं हि तदिति लक्षणात् ॥ ६९ ॥

वारणार्थपदगद्गदवाचा
मीर्ष्यया मुकुरपत्रपया च ।
कुर्व्वते स्म सुदृशामनुकूल
म्प्रातिकूलिकतयैव युवानः ॥ ७० ॥
अन्यकालपरिहार्य्यमजस्र
न्तद्द्वयेन विदधे द्वयमेव ।
धृष्टता रहसि भर्त्तृषु ताभि
र्निर्द्दयत्वमितरैरबलासु ॥ ७१ ॥

वारणार्थेति । ईर्ष्यया प्रतिपीडनासहिष्णुतया अपत्रपया च रहस्यप्रकाशनवैलक्ष्येण च मुहुर्वारणार्थपदेषु मामेत्यादिनिषेधवाचकशब्दप्रयोगेषु गद्गदवाचां स्खलद्गिरां सुदृशाम्प्रतिकूलं वर्त्तन्त इति प्रातिकूलिकाः प्रातिकूलचारिणः । तत्प्रत्यनुपूर्व्वमीपलोमकूलमिति ठक् । तत्तया प्रातिकूलिकतयैव प्रतिकूलाचरणेनैव युवानोऽनुकूलमिष्टं कुर्व्वते स्म रुचिमनिवारणाद्यत्प्रतिकूलमिवाचरितमधरपीडनादिकन्तत्तासामिष्टत्वादनुकूलमेवेति प्रतिकूलाचरणमेवानुकूलम्भवतीत्यर्थः । अत एव प्रतिकूलमप्यनुकूलमिति विरोधाभासोऽलङ्कारः ॥ ७० ॥

अन्येति । अजस्रन्नित्यं अन्यकालपरिहार्य्यं सुरतेतरकालेत्याज्यन्तद्द्वयं कर्म्म द्वयेन कर्त्रा विदधे विहितमेव । धाञः कर्म्मणि लिट् । एतदेव व्यनक्ति रहसि ताभिरबलाभिर्भर्त्तृषु विषये धृष्टता विदधे इतरैर्भर्त्तृभिरबलासु स्त्रीषु निर्दयत्वञ्च विदधे । अन्यदा यथा पुंसां स्त्रीषु दया तासाञ्चैष्वप्रागल्भ्यमलङ्कारसादृश्यसुरतेषु

बाहुपीडनकचग्रहणाभ्या
माहतेन नखदन्तनिपातैः ।
बोधितस्तनुशयस्तरुणीना
मुन्मिमील विशदं विषमेषुः ॥ ७२ ॥
कान्तया सपदि कोऽप्युपगूढः
प्रौढपाणिरपनेतुमियेष ।
संहतस्तनतिरस्कृतदृष्टि
र्भ्रष्टमेव न दुकूलमपश्यत् ॥ ७३ ॥

तदिरुद्धमेवालङ्कार इति भावः । अत्र स्त्रीपुंसधार्ष्ट्यनिर्दयत्वयोः प्रकृतयोर्विधानक्रियायौगपद्यं गम्यत इति तुल्ययोगिताभेदः ॥ ७१ ॥

बाह्विति । तरुणीनान्तनौ शेते इति तनुशयः तनुषु सुप्तः । अधिकरणे शेतेरित्यच् प्रत्ययः । विषमेषुः कामः बाहुपीडनं निर्दयाश्लेषः । कचग्रहणं केशाकर्षणन्ताभ्यामाहतेन मुष्टिघातेन । नपुंसके भावे क्तः । नखानान्दन्तानाञ्च निपातैः क्षतैश्च बोधितः सन् विशदं निर्व्याजं यथा तथा उन्मिमील उद्बुद्धः सर्व्वमेतत्काम स्योद्दीपकमासीदित्यर्थः । अत्र प्रकृतविषमेषुविशेषणसामर्थ्याद प्रस्तुतसुप्तप्रबुद्धपुरुषप्रतीतेः समासोक्तिरलङ्कारः । एवमेव प्रबोध्यते खलु निद्रालुरित्यलौकिके वस्तुनि लौकिकवस्तुव्यवहारसमारोपः ॥ ७२ ॥

कान्तयेति । कान्तया सपदि वस्त्राकर्षणक्षण एवोपगूढ आश्लिष्टः कोऽपि युवा कामी प्रौढपाणिर्व्यग्रहस्तः सन् अपनेतुन्दुकूलमाक्रष्टु मियेष संहताभ्यां निरन्तरश्लिष्टाभ्यां स्तनाभ्यां तिरस्कृतदृष्टि

आहतं कुचतटेन तरुण्याः
साधु सोढममुनेति पपात।
त्रुट्यतः प्रियतमोरसि हारात्
पुष्पवृष्टिरिव मौक्तिकवृष्टिः ॥ ७४ ॥
सीत्कृतानि मणितं करुणोक्तिः
स्निग्धमुक्तमलमर्थवचांसि।
हासभूषणरवाश्च रमण्याः
कामसूत्रपदतामुपजग्मुः ॥ ७५ ॥

स्तिरोहिताक्षः सन् भ्रष्टमेव प्रागेव स्वस्तनांशुकं नापश्यत्। अत्र दृष्टितिरस्कारस्य विशेषणगत्या अदर्शनहेतुकत्वात्पदार्थहेतुकं काव्यलिङ्गम्। तत्र दृष्टेस्तनतिरस्कारासम्बन्धेऽपि सम्बन्धरूपातिशयोक्त्यापितमिति सङ्करः। तेन च कुचयोर्लोकोत्तरशोभत्वं व्यज्यत इति अलङ्कारेण वस्तुध्वनिः ॥ ७३ ॥

आहतमिति। तरुण्याः सम्बन्धिना कुचतटेनाहतमाहतिममुना उरसा साधु सोढमिति हेतोस्त्रुट्यतः शीर्यमाणाद्धारान्मौक्तिकवृष्टिः पुष्पवृष्टिरिव प्रियतमोरसि पपात इत्युत्प्रेक्षा। विक्रान्तः पूज्यते पुष्पवृष्ट्येति प्रसिद्धिः ॥ ७४ ॥

सीत्कृतानीति। तरुण्याः सीत्कृतानि सीत्काराः। दन्तनिष्पीडनायां सीदिति शब्दप्रयोगः। मणितं रतिकाले स्त्रीणां कण्ठकूजितविशेषः। मणितं रतिकूजितमित्यभिधानात्। करुणोक्तिः पाहि स्वेत्यादिदीनोक्तिः। स्निग्धं स्नेहार्द्रमुक्तमुक्तिः त्वं मे प्राणा इति प्रियवाद इत्यर्थः; अलमर्थानि निषेधार्थानि वचांसि मा स्प्राक्षीरि

उद्धतैर्निभृतमेकमनेकै
श्छेदवन्मृगदृशामविरामैः ।
श्रूयते स्म मणितङ्कलकाञ्ची
नूपुरध्वनिभिरक्षतमेव ॥ ७६ ॥
ईदृशस्य भवतः कथमेत
ल्लाघवम्मुहुरतीव रतेषु ।
क्षिप्तमायतमदर्शयदुर्व्यां
काञ्चिदाम जघनस्य महत्त्वम् ॥ ७७ ॥

निवारणवचनानि । हासानां भूषणानां च रवाः स्तनाश्च कामसूत्रस्य वात्स्यायनादिकामतन्त्रप्रतिपादकशास्त्रस्य पदतामप्यत इति पदमर्थः प्रमेयलक्षणमिति यावत्तत्तामुपजग्मुः इति गम्योत्प्रेक्षा । यद्वा कामेनैव कृतं सूत्रं तस्य पदानि सुप्तिङन्तशब्दरूपाणि तस्य शास्त्रस्यैतान्येव पदानि तत्तामुपजग्मुरित्युत्प्रेक्षैव ॥ ७५ ॥

उद्धतैरिति । निभृतमनुद्धतं सूक्ष्ममित्यर्थः । एकमेकाकि छेदवत् विच्छेदयुक्तम् । मृगदृशां मणितं रतिकूजितं उद्धतैः स्थूलैरनेकैर्बहुभिरविरामैरविच्छेदैः कलैरव्यक्तमधुरैः काञ्चीनां नूपुराणां च ध्वनिभिरक्षतमनिरस्तमेव श्रूयते स्म श्रुतं मणितस्य तिरोधायकशब्दान्तरसद्भावेऽपि ताद्रूप्यानापत्तेरतद्गुणालङ्कारः । सहिते चेत्तद्रूपस्वीकारः स्यादतद्गुण इति लक्षणात् ॥ ७६ ॥

ईदृशस्येति । रतेषु उर्व्या क्षिप्तं रतिसम्भ्रमात्पतितं आयतन्दीर्घभूतं काञ्चिदाम रशनागुणः कर्तृ ईदृशस्येति काञ्चिदाम्नः स्वायामदृष्टान्तेन जघनपरिमाणप्रदर्शनेन इत्थं महत्तरस्यापि

प्राप्यते स्म गतचित्रकचित्रै-
श्चित्रमार्द्रनखलक्ष्म कपोलैः ।
दध्रिरेऽथ रभसच्युतपुष्पाः
स्वेदबिन्दुकुसुमान्यलकान्ताः ॥ ७८ ॥
यद्यदेव रुरुचे रुचिरेभ्यः
सुभ्रुवो रहसि तत्तदकुर्वन् ।
आनुकूलिकतया हि नराणा-
माक्षिपन्ति हृदयानि तरुण्यः ॥ ७९ ॥

महतस्तत्र जघनस्य रतेषूपरि सुरतेषु मुहुः कथमेतल्लाघवं मुहुरुत्पतनपाटवं यस्येत्थमायतमहमप्येकवेष्टनपर्याप्तमिति भावः । इति जघनस्य महत्त्वदर्शनादिव इत्थं विस्मितयेति शेषः । गम्यमानार्थत्वादप्रयोगः । अत्रोर्व्यामायतत्वनिमित्तकाञ्चीदामकर्तृकं विस्मयपूर्वकजघनमहत्त्वदर्शनमुत्प्रेक्ष्यते ॥ ७७ ॥

प्राप्यत इति । गतानि विमर्दान्नष्टानि चित्रकचित्राणि तमालपत्ररचनानि येषां तैः कपोलैः आर्द्रं यन्नखलक्ष्म तदेव चित्रमिति रूपकम्प्राप्यते स्म प्राप्तम् । किञ्च रभसेन रतिसम्भ्रमेण च्युतपुष्पा अलकान्ताश्चूर्णकुन्तलाग्राणि स्वेदबिन्दूनेव कुसुमानीति रूपकं दध्रिरे दधुः । धरतेर्भौवादिकाल्लिटि मित्वादात्मनेपदम् । स्वेदोऽत्र श्रमानुभवः । श्रमः खेदोऽध्वरत्यादेः श्वासखेदादिभूमिकृत् ॥ ७८ ॥

यद्यदेवेति । रुचिरेभ्यो रमणेभ्यो यद्यदेव चेष्टितं रुरुचे रोचते स्म प्रियमभूदित्यर्थः । रुचदीप्तावभिप्रीतौ चेति धातोर्लिट् ।

प्राप्य मन्मथरसादतिभूमि
न्दुर्वहस्तनभराः सुरतस्य ।
शश्रमुः श्रमजलार्द्रललाट
श्लिष्टकेशमसितायतकेश्यः ॥ ८० ॥

रच्यर्थानां प्रीयमाणइति सम्प्रदानत्वम् । सुभ्रुवो रहसि तत्तद् कुर्व्वन् । तथा हि तरुण्यः अनुकूलं वर्त्तन्त इत्यानुकूलिकाः । तत्प्रत्यनुपूर्व्वमीपलोमकूलमिति ठक् । तासाम्भावस्तत्ता तया आनुकूलिकतया अनुकूलवर्त्तितयैव नराणां पुंसां हृदयान्याक्षिपन्त्य वर्जयन्तीत्यर्थान्तरन्यासः ॥ ७९ ॥

प्राप्येति । दुर्व्वहः स्तनभरो यासान्ता एतेनोपरिसुरतं व्यज्यते । अन्यथा विशेषणवैयर्थ्यात् । असिताश्चायताश्च केशा यासान्ता असितायतकेश्यः स्त्रियः । स्वाङ्गाच्चेत्यादिना ङीप् । मन्मथरसात् स्मररागात् सुरतस्यातिभूमिम्पराङ्काष्ठाम्प्राप्य महान्तं सुरतम्प्राप्येत्यर्थः । श्रमजलेन स्वेदाम्बुना आर्द्रे ललाटे श्लिष्टाः केशा यस्मिन् कर्म्मणि तद्यथा तथा शश्रमुः इति सानुभावस्य श्रमभावोक्तेः भावनिबन्धनात्प्रेयोऽलङ्कारः ॥ ८० ॥

अथ सुरतावसानं वर्णयति । मधुताभिरिति । रुचितैः परिचितैः प्रियतमैः सह मधुताभिर्वधूभिः प्राक् सुरतादौ चलितामन्तुं प्रचलितापि ह्रीः सखीव चिरेणामुच्यत मुक्ता । न सहसेत्यर्थः । पर्यायवचनेन गम्यमानः । विरलस्यावसर विरलमवसमाना चरतीत्यर्थः । कर्तृकर्मणोः कृतीति कर्मणि षष्ठी । एतान्ये त्यर्थाएव मधूषिः सानंगस्य मधूत्वा सखीवेत्युत्प्रेक्षा । चतुर्वर्ग

सङ्गताभिरुचितैश्चलितापि
प्रागमुच्यत चिरेण सखीव ।
भूय एव समगंस्त रतान्ते
ह्रीर्वधूभिरसहा विरहस्य ॥ ८१ ॥
प्रेक्षणीयकमिव क्षणमासन्
ह्रीविभङ्गुरविलोचनपाताः ।
सम्भ्रमद्रुतगृहीतदुकूल
च्छाद्यमानवपुषः सुरतान्ताः ॥ ८२ ॥

गमेर्लुङ् समो गम्यृच्छिभ्यामित्यात्मनेपदं सागम इति सिचः पक्षे कित्त्वाभावादनुदात्तोपदेशेत्यादिनानुनासिकलोपो न । सुरतेतर काले स्त्रीणां लज्जैव भूषणमिति भावः । उपमालङ्कारः ॥ ८१ ॥

प्रेक्षणीयकमिति । ह्रिया विभङ्गुराः स्खलिता विलोचनपाता दृष्टिपाता येषु ते सम्भ्रमेण द्रुतं गृहीतेन दुकूलेन छाद्यमानानि वपूंषि अमरङ्गाणि येषु ते सुरतान्ताः सुरतावसानानि क्षणं प्रेक्षणीयकं दृश्यमिवासन् इत्युपमा । नाटकादिरूपकेष्वाहार्याख्यं वस्तु तद्दृश्यं प्रेक्षणीयकमिति चोच्यते इत्याविर्भावतिरोधानादिना तत्तुल्यत्वम् ॥ ८२ ॥

अप्रभूतमिति । तन्वी कृशाङ्गी अभीष्टतमेन प्रेयसा आलम्पितं गृहीताम्बरं अत एवानतीयसि महीयसि काञ्चिधाम्नि जघने अप्रभूतम् आवरितुं अपर्याप्तं अत एव पिहितम् आच्छादितं एकतर स्योरुद्वयेन तत् क्षौमदुकूलं आकुलकरा व्यग्रपाणिः सती बिभ्रती

अप्रभूतमतनीयसि तन्वी
काञ्चिधाम्नि पिहितैकतरोरु ।
क्षौममाकुलकरा विचकर्ष
क्रान्तपल्लवमभीष्टतमेन ॥ ८३ ॥
म्हष्टचन्दनविशेषकभक्ति
र्भ्रष्टभूषणकदर्थितमाल्यः ।
सापराध इव मण्डनमासी
दात्मनैव सुदृशामुपभोगः ॥ ८४ ॥

कृत्स्नापिधानार्थमाचकर्ष लज्जानुभावोऽयम् । अत्र क्षौमविशेषणानामाकर्षणहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ८३ ॥

म्हष्टेति । म्हष्टा प्रम्हष्टा चन्दनानां विशेषकाणां तमालपत्राणाञ्च भक्तीरचना येन सः । तमालपत्रतिलकचित्रकाणि विशेषक इत्यमरः । भ्रष्टानि भूषणानि यस्मिन् स भ्रष्टभूषणः कुत्सितोऽर्थः कदर्थः । लोकतो विशेष्यलिङ्गत्वम् । कोः कत्तत्पुरुषेऽचीति कुशब्दस्य कदादेशः । कदर्थानि कृतानि कदर्थितानि दूषितानि माल्यानि येन सः । ततस्तयोर्वैवचिकविशेष्यविशेषणभावाद्विशेषणसमासः । एवम्भूत उपभोगः सापराध इव पूर्वं मण्डनापहारात्कृतापराध इव सुदृशामात्मनैव स्वयमेव । प्रकृत्यादित्वात् तृतीया । मण्डनमासीत् । प्रतिनिधिकरणेन स्वापराधनिरासार्थमिवेत्युत्प्रेक्षा । स्त्रीणां सम्भोग एव मण्डनं तदभावे मण्डनान्तरस्याप्यमण्डनत्वादिति भावः । ८४ ॥

योषितइति । मोहनातिरभसेन सुरतसम्भ्रमेण पतिता काञ्चनी काञ्चनस्य विकारः काञ्चिर्यस्मात्तस्मिन्निर्मोचके योषितः

योषितः पतितकाञ्चनकाञ्च्यौ
मोहनातिरभसेन नितम्बे ।
मेखलेव परितः स्म विचित्रा
राजते नवनखक्षतलक्ष्मीः ॥ ८५ ॥
भातु नाम सुदृशां दशनाङ्कः
पाटलो धवलगण्डतलेषु ।
दन्तवाससि समानगुणश्रीः
सम्मुखोऽपि परभागमवाप ॥ ८६ ॥
सुभ्रुवामधिपयोधरपीठं
पीडनैस्त्रुटितवत्यपि पत्युः ।
मुक्तमौक्तिकलघुर्गुणशेषा
हारयष्टिरभवद्गुरुरेव ॥ ८७ ॥

नितम्बे परितः सर्वतो विचित्रा विविधरचना नवनखक्षतलक्ष्मी मेखलेव राजते स्म । उत्प्रेक्षालङ्कारः ॥ ८५ ॥

भात्विति । सुदृशां सम्बन्धी पाटलोऽरुणो दशनाङ्को दन्तक्षतं धवलगण्डतलेषु कपोलेषु भातु नाम वैवर्ण्याद्भेदेन प्रकाशतां नामेत्यङ्गीकारे । दन्तवाससि अधरे तु समानगुणश्रीस्तुल्यवर्णोऽपि तथा सम्मुखोऽपि सन् परभागं गुणोत्कर्षं तथा पश्चाद्भागञ्चावाप इति सावर्ण्यवैवर्ण्ययोः सम्मुखपराङ्मुखत्वयोश्च विरोधः सपरिभागमवापेत्युभयत्र परिहाराद्विरोधाभासद्वयसंसृष्टिः तयोश्च श्लेषभित्तिकाभेदाध्यवसायमूलत्वाद्गुणत्वापत्तिरिति सङ्करः ॥ ८६ ॥

सुभ्रुवामिति । सुभ्रुवां पयोधरपीठके कुचतटे अधिपयोधरपीठं । विभक्त्यर्थेऽव्ययीभावः । पत्युः पीडनैः परिरम्भादिविमर्दै

विश्रमार्थमुपगूढमजस्रं
यत्प्रियैः प्रथमरत्यवसाने ।
योषितामुदितमन्मथमादौ
तद्द्वितीयसुरतस्य बभूव ॥ ८८ ॥

त्रुटितवती छेदङ्गतापि । अतएव मुक्तमौक्तिका या च सा लघुश्च अतएव गुणशेषा सूत्रमात्रशेषापि हारयष्टिर्गुरुः श्लाघ्यैवाभवत् । लघुरपि गुरुरिति विरोधाभासोऽलङ्कारः ॥ ८७ ॥

विश्रमेति । योषितां प्रथमरत्यवसाने विश्रमार्थं श्रमापनोदार्थं । श्राम्यतेर्घञ्प्रत्ययः नोदात्तोपदेशस्य मान्तस्यानाचमेरिति वृद्ध्यभावः । अजस्रम्प्रियैरुपगूढं उपगूहनम् । नपुंसके भावे क्तः न लोकेत्यादिना षष्ठीप्रतिषेधः । उदितमन्मथमुत्पादितकामं अतएव तदुपगूहनं द्वितीयसुरतस्यादौ बभूव । श्रमापनोदमन्मथोद्बोधाभ्यां उभयोपयोगादुभयार्थमभूत् संयोगपृथक्त्वन्यायादित्यर्थः अत्र मध्यवर्त्तिन उपगूढस्यैकस्य पूर्वोत्तरसुरतशेषत्वेन विशेषणगत्या विश्रमार्थोदितमन्मथपदार्थयोर्हेतुत्वात्काव्यलिङ्गद्वयन्तदङ्गाङ्गिभावेन सङ्कीर्य्यते ॥ ८८ ॥

आस्तृतइति । अनारतमश्रान्तं रते सुरते अभिरताभ्य आसक्ताभ्योवधूभ्यः चणमुत्सवमुखन्ददातीति चणदा रात्रिस्तयापि अभिनवैः पल्लवैः पुष्पैरास्तृते आच्छादितेऽपि सुखशयनार्हेऽपीत्यर्थः । शेतेऽस्मिन्निति शयनीये तल्पे । कृत्यल्युटो बहुलमित्यधिकरणेऽनीयर् । शयितुं शयनं कर्त्तुं चणोऽल्पकालोऽपि न दीयते स्म न दत्तः किन्त्वाप्रभातमरमयत् चण

आस्तृतेऽभिनवपल्लवपुष्पै-
रप्यनारतरताभिरताभ्यः ।
दीयते स्म शयितुं शयनीये
न क्षणः क्षणदयापि वधूभ्यः ॥ ८९ ॥

योषितामतितरां नखलूनं
गात्रमुज्ज्वलतया न खलूनम् ।
क्षोभमाप हृदयं न यदूनां
रागवृद्धिमकरोन्न यदूनाम् ॥ ९० ॥

त्वादेवेति भावः क्षणदयापि क्षणो न दत्त इति विरोधस्य क्षणदेत्यस्य रात्र्यर्थत्वेन परिहाराद्विरोधाभासोऽलङ्कारः । निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षण इत्यमरः ॥ ८८ ॥

योषितामिति । नखलूनं न खलु ऊनं नयत् ऊनां न यदूनां इति पदच्छेदः । अतितरामतिमात्रं । अव्ययादामुप्रत्ययः । नखै-र्लूनं क्षतं नखलूनं । ल्वादिभ्यश्चेति निष्ठानत्वम् । गात्रमुज्ज्वलतया शोभाद्वयेन न ऊनं न न्यूनं किन्तु समग्रमेवेत्यर्थः । नख-क्षतानां कामिनीगात्रभूषणत्वादिति भावः । अत एवाङ्ग हृदयमपि चित्तं क्षोभं विकारं नयत् प्रापयत् । नयतेर्लटः शत्रादेशः । योषिताङ्गात्रं यदूनां यादवानां रागवृद्धिं ऊनां न्यूनां नाकरोत् खलु किन्तु भूयोऽपि समग्रमेवाकरोदित्यर्थः । अत्र यमकमहालङ्कारः शोभावत्त्वविशेषणगत्या रागवृद्धिहेतुत्वात्काव्यलिङ्गमपीत्यलङ्कारः ॥ ९० ॥

इति मदमदनाभ्यां रागिणः स्पष्टरागा
ननवरतरतश्रीसङ्गिनस्तानवेक्ष्य ।
अभजत परिवृत्तिं साथ पर्यस्तहस्ता
रजनिरवनतेन्दुर्लज्जयाधोमुखीव ॥ ९१ ॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये सुरतवर्णनोनाम दशमः सर्गः समाप्तः ॥ १० ॥

इतीति । इतीत्थं मदमदनाभ्यां स्पष्टरागाम् सर्व्वदा रागित्वेऽपि तदा ताभ्यामपि व्यञ्जितरागामित्यर्थः अनवरतरतश्रीसङ्गिनः अविच्छिन्नसुरतसम्पत्सम्पटान् तान् रागिणो रागिण्यश्च रागिणश्च तान् रागिणः । पुमान् स्त्रियेत्येकशेषः । अवेक्ष्य अथानन्तरं पर्य्यस्तः परिक्षिप्तो हस्तो नक्षत्रविशेषः करश्च यस्याः सा । हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपीत्युभयत्रापि विश्वः । अवनतेन्दुः अस्तचन्द्रा अतएव सा रजनिर्लज्जया ग्राम्यचेष्टादर्शनजनितयेति भावः अधोमुखी नम्रमुखीवेत्युत्प्रेक्षा । परिवृत्तिं निवृत्तिमुपरतिम अभजत प्रभातप्रायाऽभूदित्यर्थः । स्त्रियोऽपि परकीयग्राम्यचेष्टादर्शने त्रपावनतमुख्यो हस्तेन दृष्टिमवष्टभ्य ह्यागपसरन्तीति भावः अतएवानन्तरसर्गे प्रभातवर्णनाय प्रस्तावः । मालिनीवृत्तमेतत् लक्षणं तूक्तं वक्ष्यते चोत्तरसर्गादौ ॥ ९१ ॥

इति श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते [illegible] काव्यव्याख्याने सर्व्वङ्कषाख्ये दशमः सर्गः समाप्तः ॥ १० ॥

॥ समाप्तमिदं पूर्वार्द्धम् ॥